लघुग्रन्थमाला

[२७]

पण्डितरामानन्दपतित्रिपाठिविरचितं

रसिकजीवनम्

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

LAGHUGRANTHAMĀLĀ

[27]

Chief Editor

DR. BHĀGĪRATHA PRASĀDA TRIPĀṬHĪ 'VĀGĪŚA ŚĀSTRĪ'

Director, Research Institute,

Sampurnanand Sanskṛt Vishvavidyalaya,

Varanasi

RASIKAJEEVANAM

by

PT. RĀMĀNANDA PATI TRIPĀHṬĪ

Edited by

Prof. KARUṆĀ PATI TRIPĀṬHĪ

Vice-Chancellor

Sampurnanand Sanskṛt Vishvavidyalaya

VARANASI

1978

Published by—
Director, Research Institute,
Sampurnanand Sanskṛt Vishvavidyalaya
Varanasi.

Available At—
Publication Section
Sampurnanand Sanskṛt Vishvavidyalaya
Varanasi-221002.

First Edition : 500 Copies

Price Rs. 7.00

Printed by—
Tara Printing Works,
Kamaccha, Varanasi.

लघुग्रन्थमाला

[२७]

मुख्यसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थाननिदेशकः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

पण्डितरामानन्दपतित्रिपाठिविरचितं

रसिकजीवनम्

सम्पादकः

प्रो० करुणापतित्रिपाठी

कुलपतिः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणस्याम्

२०३४ तमे वैक्रमाब्दे   १८९९ तमे शकाब्दे   १९७८ तमे खैस्ताब्दे

प्रास्ताविकम्

'रसिकजीवनम्' इत्याख्यः सप्ततरङ्गात्मको ग्रन्थः साहित्यरसिकानां पाणिपल्लवयोः समुपह्रियते सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतो लघुग्रन्थमालायाः सप्तविंशकुसुमत्वेन प्रस्फुटितः। नायिकानायकयोर्भावनां नाटकेषु नाटचमानानां विश्लेषणाय नाटचाचार्येण भरतेन बीजरूपेण समुपन्यस्तं सुप्रसिद्धे नाटचशास्त्रे। विश्लेषणमेतन्नवमख्रीस्तशताब्दात् प्रभृति विकासमापन्नमुत्तरोत्तरं प्रौढिमानं बिभ्रद् दृश्यते। लक्षणशास्त्रप्रणेत्रो रुद्रभट्टधनञ्जययोरनन्तरमेकादशख्रीस्तशताब्दे भोजराजेन सरस्वतीकण्ठाभरणाख्ये लक्षणशास्त्रे नायिकानां १४३ संख्याका भेदोपभेदा दर्शिताः। हेमचन्द्रकृतकाव्यानुशासनानन्तरं त्रयोदशख्रीस्तशताब्दस्थितेन शारदातनयेन भावप्रकाशने नायिकानां (३८४) चतुरशीत्युत्तरशतत्रयात्मका भेदोपभेदा दर्शिताः। चतुर्दशख्रीस्तशताब्दभवेन विश्वनाथकविराजेनापि साहित्यदर्पणे नायिकानां ३८४ भेदोपभेदाः सरण्यन्तरेण वर्णिताः। संख्येयं भानुदत्तमिश्रेणापि स्वीकृता रसमञ्जर्याम्। तत्र 'दिव्या' 'अदिव्या' 'दिव्यादिव्या' इति भेदत्रयेण नायिकानां भेदोपभेदाः ११५२ संख्याका जायन्ते। गौडीयवैष्णवपरम्परायां षोडशख्रीस्तशताब्दे श्रीरूपगोस्वामिरचित उज्ज्वलनीलमणिर्वस्तुतो मणिरिव चकास्ति। तत्र साधनानुसारेण नायिकायाः सिद्धा, सुसिद्धा, नित्यसिद्धेति प्रकारेण १९०८ भेदोपभेदा दर्शिताः।

मोहम्मदानां शासनावधौ नायिकानायकवर्णना शीर्षण्यतामुपेता। रसराजस्य शृङ्गारस्य समुन्नयो मोहम्मदशासकानां समुन्नय इवोत्तरोत्तरं दृश्यते। दाराशिकोहस्तत्रान्तिमो राजकुमारः, येन संस्कृतसाहित्यं प्रत्यनुरागं प्रदर्शयता संस्कृतपण्डिता राज्याश्रयप्रदानेन प्रोत्साहिताः। तत्र दाराशिकोहेन सह निवसतः पण्डितराजजगन्नाथस्य प्रसिद्धिश्चतुरस्रा। तेनैव दाराशिकोहेन सभाजितस्य वाराणसेयस्य विद्याचमत्कारपारङ्गमोपाधिभाजः पण्डिताग्रगण्यस्य कविरत्नस्य त्रिपाठ्युपाह्वस्य श्रीरामानन्दशर्मणो ग्रन्थास्तथा प्रसिद्धिं प्रचारं च नावाप्ताः, यद्यपि तस्य वैदुष्यं पण्डितराजतो नूनं नोनम्, काव्यमाधुरी च नाप्रकृष्टा। पण्डितराजरचितस्तोत्रेभ्योऽप्यधिकानि विद्याचमत्कारपारङ्गमस्य स्तोत्राणि विविधच्छन्दःसु निबद्धानि। तेषु चत्वारि १८८८ तमे, १९०५ तमे च ख्रीस्ताब्दयोः प्रकाशमानीतान्यपि। श्रीरामानन्दकृत-चतुर्भुजाष्टकस्तोत्रस्य रचनाकालः सं० १७२३ वैक्रमाब्दो लिखितः। सः १६६६ ख्रीस्ताब्दो भवति।

पण्डितराजः शाहजहाँनृपतेः सभापण्डितस्तदामन्त्रितस्तज्ज्येष्ठसुतं दाराशिकोहमध्यापितवानिति १५९० ख्रीस्ताब्दात् १६६५ ख्रीस्ताब्दं यावत्

तदीयः समयो निर्धारयितुं शक्यते। पण्डितरामानन्दो दाराशिकोहेन वाराणसीवासे जीवनोत्तरार्द्धे सभाजित इति शक्यते वक्तुम्। अतो विद्यावैभवसमुपेतस्य व्याकरण-न्याय-कर्मकाण्ड-ज्योतिषायुर्वेद-धर्मशास्त्र-तन्त्र-कोष-काव्यादिविविधशास्त्रनदीष्णस्यापि तस्य ग्रन्थाः प्रसिद्धिं नाभजन्त। तस्य काव्यनैपुणी रसिकजीवनस्यास्याध्ययनेन सुस्फुटं विज्ञायते। विविधच्छन्दःसु संदृब्धोऽयं ग्रन्थो यद्यपि नायिकानायकादिभेदवर्णनपरः, तथापि श्लोकेषु निस्यन्दमाना काव्यरससुधाधाराऽऽस्वादोऽनुभविष्यते सहृदयहृदयैरिहेति नूनं प्रतीमः। पूर्ववर्तिभिराचार्यैर्लक्षणग्रन्थेषु नायिकानायकभेदवर्णनप्रसङ्गे तल्लक्षणानि निर्धारितानि। इह रसिकजीवने तु लक्षणानि विहाय मधुरपद्यैरुदाहरणान्येव संगुम्फितानि मनोरमाणि। ग्रन्थस्यास्य चारुतां विभाव्य बहुभ्यो वर्षेभ्यः प्राग् रसिकजीवनमिदं केनचित् काव्यमोषकेण स्वनाम्ना प्राकाशि। किन्तु न्यायालयेन सर्वाः प्रतिकृतयो निगृहीता विक्रयार्थं च प्रतिबद्धाः।

तदिदं रसिकजीवनं ग्रन्थप्रणेतुर्वंशजस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयकुलपतिपदं समलङ्कुर्वाणस्य प्राच्यप्रतीच्योभयविद्यापारङ्गमस्य पण्डितकरुणापतित्रिपाठिमहोदयस्य महता प्रयासेन प्रकाशमानीयते साम्प्रतम्। इह त्रिपाठिमहोदयेन सम्पादनविधौ महत् प्रावीण्यमभिव्यक्तम्। ऐतिहासिकेन क्रमेण प्रणीतायां तदीयायामनितरसाधारणायां प्रस्तावनायां वर्णितं नायिकानायकभेदविषयकमनूनकमैतिह्यं ग्रन्थरत्नस्यास्य महिमानं द्विगुणयति। एवम्भूतमिदं रसिकजीवनं कस्य रसिकस्य हृदयं नानुरञ्जयेत्। जिज्ञासुजनानामुपकाराय विद्वज्जनानां च प्रीणनाय ध्रुवमिदं सेत्स्यतीति विश्वसिति—

वाराणस्याम्
माघपूर्णिमायां २०३४ वै०
(२३-२-७८ खी० गुरौ)

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
निदेशकः
अनुसन्धानसंस्थानस्य।

विषयानुक्रमणी

विषयाः	पृष्ठाङ्काः
प्रस्तावनागतविषयाः	१
नायिकाभेदस्योपक्रमो नाट्यशास्त्रे	१
नायिकानां नायकानाञ्चाभिनयान्तर्गत्वम्	१
नाट्यशास्त्रे रसस्य प्रमुखतया निरूपणम्	१-२
नाट्यशास्त्रे प्रथमाध्यायतः पञ्चमाध्यायपर्यन्तं वर्णितविषयाणां रसनिरूपणप्रस्तावनात्मकत्वम्	३
नाट्यशास्त्रे प्रमुखतस्तत्त्वद्वयस्योपपादनम्	३
तत्र रसस्यैव प्राधान्यम्	३-४
नायिकाभेदस्य नाट्यशास्त्रोपज्ञत्वम्	४
नायिकाभेदस्योद्भवो विकासश्च	५
हर्षवर्धनसमये रसिकताया आधारः	५
तत्परवर्त्तिकाले रसिकताया आधारः	५
नायिकाभेदस्यारम्भिकं विवरणम्	६
दशरूपकस्य संक्षेपतो विवरणम्	६
नायिकाभेदश्च	
श्रृङ्गारतिलकस्य श्रृङ्गारपारतन्त्र्यम्	७
नायिकाभेदोपकरणानि नाट्यशास्त्रञ्च	८
नाट्यशास्त्रे नायिकानां विविधभेदाः	९-१०
मुग्धा-मध्या-प्रौढादयो भेदाः	११
अष्टधा नायिकाभेदाः	१२
प्रथमपृष्ठतो द्वादशपृष्ठपर्यन्तं वर्णितविषयाणां निष्कर्षः	१२
ग्रन्थान्तरेषु नायिकाभेदाः	१२
अग्निपुराणे नायिकाभेदाः	१३
अग्निपुराणीयोक्तांशस्य प्राचीनत्वे सन्देहः	१३-१४
रुद्रटरुद्रभट्टरीत्या नायिकाभेदाः	१४-१६
निष्कर्षः	१६-१८
भोजदेवकृता नायिकाभेदाः	१८-२२
हेमचन्द्रकृतनायिकाभेदाः	२२-२३
भावप्रकाशने नायिकाभेदाः	२३-२४
रसार्णवसुधाकरे नायिकाभेदाः	२४-२५
साहित्यदर्पणे नायिकाभेदाः	२६-२७
निष्कर्षः	२७
रसमञ्जर्यां नायिकाभेदाः	२७-३१
गौडीयवैष्णवभक्तिपरम्परायां नायिकाभेदाः	३१-३४
गौडीयसम्प्रदाये नायिकाभेदस्य वैशिष्ट्यम्	३४-३५
मन्दारमकरन्दचम्प्वां नायिकाभेदाः	३६
तस्या निष्कर्षः	३६-३७
श्रृङ्गारमञ्जरीरचनाप्रयोजनम्	३८
श्रृङ्गारमञ्जर्या मुख्यं वैशिष्टचम्	३८-३९
श्रृङ्गारमञ्जर्यां नायिकाभेदाः	४०-४२
श्रृङ्गारामृतलहर्यां नायिकाभेदाः	४२-४३
रसरत्नहारे नायिकाभेदाः	४३
रसचन्द्रिकायां नायिकाभेदाः	४४
सदुक्तिकर्णामृते नायिकाभेदाः	४५
शार्ङ्गधरपद्धतौ नायिकाभेदाः	४५
पद्यरचनायां नायिकाभेदाः	४६
रसिकजीवनस्य कविः, तद्रचनायां कवेर्भावना	४६
रसिकजीवनकर्तुर्व्यक्तित्वम्, ऐतिह्यम्,	४६-४७
कृतयः, तत्र स्तोत्राणि	४७-४९
विविधग्रन्थाः	४९
वैद्यकग्रन्थस्य विवरणम्	५०
ज्योतिषग्रन्थस्य विवरणम्	५१
वैदिककर्मकाण्डग्रन्थानां विवरणम्	५१

लिङ्गानुशासनस्य विवरणम् ५२
छन्दोरत्नाकरस्य विवरणम् ५२
तन्त्रशास्त्रग्रन्थाः ५२-५४
साहित्यग्रन्थानां विवरणम् ५४
रसिकजीवनस्य विवरणम् ५४-५५
पद्यपीयूषस्य विवरणम् ५५
रामचरित्रस्य विवरणम् ५६

मूलग्रन्थगतविषयाः १

मङ्गलाचरणम् १
अधिकारिनिरूपणम् ,,
शृङ्गारस्य रसनायकत्वम् ,,
तदालम्बनयोर्नायिकानायकयोर्निरूपणप्रतिज्ञा ,,
नायिकाया भेदाः २
तत्र स्वीयाया गुणाः २
स्वीयाया भेदाः २
तत्र मुग्धाया लक्षणम् २
मुग्धाया भेदनिरूपणम् २
तत्राज्ञातयौवनाया उदाहरणम् २
ज्ञातयौवनाया उदाहरणम् ३
भेदान्तरनिरूपणम् ३
नवोढाया उदाहरणम् ३
विश्रब्धनवोढाया उदाहरणम् ३
विश्रब्धनवोढाया भेदान्तरम् ४
मध्याविश्रब्धनवोढाया उदाहरणम् ४
प्रगल्भालक्षणम् ४
प्रगल्भाया उदाहरणम् ४
मध्याप्रागल्भयोर्भेदान्तरनिरूपणम् ४
धीरा-अधीरा-धीराऽधीराणां लक्षणम् ४
मध्याधीराया उदाहरणम् ५
मध्याऽधीराया उदाहरणम् ५
मध्याधीराऽधीराया उदाहरणम् ५
प्रौढाधीराया उदाहरणम् ५
प्रौढाऽधारीया उदाहरणम् ५
प्रौढाधीराऽधीराया उदाहरणम् ६
मध्याप्रगल्भयोर्भेदान्तरम् ६
धीराज्येष्ठाकनिष्ठयोरुदाहरणम् ६
अधीराज्येष्ठाकनिष्ठयोरुदाहरणम् ६
धीराऽधोराज्येष्ठाकनिष्ठयोरुदाहरणम् ६
परकीयाया लक्षणं, भेदश्च ६
परोढाया उदाहरणम् ६
परकीयाया भेदान्तरम् ७
तत्र गुप्ताया भेदाः ७
त्रिधाया अपि गुप्ताया उदाहरणम् ७
विदग्धाया भेदाः ७
वाग्विदग्धाया उदाहरणम् ७
क्रियाविदग्धाया उदाहरणम् ७
लक्षिताया उदाहरणम् ७
कुलटाया उदाहरणम् ८
कन्यकाया उदाहरणम् ८
सामान्यवनिताया लक्षणम् ८
स्वकीया-परकीया-सामान्यवनितानां भेदान्तरम् ८
अन्यसम्भोगदुःखिताया उदाहरणम् ८
वक्रोक्तिगर्विताया भेदौ ८
प्रेमगर्विताया उदाहरणम् ९
सौन्दर्यगर्विताया उदाहरणम् ९
मानवत्या लक्षणम् ९
मानवत्या उदाहरणम् ९
एतासां भेदान्तरम् ९
मुग्धाप्रोषितभर्तृकाया उदाहरणम् १०
मध्याप्रोषितभर्तृकाया ,, १०
प्रौढाप्रोषितभर्तृकाया ,, १०
परकीया ,, ,, १०
सामान्यवनिता ,, ,, १०
खण्डिताया लक्षणम् १०
मुग्धाखण्डिताया उदाहरणम् ११
मध्या ,, ,, ११
प्रौढा ,, ,, ११
परकीया ,, ,, ,,

सामान्यवनिताया उदाहरणम् ११
कलहान्तरितायां लक्षणं चेष्टाश्च १२
मुग्धाकलहान्तरिताया उदाहरणम् १२
मध्या ,, ,, ,,
प्रौढा ,, ,, ,,
परकीया ,, ,, ,,
सामान्यवनिता ,, ,, ,,
विप्रलब्धालक्षणम् ,,
विप्रलब्धायाश्चेष्टानिरूपणम् ,,
मुग्धाविप्रलब्धाया उदाहरणम् १३
मध्या ,, ,, ,,
प्रौढा ,, ,, ,,
परकीया ,, ,, ,,
सामान्यवनिता ,, ,, ,,
उत्काया लक्षणम् ,,
उत्काया अवस्थानिरूपणम् ,,
मुग्धोत्काया उदाहरणम् ,,
मध्योत्काया ,, १४
प्रौढोत्काया ,, ,,
परकीयोत्काया ,, ,,
सामान्यवनितोत्काया ,, ,,
वासकसज्जाया लक्षणम् ,,
वासकसज्जायाश्चेष्टानिरूपणम् ,,
मुग्धावासकसज्जाया उदाहरणम् ,,
मध्यावासकसज्जाया ,, १५
प्रौढावासकसज्जाया उदाहरणम् १५
परकीयावासकसज्जाया उदाहरणम् ,,
सामान्यवनितावासकसज्जाया ,, ,,
स्वाधीनपतिकाया लक्षणम् ,,
स्वाधीनपतिकायाश्चेष्टानिरूपणम् ,,
मुग्धास्वाधीनपतिकाया उदाहरणम् ,,
मध्यास्वाधीनपतिकाया ,, १६
प्रौढास्वाधीनपतिकाया ,, ,,
परकीयास्वाधीनपतिकाया ,, ,,
सामान्यवनिता ,, ,, ,,
अभिसारिकाया लक्षणम् ,,
अभिसारिकायाश्चेष्टानिरूपणम् ,,
मुग्धाभिसारिकाया उदाहरणम् ,,
मध्या ,, ,, १७
प्रौढा ,, ,, ,,
परकीया ,, ,, ,,
सामान्यवनिताभिसारिकाया उदाहरणम् ,,
ज्योत्स्ना ,, ,, ,,
कृष्णा ,, ,, ,,
प्रोष्यत्पतिकाया लक्षणम् १८
प्रोष्यत्पतिकायाश्चेष्टानिरूपणम् ,,
मुग्धाप्रोष्यत्पतिकाया उदाहरणम् ,,
मध्याप्रोष्यत्पतिकाया ,, ,,
प्रौढा ,, ,, ,,
परकीया ,, ,, ,,
सामान्यवनिता ,, ,, ,,

अथ द्वितीयतरङ्गस्थविषयानुक्रमणी

नायकनिरूपणप्रतिज्ञा १९
नायकलक्षणम् ,,
नायकभेदनिरूपणम् ,,
अनुकूलनायकस्य लक्षणम् ,,
अनुकूलनायकस्योदाहरणम् ,,
दक्षिणनायकस्य लक्षणम् ,,
दक्षिणनायकस्योदाहरणम् ,,
शठनायकलक्षणम् ,,
शठनायकस्योदाहरणम् २०
धृष्टनायकलक्षणम् ,,
धृष्टनायकस्योदाहरणम् ,,
नायकानां सहायकनिरूपणम् ,,
सहायकानां लक्षणम् ,,
पीठमर्दस्योदाहरणम् ,,
विटस्योदाहरणम् ,,
विदूषकस्योदाहरणम् २१

अथ तृतीयतरङ्गस्थविषयानुक्रमणी

शृङ्गाररसस्य भेदनिरूपणपूर्वकविप्रलम्भ-निरूपणप्रतिज्ञा २२

विप्रलम्भभेदनिरूपणम् २२
उद्दीपननिरूपणम् ,,
पूर्वानुरागस्य लक्षणम् ,,
विप्रलम्भस्य दशावस्थानिरूपणम् ,,
अभिलाषस्य लक्षणम् ,,
अभिलाषावस्थाया उदाहरणम् ,,
चिन्तावस्थानिरूपणम् २३
तदुदाहरणम् ,,
स्मरणावस्थालक्षणम् ,,
तदुदाहरणम् ,,
गुणकीर्तनावस्थालक्षणम् ,,
तदुदाहरणम् ,,
उद्वेगावस्थालक्षणम् ,,
तदुदाहरणम् ,,
प्रलापावस्थालक्षणम् ,,
तदुदाहरणम् ,,
उन्मादावस्थालक्षणम् २४
तदुदाहरणम् ,,
व्याधेर्लक्षणम् ,,
तदुदाहरणम् ,,
जडतालक्षणम् ,,
तदुदाहरणम् ,,

अथ चतुर्थतरङ्गस्थविषयानुक्रमणी

मानावस्थानिरूपणप्रतिज्ञा २५
मानस्य भेदनिरूपणम् ,,
गुरुमानस्योदाहरणम् ,,
मध्यममानस्योदाहरणम् ,,
लघुमानस्योदाहरणम् ,,

अथ पञ्चमतरङ्गस्थविषयानुक्रमणी

प्रवासनिरूपणप्रतिज्ञा २६
प्रवासस्य लक्षणम् ,,
तदुदाहरणम् ,,
वियोगिनीनां कार्श्यादिदशा ,,

अथ षष्ठतरङ्गस्थविषयानुक्रमणी

करुणविप्रलम्भनिरूपणप्रतिज्ञा २७
करुणविप्रलम्भे करुणरसस्य निराकरणम् ७२
तद्भेदाः २७
गतप्रवासात्करुणविप्रलम्भस्योदाहरणम् २७

अथ सप्तमतरङ्गस्थविषयानुक्रमणी

भावहावप्रभेदनिरूपणप्रतिज्ञा २८
भावनिरूपणम् ,,
तदुदाहरणम् २८
हावलक्षणम् २८
तदुदाहरणम् ,,
हेलालक्षणम् ,,
तदुदाहरणम् ,,
लीलालक्षणम् २९
तदुदाहरणम् ,,
विलासलक्षणम् ,,
तदुदाहरणम् ,,
विच्छित्तिलक्षणम् ,,
तदुदाहरणम् ,,
विभ्रमलक्षणम् ,,
तदुदाहरणम्
किलकिञ्चिल्लक्षणम् ,,
तदुदाहरणम् ,,
मोट्टायितलक्षणम् ३०
तदुँदाहरणम् ,,
कुट्टमितलक्षणम् ,,
तदुदाहरणम् ,,
विब्वोकलक्षणम् ,,
तदुदाहरणम् ,,
ललितलक्षणम् ,,
तदुदाहरणम् ,,
विरललक्षणम् ,,
तदुदाहरणम् ,,
व्याजस्तुत्या कविताप्रशंसनम् ,,
श्लोकपादानुक्रमणी ३३-३९

—:०:—

श्रीशौ वन्दे

प्रस्तावना

ब्राह्मीं बिन्दुमयीं वन्दे पराख्यां नादरूपिणीम् ।
विद्याज्योतिस्समुद्दीप्तां प्रतिभोल्लासभास्वराम् ॥
स्रवन्मदघटासक्तसङ्गुञ्जदलिसङ्कुलः ।
लसत्सिन्दूरपूरोऽसौ जयति श्रीगणाधिपः ॥

* * *

नायिकाभेदो रसिकजीवनश्च

उपक्रमः (मूलस्रोतः, नाट्यशास्त्रम्)

यद्यपि साहित्यशास्त्रे नायिकाभेदप्रसङ्गः शृङ्गाररसस्यालम्बनत्वेन परवर्त्तिकाले दृक्पथमवतरति, तथापि भरतनाट्यशास्त्रे विषयोऽयं मूलतः चर्चितः, यत्र हि बीजरूपेण प्रकीर्णोऽयं विषयोऽनेकत्र सन्दर्भे उल्लिखितः। कृत्स्नस्यास्य विषयस्य परिचयस्तु पश्चाद् न्यक्षेण वक्ष्यते। अत्र तु नाट्यशास्त्रीयरसप्रसङ्गे भूमिकारूपमधोलिख्यमानं विवेचनमवधेयम् ।

नाट्यशास्त्रे षष्ठाध्यायतो रसादीनां स्वरूपविवरणादि प्रारभ्यते, ततः पूर्वं पञ्चसु अध्यायेषु केवलं नाट्यशास्त्रीयविषयाणामवतारणायाः पौराणिकी सांस्कृतिकी च भूमिका प्रस्तावना वाऽस्ति, अस्या भूमिकायाः स्वरूपं पश्चाद् वक्ष्यते। इदमत्र वक्तव्यम्—नाट्यशास्त्रे हि नायिकानामन्येषाञ्च नाट्यगतपात्राणां चर्चाः प्रामुख्येण द्वाविंशतितमेऽध्याये, ततः परस्मिन् वा, रसस्तु षष्ठेऽध्याये चर्चितः। तत्र इदम्प्रथमतया प्रमुखतत्त्वरूपो रस इति ।

नायिकानां नायकानाञ्चाहार्याभिनयान्तर्गतत्वमित्येष नाट्यशास्त्रसमयः ।

नाट्यशास्त्रीयविषयावतरणप्रसङ्गे महर्षिणा भरतेन वक्ष्यमाणाः पञ्च पक्षाः सङ्केतिताः—

(क) सङ्ग्रहः
(ख) कारिका
(ग) निरुक्तम्
(घ) रसः
(ङ) भावश्च ।

सन्दर्भेऽत्र रसानां रसाङ्गानाञ्च नामग्राहमुल्लेखः कारिकासु कृतः। तथा च अष्ट रसान्निर्दिशन् भरत आह—

'शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः ।
बीभत्साद्भुतसञ्ज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥
एते ह्यष्टौ रसाः प्रोक्ता द्रुहिणेन महात्मना ॥ इति ।

अत्रेदमाकूतम्—औपनिषदोऽयं खलु राद्धान्तः 'रसो वै सः' इति । एनं सिद्धान्तमुपजीव्य रसस्तावद् आध्यात्मिकभूमिकास्थितः 'ब्रह्माभिन्नः' 'ब्रह्मानन्दसहोदरः' वेति प्रतिष्ठां भजते । पक्षोऽयं किल अर्वाचीनैः आनन्दवर्धनभट्टनायकाभिनवगुप्तपादमम्मटाद्याचार्यैस्समर्थितः, परं भरतसिद्धान्तवर्णितो रसस्तावद् नाट्याश्रितलौकिकानन्दभूमिप्रतिष्ठित आस्वादनरूपः । अदसीयं मूलं हि सांस्कृतिकी मङ्गलकामनापरम्परैव । लोकव्याप्तग्राम्याचारतो मानवसमाजं पृथक्कृत्य सदाचरणाय धर्माचरणाय च प्रेरणैवास्य प्रथमं लक्ष्यम् ।

रसतत्त्वस्यास्यैष महिमा दृश्यश्रव्योभयविधकाव्ये प्रतिष्ठितः पश्चात् । तथा चायं निष्कर्षः—

यद्यपि आख्यानकप्रसिद्धपरम्परानुसारं नाट्ये 'रसतत्त्वस्य' प्रवर्तको द्रुहिण इति महर्षिणा भरतेन व्याहारि, तथापि शास्त्रस्वीकृतसिद्धान्तप्रतिपादनशैल्या रसस्य सर्वप्रथमं निरूपणं नाट्यशास्त्र एव दृश्यते, अतश्च महर्षिभरतोऽयं 'रससिद्धान्तप्रवर्तकः' इत्येव व्यावहारिकी दृष्टिरित्यत्र नाऽस्ति काचिदापत्तिः ।

इति तु जानन्त्युररीकुर्वन्ति च भारतीयसाहित्यशास्त्रानुशीलयितारो यद् भरतेन नाट्याङ्गभूतोऽयं रसप्रस्तावस्योपक्रमः ।

अतश्च तेन त्रयोदशविधानां नाट्यसङ्ग्रहाणामादौ 'रसः' प्राथम्येन निर्दिष्टः, तत्रैव च तेन सह भावाभिनयादयोऽपि पश्चान्निर्दिष्टाः[१] ।

एतत्तु आञ्जस्येन व्याहर्तुं पार्यते यन्नाट्यशास्त्र एषामेव नाट्यसङ्ग्रहभूततत्त्वानां विवेचनं मुख्यं प्रतिपाद्यम्, ततश्च एतेषां साङ्गोपाङ्गविवेचनैः सविस्तरं निरूपणैर्भेदादिकथनैश्च नाट्यशास्त्रस्य महान् विस्तरो जात इति ।

उक्तमेतत्—नाट्यशास्त्रे आदितोऽध्यायपञ्चकं हि केवलं प्रस्तावना भूमिका

१—रसा भावा अभिनया धर्मी वृत्तिप्रवृत्तयः ।
सिद्धिस्स्वरास्तथाऽऽतोद्यं गानं रङ्गश्च सङ्ग्रहः ॥
उपचारस्तथा विप्रा मण्डपश्चेति सर्वशः ।
त्रयोदशविधो ह्येष ह्यादिष्टो नाट्यसङ्ग्रः ॥
द्र० नाट्यशास्त्रम् ६।१०–११ (काव्यमाला ४२, निर्णयसागरसंस्करणम् १९४३)

वा। वस्तुनः तत्र पौराणिकशैल्या नाट्यस्य उद्भवः, विकासः, उपयोगिता, प्रयोजनम्, प्रवर्तनम्, उद्देश्यमित्यादयो विषया निरूपिताः। प्रेक्षागृहम्, रङ्गः, रङ्गदेवता, तत्पूजनञ्चेत्यादिविषया वर्णिता निर्णीताश्च। ततः परं यथाविस्तरं तत्तन्नाट्यानां नृत्यानाञ्च प्रयोगं निरूप्य पूर्वरङ्गविधानं विवेचितम्। एवञ्च अध्यायपञ्चकेऽत्र निर्णीत उक्तो विषयो वस्तुतस्तु नाट्यशास्त्रस्य प्रस्तावनात्मिका भूमिकैव।

शास्त्रस्यास्य मुख्यस्य प्रतिपाद्यवस्तुनो निरूपणं तु षष्ठाध्यायत एव प्रारभ्यते, तत्र च प्रासङ्गिकानां समेषां सिद्धान्तानाम्, तत्सम्बद्धविषयाणां च विवेचनं तात्कालिकविश्वकोषशैलीमनुसृत्य सविस्तरं कृतम्।

ग्रन्थेऽत्र विषयविवेचनपरिधिः तथा व्यापको विशालश्च वर्त्तते यथा तत्र तत्र प्रसङ्गे समग्रं विवेच्यं वस्तु विनिरूपितं जातम्। तत्र न किमप्यवशिष्यते। यथा--षष्ठसप्तमयोरध्याययो रसभावादि महता विस्तरेण व्याख्यातम्। विवेचनस्यास्य विशालताऽनेनैवोन्नेया यत्ततोऽर्वाचीना रसनिरूपका आचार्या महर्षिभरतनिर्दिष्टविचारवारिधिपरिधिवेलामतिवर्तितुं न प्रबभूवुः, अपि तु सर्वे तद्विचारमेवान्वगमन्।

रसाभिव्यक्तेः रसास्वादस्य च पद्धतिम्, तयोर्दार्शनिकीं पृष्ठभूमिं विचारसरणिमाश्रित्य च प्रायस्तरां शास्त्रार्थशैल्या रसो मीमांस्यते। 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति सूत्रस्य व्याख्यासु संयोगपदवाच्यस्य सम्बन्धस्य कल्पनासु च बुद्धिवैभवप्रदर्शनादि चानल्पं सर्वैरकारि। परं शास्त्रानुमोदिततत्त्वचिन्तनविचारेण नवीनप्रमेयपरिचेयपरम्परा सम्भवतो यदा कदैव विकसिता दृश्यते।

एवञ्च महर्षिणा भरतेन रसतत्त्वमिदमुच्चैस्तरां प्रतिष्ठापितमिति हि निष्कर्षः। तेन हि तत्त्वद्वयीमहत्त्वं खलु साभिनिवेशं पुरस्कृत्य प्रकटितम्। तच्च तत्त्वद्वयम्—(क) रसभावादि, (ख) अभिनयश्चेति।

अत्रापि किल द्वयोर्मध्ये 'रसः' एव नाट्ये प्राधान्यं भजते, केन्द्रभूतत्वसर्वाश्रयत्व--मुख्यसाध्यत्व-प्रधानास्वाद्यत्वहेतुभिः, नाट्यस्य प्राणत्वाच्च। रसस्य साधनम्, प्रतिपादनम्, रसनमास्वादनमधिगमनमभिव्यञ्जनञ्च 'अभिनय'-द्वारा एव जायन्ते।

एतत् खलु अभिनयस्य अभिनयत्वम्, यत्तद् ध्रुवमेव कलानुप्राणितम्, यथासम्भवं च लोकाचारस्य यथार्थानुकरणं स्यात्, ततश्च अभिनयोऽयं लोकशास्त्रानुसारी भवेत्। अनुकृति-प्रतिकृत्योरुपयोजनविनियोजनाभ्यामित्थमभिनयस्य प्रयोगो विधेयो येन साध्यसम्पादने साफल्यं जायेत।

यत्खलु नाट्यशास्त्रस्य केन्द्रात्मस्थानीयसाध्यरूपत्वादेव विवेक्तव्यं वस्तु रस-भावादि, तस्यारम्भश्च षष्ठाध्यायस्य रसप्रकरणतो भवति, तत्र कारणं रसभावादिवस्तुनो **मुख्यसाध्यत्वम्।**

रसतत्त्वमिदं तावद् वाचा, अङ्गेन, सत्त्वेन च युक्तैस्तैस्तैरभिनयैर्व्यञ्जितस्य स्थायिभावस्यास्वादनरूपमिति प्राह तत्रभवान् आचार्यभरतः। सुमनसां सहृदयानां (सामाजिकानाम्) प्रेक्षकाणां कृते हि यदा तैस्तैः पूर्वोक्तैर्विशेषैरभिनयोऽत्र आस्वादनीय-कोटिमाटीकते, अनुभूयते च हर्षादि, तदैव ते स्थायिभावा 'नाट्यरसाः' इत्यभिख्यां लभन्ते।[1]

एतदत्र विशेषतोऽवधेयं यच्छ्रीमद्भिर्भरताचार्यैरनुपदं प्रतिपादितस्य तत्त्वस्यैव नाट्यरसात्मकत्वमङ्गीकृतम्, ततश्चायमर्थो निर्गलितो यद्—नाट्यप्रसङ्ग एवाचार्येण रसो विख्यापितः, एवं वाचिकेन, आङ्गिकेन, सात्त्विकेन चाभिनयेन विशेषेण ध्रुव-मुपेतस्य भावाभिनयस्य रसव्यञ्जकत्वमभिहितमिति।

विषयोऽयं खलु बहुभिः प्राच्यैः पाश्चात्त्यैश्च विद्वद्भिर्यथाविस्तरं विचारपथ-मानीतः। अतो हेतोरत्र पुनरुक्तिमविधाय इदमेव निवेदनीयं यदाचार्येण भरतेन यत्तत्त्वं दृश्यकाव्यसन्दर्भ एव नाट्याङ्गभूतमेव च प्रतिष्ठापितम्, तदेव पश्चात् श्रव्यकाव्यस्यापि केन्द्रस्थानीयं तत्त्वमङ्गीकृतं विद्वद्भिरालङ्कारिकैः।

नायिकाभेदाः

यत् खलूपरिष्टाद् रसविषये नाट्यशास्त्रीयनिरूपणस्य प्राधान्यमभिहितं नायिका-भेदविषयेऽपि तत्प्राधान्यं परिलक्ष्यते। एतत् खलु स्पष्टं प्रतिभाति यन्नायिकाभेदस्या-प्युत्पत्तिस्रोतोऽपि नाट्यशास्त्रोपज्ञमेव। ततः प्रारभ्य च अब्दानां पारेसहस्रं समतीत्य हिन्दीसाहित्येतिहासविख्यातरीतिकाले अयमपि विषयो बहुशाखोपशाखादिरूपैः प्रकाममुपबृंहितः।

१—'''नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः, हर्षादींश्चाधिगच्छन्ति तस्मान्नाट्यरसा इत्यभिव्याख्याताः। अत्रानुवंश्यौ श्लोकौ—

यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम्।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः॥
भावाभिनयसम्बद्धान् स्थायिभावांस्तथा बुधाः।
आस्वादयन्ति मनसा तस्मान्नाट्यरसास्स्मृताः।

(द्र० नाट्यशास्त्रम्, काव्यमालासंस्क० अ० ६, पृ० ६६)

आभिजात्यमण्डितेषु विलासप्रियेषु साहित्यरसिकेषु सामाजिकेषु नायिका-भेदो हि रसानुभूतिविभावव्याजेन मनोरञ्जनस्य कलामयं साधनं बभूव। धनिनां विलासिनां हि विलाससाधनेषु नायिकाभेदविषयस्तावत्परं प्रथिमानमभजत। विषयोऽयं काव्यात्मकतया कलामयतया च अन्यविलाससाधनापेक्षयाऽधिकतरं महामहिमानम्, आभिजात्यवर्गीयत्वं च लेभे।

गुप्तशासनसमये हि कृत्स्नेऽपि भारते शास्त्रकाव्यादिपरिशीलनेन साकं रसिक-समाजे क्रीडाविलासभावादयोऽपि अतीव व्यापकरूपेण पर्याप्तमवर्धन्त विद्वद्वर्गेषु पण्डिताभिरूपेषु।

हर्षवर्धनसमये ततः परवर्त्तिशताब्दीषु वैलासिकस्य वृत्तिभावस्य सन्तर्पणप्रवृत्ति-रपि कलात्मकानुरञ्जनमाध्यमेन निरन्तरं नितरामभिवर्द्धते स्म। तदानीन्तना आभि-जात्यवर्गीयसहृदयसामाजिकाः काव्यसाहित्यस्य भावाभिभूतकारिणं काव्यानन्दं निर्वि-कल्पकसविकल्पकविचित्रं समास्वादनं कुर्वन्ति स्म। तदा च रस एव काव्यसर्वस्वरूप-प्राणभूतोऽभवत्। तद्द्वारा शृङ्गारविलासोऽपि परामुन्नतिकाष्ठां भेजे। काव्यजगति प्रविश्यात्मानं विस्मृत्य रसानन्दास्वादनमेव तदा काव्यसर्वस्वमासीत्; परन्तु तदा साहित्यिकानुरञ्जनविधौ संवेदनागाम्भीर्याग्रह एव रसिकत्वस्याधारः स्वीक्रियते स्म।

हर्षवर्धनतः परवर्त्तिकाल एषा प्रवृत्तिः काव्यरसिकताधारभूमिरूपा क्षीणता-मुपगता। शनकैश्च भोजदेवसमये शृङ्गारो भौतिकविलासभाववृद्धया सह रसराजतां भेजे। अत एव शृङ्गारप्रकाशस्य चिन्तनानुगुणदार्शनिकपक्षोद्भावने अचेतनं विलासि मन एव प्रभावि कारणमिति प्रतिभाति। अतः परं पारतन्त्र्यकलुषिते देशे राजानः पण्डिताः कलाविदश्च काव्यानुशीलनद्वारा मनस्तोषं जोषमेव लेभिरे। एवञ्च 'रीति-काले' काव्यस्य कलापक्षे न्यूनता व्याप्ता, वासनापरकसन्तोषप्रवृत्तिरेव वृद्धिं गता। भावनागाम्भीर्यमपहाय मनोरञ्जनैकशरणैः रसिकैर्नारी सङ्केतदासीकृता।

फलतश्च मोहम्मदीयशासनकाले (तथोक्तरीतिकाले च) विगलितवेद्यान्तरस्पर्श-शून्यताकारी रसानुभवः शृङ्गारालम्बनविभावरूपनायिकासम्पृक्तवासनाकेन्द्रितो भूत्वा रसास्वादनस्य दार्शनिकीं भूमिकां तत्याज। भौतिक-शारीरिकविलासभावना-भावितो भूत्वा रसेषु शृङ्गारस्य, तत्रापि चालम्बनविभावस्य, तत्रापि कामोपभोगसहा-यकरूपस्य नायिकाभेदशास्त्रस्य सीमातिक्रामी विस्तारो जातः, विशेषतो लोकभाषा-वाङ्मये।

नायिकाभेदस्यारम्भिकं विवरणम्—

उपर्युक्तविवरणस्योद्देश्यं साहित्यिकानां पुरस्ताद् नायिकाभेदनिरूपणगतदृष्टि-विस्तारभेदपरकविषयस्य समुपस्थापनम्। इत्थं च सूच्यते यद् नाट्यशास्त्रगतो नायिका-भेदपरक उल्लेखः स्पष्टतो दृश्यकाव्येनाभिनयेन चानिवार्यतः सबद्ध आसीत्। यत्तु हिन्दीभाषायां रीतिग्रन्थेषु नायिकाभेदोल्लेखः, तन्मूलं यद्यपि नाट्यशास्त्रमेव, परम-भिनयोपकारित्वेन न, अपि तु शृङ्गारानुगुण्येनेति।

धनञ्जयरुद्रटयोः सिद्धान्तवैभिन्न्यम्—

पश्चात्कालिककाव्यशास्त्रोक्तनायकनायिकाभेदास्तु भरतोक्तनाट्यशास्त्रीयभेदेभ्यो मनाग् भिन्नाः परिलक्ष्यन्ते। नायिकाभेदस्य साम्प्रतिकी शैली रुद्रटीयकाव्यालङ्का-रम्, धनञ्जयीयदशरूपकम्, रुद्रभट्टीयशृङ्गारतिलकञ्चानुहरति। शृङ्गारतिलकोऽयं दशरूपकतोऽपि प्राचीनतर इति केचित्, परं नात्र दृढ़तरं प्रमाणं पश्यामः। अस्तु तावत्, विषयोऽयं पश्चाच्चर्चामर्हति। अत्र त्वेतदेवानुसन्धेयम्—शृङ्गारतिलकीयश्लोकानां ग्रन्थान्तरेषु दर्शनान्न किल किमपि निर्णयास्पदमारोढुमीष्टे। एतत्तु निश्चितम्—शृङ्गार-तिलकोऽयं काव्यानुशासन-शार्ङ्गधरपद्धति-साहित्यदर्पणेभ्यः पूर्वकालिक इति। परम-थापि भरताचार्यतः परम्, आचार्यधनञ्जयेनेव नायिकाभेदाः प्रौढ्या शैल्या निरूपिताः। सा च शैली ततः परेषामाचार्याणां नायिकाभेदव्याख्यातॄणामुपजीव्यत्वं गता। प्रसङ्गोऽयं पश्चाद् विस्तरेण वक्ष्यते।

दशरूपकग्रन्थश्चतुःप्रकाशात्मकः। तत्राद्ये—साङ्गोपाङ्गं वस्तु (कथावस्तु) विवेचितम्। द्वैतीयीके नायकनिरूपणप्रसङ्गे नायिकाभेदास्तत्सम्बद्धविषयाश्च प्रपञ्चिताः। तार्तीयीके नाट्यानुषङ्गिकविषयान्तराणि विवेचितानि। तुर्ये च रसः, रसाङ्गानि, तन्निष्पादनप्रक्रियादि प्रौढसरण्या निरूपितम्। सन्दर्भेऽत्र नायिकाभेदास्ता-वन्नैव शृङ्गारालम्बनरूपमवलम्ब्य चतुर्थप्रकाशे कृताः; अपि तु नेतृभेदनिरूपणमव-लम्ब्य कृता इति यत्किञ्चिदेतत्तत्, पश्चात्तु साडम्बरं वक्ष्यते। अस्तु—एतत्तु न विस्मर्तव्यम्, 'रीतिकालिकम्' नायिकानिरूपणं हि विलासमनोरञ्जनादिप्रेरितम्, परं दशरूपके तु शास्त्रीयपक्ष एव सविशेषं व्याहृतः।

परं रुद्रभट्टस्य शृङ्गारतिलकस्तु 'रीतिकालिक'—मनोवृत्तिसाम्यं प्रकाममाद-धाति। यत्र समये नारीणां कोमलता, जन्मगतं रामणीयकम्, अबलता विवशता च सर्वैः स्वीकृतम्, तत्र शृङ्गारतिलकरचनाऽजायतेति। नारी च अबला कामिनी रमणी वा अमन्यत। ततश्च नारी हि विलासशृङ्खलाबद्धा सती विलासकारापिहिता बभूव।

पुरुषाणां कृते सा विलासस्य साधनभूताऽभूतेति। अतश्च शृङ्गारतिलके शृङ्गार-मनोरञ्जनमतीव स्फुटम्। अनेनैव विद्वद्गोष्ठीषु काव्यं प्रकामं प्रतिष्ठामभजत[1]।

शृङ्गारतिलकग्रन्थे परम्परामनुसृत्य रसप्रामुख्यमुद्घोष्य रुद्रभट्टो रस-स्थायिभाव-सञ्चारिभावादीनां नामग्राहं गणनां विधाय संक्षेपेण नायकनिरूपणं सम्पूर्य, सरभसं धावं धावमिव काव्यनायिकानिरूपणप्रसङ्गे व्यग्रतामभजत्। किञ्च, तत्रैव स रंरम्यत इव। ततस्तत्र तदानीन्तनमाभिजात्यसमाजमनुकूलयन् तन्मनोवृत्त्यनुगामितया नायिका-शृङ्गारविषयांश्च परिच्छेदयुगले यथाविस्तरं यथोदाहरणं विभज्य निरूपयति। तत्परिपाटीमनुसरता एव तेनेदमपि साग्रहमभ्यधायि यत् पूर्वोक्तशृङ्गारविषयमुपजीव्यैव काव्यं रचनीयम्, अन्यथा नीरसत्वापत्तिः स्यात्[2]। अहो, ग्रन्थकर्त्तुः शृङ्गारपारतन्त्र्यम्। ग्रन्थकारस्तावद् रसमेनं प्रधानं रसराजमङ्गीकुर्वन् काव्ये तन्निवेशस्यापरिहार्यतामाचष्टे। एषैव प्रवृत्ती रीतिकालेऽपि परिलक्ष्यत इति।

शृङ्गाराभिभूतपूर्वोक्तमनोवृत्तिप्राबल्याधीनतया श्रव्यकाव्येष्वपि रसस्यापरिहार्यतां परिख्यापयन् रुद्रभट्टेनोक्तं यद् भरतादिभिराचार्यैर्दृश्यकाव्येष्वेव रसस्थितिरुररीकृता। मया तु स्वमत्यनुसारं श्रव्येष्वपि सा संयोज्यते[3]।

अतश्चात्रैतद् व्याहर्त्तुं प्रभवामो यत्—

'रीतिकाल'-स्वीकृतानां नायिकाभेदानां मूलं हि भरतनाट्यशास्त्रम्, सुशृङ्खलः खलु तद्विस्तरो दशरूपके, शृङ्गारतिलके च तदीयप्रेरणामूलकवासनानुप्राणितमनोवृत्त्याः साटोपं रूपं दृश्यते। अधिकन्तु नाट्यशास्त्रे दृश्यश्रव्यकाव्यानां सर्वस्यापि विचारजातस्य मूलं सन्निहितम्[4]।

१—तस्माद्यत्नेन कर्तव्यं काव्यं रसनिरन्तरम्।
अन्यथा शास्त्रविद्गोष्ठ्यां तत्स्यादुद्वेगदायकम्॥ (द्र०-शृ० ति० १।८)

२—इत्थं विरचनीयोऽयं शृङ्गारः कविभिः सदा।
अनेन रहितं काव्यं प्रायो नीरसमुच्यते॥ (शृ० ति० २।६६)

३—प्रायो नाट्यं प्रति प्रोक्ता भरताद्यैः रसस्थितिः।
यथामति मयाप्येषा काव्यं प्रति निगद्यते॥ (शृ० ति० १।५)

४—रसः, भावः, अभिनयः, अङ्गचेष्टाः, नृत्यम्, चारी, नाट्यवृत्तयः, भरतनाट्यम्, चित्राभिनयः, सिद्धिव्यञ्जनम्, वाद्यविधानम्, सङ्गीतविधानम्, ध्रुवपदविधिः, वाद्याध्यायः, चतुर्विधाभिनयः, सम्भाषणविधिः, नाटकाङ्गपरिचयः, लास्यम्, साङ्गेतिवृत्तम्, वृत्तिः, नायिकानिरूपणम्, प्रकृतिविचारः, छन्दोविचारः, काव्यस्य गुणदोषाः, उपमादीपकाद्यलङ्काराः, संस्कृत-प्राकृतापभ्रंशादिभाषाणामुल्लेखश्च।

नाट्यशास्त्रस्येदं मौलिकं तत्त्वमनुध्यायता डा० हजारीप्रसादद्विवेदिमहोदयेनापि 'हिन्दी साहित्य की भूमिका' ग्रन्थे 'नायिकाभेदस्य' चर्चाप्रसङ्ग इदमुदलेखि यत्—'पश्चात्कालिकानि समस्तनायिकाभेदशास्त्राणि नाट्यशास्त्रस्यैकाङ्गस्य सार्वजनीनं भाष्यमात्रम्। तत्र च नायिकाभेदा नाट्यशास्त्रीया एव, तद्व्यवहारपक्षश्च कामशास्त्रगत इति'। द्विवेदिमहोदयानां वचसस्तात्पर्यार्थबोधाय नाट्यशास्त्रतः पश्चात्कालिकेषु प्राथमिककाव्यशास्त्रेषु प्राप्तानामेतदीयसिद्धान्तानामनुशीलनमवश्यकर्तव्यम्[1]।

संस्कृतकाव्यशास्त्रे नायिकाभेदोपकरणानि नाट्यशास्त्रञ्च—

इतिवृत्तगतानि सन्ध्यङ्गानि निरूप्याचार्यभरतो विंशतितमाध्याये भारती-सात्वती-कैशिक्यारभटीत्याख्यं वृत्तिचातुर्विध्यं निरूपितवान्। उक्तानां वृत्तीनां परिचयप्रसङ्गे तेनेत्थं चर्चितम्—

पुनर्नाट्यप्रयोगे च नानाभावरसान्विता।
वृत्तिसञ्ज्ञा कृता ह्येषा नानाभावरसाश्रया॥

एतेन सूच्यते यद् वृत्तयो हि भावरसयोराश्रिता इति भरतसङ्केतः, निरूपयंश्चैता आङ्गिकवाचिकसात्त्विकाहार्यरूपमभिनयचातुर्विध्यवैशिष्ट्यमपि निरूपितवान्। तत्र आहार्याभिनयप्रसङ्गे नाट्योपकरणचर्चा विदधद् भरतो दिव्या-मानुषीप्रभृतिनायिकाः, उत्तममध्यमाधमांस्तद्भेदांश्चोल्लिलेख। किञ्चात्र प्रसङ्गे तेन वागङ्गसत्त्वजन्योऽभिनयः सामान्याभिनयोऽस्तीत्यपि कथितम्। प्रकरणेऽत्रैव शृङ्गारोऽपि चर्चितः—

यः स्त्रीपुरुषसंयोगो रतिसम्भोगकारकः।
स शृङ्गार इति ज्ञेयो ह्युपचारकृतः शुभः॥

१—एतत्खलूपरिष्टाद् वर्णितमस्ति यन्नाट्यशास्त्रीयनायिकाभेदचर्चाप्रसङ्गे भरतोक्तानां नायिकानां भेदा भेदकभेदाद् भिद्यन्ते। तासां वर्गीकरणं नानाधारमूलम्। यथा—मनःकाययोनिभेदान्नायिकाभेदः' इति प्रथमः कल्पः।
रुचि-शील-प्रभृतिभेदादिति द्वितीयः कल्पः। भोजनाच्छादनवेशभूषाशृङ्गारादिभेदादिति तृतीयः कल्पः। ऐष्वेव केचन भेदाः कामशास्त्रीये नायिकाभेदनिरूपणे चतुर्विधभेदानां प्रेरकहेतव इति बोध्यम्।

अत्रेदं साग्रहमवधेयम्—

कामशास्त्रीयग्रन्थेषु विशेषतः कोकप्रणीते कामशास्त्रे यत्खलु लोकप्रियम्—पद्मिनी-शङ्खिनी-चित्रिणी-हस्तिनीत्याख्यं नायिकाचातुर्विध्यमुपलभ्यते, नैतत् खलु वात्स्यायनीयकामशास्त्रे दृश्यते। तत्र नायकस्य नायिकायाश्च त्रैविध्यमेतदुक्तम्—शशः, वृषः, अश्वः, अन्यत्र मृगी, वडवा, हस्तिनी। इति।

सर्वः प्रायेण लोकोऽयं सुखमिच्छति सर्वदा ।
सुखस्य च स्त्रियो मूलं नानाशीलधराश्च ताः ॥

(द्र० भरतनाट्यशास्त्रम्–२२।९३–९४)

सन्दर्भेऽस्मिन् स्त्रीणां सुखमूलत्वं प्रोक्तम्, 'नानाशीलधराश्चैता'इत्यपि भणितम्। शीलचर्चापि चाग्रे तत्रेत्थमस्ति–

देवतासुरगन्धर्वरक्षोनागपतत्त्रिणाम् ।
पिशाचऋक्षव्यालानां नरवानरहस्तिनाम् ॥
मृगीमीनोष्ट्रमकरखरसूकरवाजिनाम् ।
महिषाजगवादीनां तुल्यशीलाः स्त्रियः स्मृताः ॥

अत्र देवशीलाङ्गनासुरशीलाङ्गनेत्यादिद्वाविंशतिभेदा नायिका उक्ताः। अत्र तत्तद् योनिषूत्पन्नानां जीवानां शीलचरितान्यपि उक्तानि, येन तत्तच्छीलानां नायिकानां लक्षणं स्पष्टं भवेत्। नैतादृग् विभाजनं पश्चात्कालिकेषु साहित्यशास्त्रग्रन्थेषु परिलक्ष्यते। अत्रायं हेतुरनुमीयते–'कदाचिन्नैते भेदाः शीलाश्रिताः साहित्यशास्त्रमुपकुर्वन्ति, अपि तु कामशास्त्रमेवेति मन्वानैर्विचारकैः शीलविभाजनमिदमत्याजि।

कोक्कोककृते रतिरहस्ये, ततः पश्चात्कालिके कामशास्त्रग्रन्थेऽपि एतेषां भेदानां चर्चा दृश्यते। रतिरहस्ये तूपर्युक्तभरतीयभेदानां गन्धमात्रमनुभूयते, तत्र अनेके भेदाः परित्यक्ताः, अपरत्र काकसत्त्वेति नवीनो भेदो दृश्यते।

स्त्रीपुंसावाश्रित्य नाट्यधर्मिणः कामोपभोगस्य भेदद्वैविध्यं निर्दिशन् पुनरग्रे अङ्गनायास्त्रयो भेदास्तत्रेत्थमुक्ताः—

(क) बाह्या (ख) आभ्यन्तरा (ग) बाह्याभ्यन्तरा चेति।

तत्र कुलीना आभ्यन्तरेति कथिता। अस्य तात्पर्यं सम्भवतः 'कुलवधूः' अर्थात् स्वीयेति प्रतिभाति। बाह्या तु वेश्या सामान्या वेति स्पष्टमेव। बाह्याभ्यन्तरा तु कृतशौचेति कथिता, यदर्थो नावगतः। अत्र पाठभ्रंशोऽनुमीयते। यद्वा—नाद्यत्वेऽस्यार्थोऽवगम्यते। 'कुलम् अपावयित्री' अयमर्थोऽस्यासीदिति सम्भावयितुं शक्यते।

एतेन सूच्यते यद् व्याहृतैर्व्याहरिष्यमाणैश्च हेतुभिः सुस्पष्टं सिद्धमेतद् यन्नाट्यशास्त्रे नायिकानिरूपणं नानादृष्टिभिर्विविधपक्षतश्चाजायत। तत्रभवान् भरतो नाट्यस्याभिनयस्य च विविधस्थितिप्रयोजनानुरूपं तत्तद्दशानुगुणं नायिकानामङ्गनानां च निरूपणं क्रियासमभिहारेण अनेकप्रसङ्गेषु अनेकरूपैश्च कृतमिति। तथाहि—

कुत्रचित् प्रकृतिमाश्रित्य उत्तमाधगमध्यमा गुणधर्ममाश्रिता, अन्यत्र नायिकाभेदा

उक्ताः। अत्रैव प्रकरणे राजोपचारनिरता महादेवीदेवीप्रभृतिनार्योऽपि[1] अन्तःपुरमूलिका निरूपिताः।

कुत्रचित्तु—धीरोद्धत-धीरललित-धीरोदात्त-धीरप्रशान्तात्मकनायकचातुर्विध्यानुगुणं दिव्या-नृपपत्नी-कुलस्त्री-गणिकारूपनायिकाचातुर्विध्यमपि उल्लिखितम्। एतासां प्रकृतिलक्षणानुरूपा धीरा-ललितोदात्ता-निभृतारूपभेदचतुष्टय्यपि तत्रैव वर्णिता। एतद्भेदचतुष्टयी च (पश्चात्कालिकेषु नाट्यशास्त्रीयग्रन्थेषु यत्रतत्र) उपलभ्यत इति।

प्रकरणेऽत्र प्रसङ्गवशात् कुलजा-गणिका-प्रेष्यादयोऽपि सपरिचयमभिहिताः। नायिकानामेतद्भेदत्रितयी तथा इतिहासदिशा महत्त्वमावहति, यथा परकालिकसाहित्येषूक्तनायिकाभेदस्यैषा मूलप्रेरणा स्वीक्रीयेत।

अतः परं यैराचार्यैः नायिकाभेदग्रन्थलेखकैः, स्वकीया-परकीयादिनामभेदमुपजीव्य नायिकाभेदाः साटोपं निरूपिताः, नायिकाभेदपरकविस्तृतप्रौढरूपस्य च यः किल मूलाधारः प्रतीयते तन्मूलमेतस्मिन् भरतकृतप्रासङ्गिकनायिकाभेद एवेति सम्भाव्यते। कुलजावेश्या-प्रेष्यादिभेदा अपि भरतेन प्रसङ्गान्तरे चर्चिताः। अग्रे सैव

१—कामोपभोगो द्विविधो नाट्यधर्मे विधीयते।
बाह्यश्चाभ्यन्तरश्चैव नारीपुरुषसंश्रयः॥
आभ्यन्तरः पार्थिवानां कर्तव्यः स च नाटके।
बाह्यो वेश्याङ्गनानां तु स च प्रकरणे भवेत्॥
त्रिविधा प्रकृतिस्त्रीणां नानासत्त्वसमुद्भवा।
बाह्या चाभ्यन्तरा चैव स्याद् बाह्याभ्यन्तरा परा॥
कुलीनाभ्यन्तरा ज्ञेया बाह्या वेश्याङ्गनाकृते।
कृतशौचा च या नारी सा बाह्याभ्यन्तरा स्मृता॥
(द्र० नाट्य० २२। काव्यमाला १४१)

१—स्त्रीविभागं प्रवक्ष्यामिह्युपचारं तथैव च।
महादेवी तथा देवी स्वामिनी स्थायिनी तथा॥
भोगिनी शिल्पकारी च नाटकीयार्थनर्तकी।
अनुचारी तथा युक्ता तथा च परिचारिका॥
तथा सञ्चारिणी चैव तथा प्रेषणकारिका।
महत्तरा प्रतीहारी कुमारी स्थविरा तथा॥
आयुक्तिकास्तु भूपानामेष आभ्यन्तरो गणः।
.... ।
एतदष्टादशविधं प्रोक्तमन्तःपुरं मया॥
(द्र० ना० अ०—२४।५४–५७)

प्रेष्या सामान्यरूपेण दूतीति कथिता। परमिदमपि सम्भाव्यते यत् 'परकीया' विचार-स्यापि बीजमेतस्मिन्नेव सन्दर्भे स्यात्।

सन्दर्भान्तरे च 'लुब्धा-पण्डिता-चतुरा-भामिनी-पुरुद्वेषिणी-बाला-गर्वितोदात्तादि-भेदा उक्ताः। सङ्गमप्रसङ्गे भेदकगुणधर्मावनुसृत्य विरक्ताऽनुरक्तेति भेदद्वयी अप्युक्ता। दृष्टिबिन्दुभेदात् तत्तत्प्रसङ्गेषु बारं बारमुत्तममध्यमाधमेति त्रिभेदाः कथिता वर्त्तन्ते। नाट्यशास्त्रे (द्र०-काशी-संस्कृतसीरिज-६०) तु शीलवैविध्यादपि इमे भेदाः पुनः नामग्राहं सलक्षणमुपपादिताः। तत्रैवाग्रे प्रकृत्यनुसारमपि उत्तमादिभेदाः सलक्षणं विवृताः, केचन भेदा कर्मानुसारिणोऽपि तत्रोक्ताः।

मुग्धा-मध्या-प्रौढाः—

'रीतिकालिक'–नायिकाभेदसाहित्ये स्वीयानायिकानां मुग्धा, मध्या, प्रौढा (प्रगल्भा) इति त्रिभेदानां यल्लक्षणं रूपासवमदमुग्धैः रसाब्धिमवगाह्य विलासभावनावशीभूतैः भावतरङ्गविह्वलैराचार्यैः कविभिश्चित्रितं तस्य मूलं नाट्यशास्त्रमेव। परं या खलु प्रकारान्तरेण नाट्यस्य अभिनयस्यानुकूला समग्रा सामग्री प्रकरणान्तरे व्यवस्थितपरिधौ व्यवस्थाप्य निरूपिता, सा तु रसनिरूपकाचार्यैः पश्चात्कालिकैः शृङ्गारालम्बनपरिधि-मध्ये प्रतिष्ठाप्य नायिकायाः भेदा चिराय निर्धारिता इति।

क्रमिकसोपानेषु महर्षिणा भरतेन अङ्गनानामुत्तममध्यमाधमचर्चानुषङ्गे नायि-काया यौवनमपि चतुर्धा विभक्तम्—(क) प्रथमयौवनम्, (ख) द्वितीययौवनम्, (ग) तृतीययौवनम्, (घ) चतुर्थयौवनञ्च[1]।

प्रथमयौवनस्य यौवनलाभस्य प्रथमावस्थाया वा पर्यायभूतोऽयं नवयौवन-शब्दोऽपि उक्तः। यौवनलाभस्य यौवनक्रमस्य वा इमाश्चतस्रो दशाः सन्ति। तत्र मुग्धा-मध्या-प्रौढा इति नायिकानामवस्थाः, न तु तत्त्वतस्तासां भेदाः। इमा एव सहृदयानां मनोरञ्जिका नायिका नायिकाभेदग्रन्थेषु साहित्यरसिकजनेषु च मधुर-तमरूपिण्यः सत्यः प्रमोदमावहन्ति। चतुर्थयौवनं तावत् शृङ्गारशत्रुभूतमिति मत्वा नेदं मनोरञ्जकमिति च भरतेन तिरस्कृतम्, अतो न सहृदयहृदयमारोढुमोष्टे। ततश्च परकालिकसाहित्येषु नैतादृशाया गलिततारुण्याया नायिकायाः कैरपि नामापि गृहीतम्।

१—सर्वासामपि नारीणां यौवनलाभा भवन्ति चत्वारः।
नेपथ्यरूपवेषैर्गुणैस्तु शृङ्गारमासाद्य॥ (द्र० नाट्यशास्त्रम् २३।४०)

प्रसिद्धा अष्टधा नायिकाभेदाः

नाट्यशास्त्रे हि नायिकानां सलक्षणास्ते अष्टभेदा अपि विव्रियन्ते, ये हि उपरिष्टात् 'रीतिकाले' सविस्तरं निरूपिताः। महर्षिणा भरतेन नायिकानां किलाष्टभेदा उक्ताः–(१) वासकसज्जा, (२) विरहोत्कण्ठिता, (३) स्वाधीनपतिका, (४) कलहान्तरिता, (५) खण्डिता, (६) विप्रलब्धा, (७) प्रोषितभर्तृका, (८) अभिसारिका चेति लक्षणोक्तिपूर्वकाणां भेदानाञ्चैतेषां मूलं त्ववस्थैवेत्यप्युक्तम्। (द्र०-नाट्यशास्त्रम्--२२।२०३-२०४, काव्यमालासंस्क०)। तत्रैव चेमे नायिकाभेदा नाटकाश्रया इत्यप्युक्तम्--

'आस्ववस्थास्तु विज्ञेया नायिका नाटकाश्रयाः'। इति।

ततश्च स्पष्टमेतत्—अदर्सीयोऽपि सम्बन्धः पूर्वोक्तसामान्याभिनयेनैवेति। तथा च संक्षिप्य पूर्वोक्तानामर्थानामेष निष्कर्ष :--

(क) काव्यशास्त्रीयनायिकाभेदानां नाट्यशास्त्रमेव मूलस्रोतः। यतस्तत्रैव ऐदम्प्राथम्येन स्वीया-परकीया-सामान्याः, मुग्धा-मध्या-प्रगल्भाः, वासकसज्जाद्यष्टविधनायिकाश्च साक्षात्परम्परया वा सम्यग्वर्णिताः सन्तिः। परवर्त्तिसाहित्येषु तस्यैव प्रसारो विस्तरश्चाभवत्।

(ख) नाट्येन सामान्याभिनयेन च नायिकानिरूपणं साक्षात् सम्बद्धम्।

(ग) नाट्यशास्त्रे हि श्रृङ्गाररसस्य तस्याङ्गोपाङ्गस्य च महिमा सङ्केतितोऽपि नाट्याभिनययोरेव प्रसङ्गे तदौचित्यं प्रतिपादितम्।

(घ) नाट्याभिनययोः प्रसङ्गे नायिकानामितरेऽपि एतादृशा भेदा निर्दिष्टा, येषामनुपयोगित्वमवगम्य पश्चादुपेक्षिताः।

(ङ) नायिकाभेदाः साक्षात् श्रृङ्गाररसावलम्बनरूपेण न चर्चिताः।

किञ्च कामतन्त्रमपि क्रियासमभिहारं नामग्राहं चर्चितम्। अतश्चैतदपि सूच्यते-भरतोक्ततत्तद्विवरणेषु कामशास्त्रीयसिद्धान्तप्रभावः प्रकामं वर्वर्ति।

ग्रन्थान्तरेषु नायिकाभेदाः

(अग्निपुराणे, काव्यालङ्कारे, श्रृङ्गारतिलके च)

अग्निपुराणे श्रृङ्गारतिलके च; इमौ एतादृशौ ग्रन्थौ यत्र आलम्बनविभावान्तर्गतं नायिकानायकभेदनिरूपणं किमपि नावीन्यमाधत्ते।

श्रव्यकाव्यप्रसङ्गेऽपि रसस्यापरिहार्यत्वं महत्त्वं श्रीरुद्रटेन ऐदम्प्राथम्येन स्वी-

कृतम् । अतस्तेन स्वोपज्ञकाव्यालङ्कारग्रन्थे श्रव्यकाव्यस्य रसयोजनासमन्वितत्वमावश्यकम् इत्यभ्यधायि—

तस्मात्तत् कर्तव्यं यत्नेन महीयसा रसैर्युक्तम् ॥ (काव्यालङ्कार० १२।२)

तेनैव च तत्र शान्तस्य नवमरसत्वम्, स्नेहस्थायिभावात्मकप्रेयोरसस्य दशमरसत्वं वर्णितम् । परं तथापि नायकस्य नायिकायाश्चालम्बनरूपप्रतिष्ठाविषये न तेन किमपि स्पष्टं निर्दिष्टम् । तेन हि 'तत्र स्यान्नायकः ख्यातः' इति व्याहरता श्रृङ्गारस्याधारभूतौ नायिकानायकौ च स्वीकृतौ, तद् भेदाश्च सङ्क्षिप्य निरूपिताः, परं नायकादीनामालम्बनत्वमवलम्ब्य सुस्पष्टं रसप्रसङ्गस्य तत्र नोल्लेखः ।

अग्निपुराण ऊनचत्वारिंशदुत्तरे त्रिशत्तमाध्याये—

विभाव्यते हि रत्यादिर्यत्र येन विभाव्यते ।
विभावो नाम स द्वेधाऽऽलम्बनोद्दीपनात्मकः ॥
रत्यादिर्भाववर्गोऽयं यमाजीव्योपजायते ।
आलम्बनविभावोऽसौ नायकादिभवस्तथा । (३५-३६)

उपर्युक्तमुक्त्वा आलम्बनविभावकारणरूपेण नायका नायिकाश्चानिर्दिष्टाः । अग्रेऽपि—

स्वकीया परकीया च पुनर्भूरिति कौशिकः ।
सामान्या न पुनर्भूरित्याद्या बहुभेदतः ॥ (अग्नि० ३३९।४१)

एतस्मिन् पद्ये च 'स्वीया' 'परकीया' 'पुनर्भूः' इति तिस्रो नायिका नामग्राहं गृहीताः ।

अत्र किञ्चित्—सत्स्वपि एषु विशेषेष्वाग्नेयपुराणस्य प्राचीनत्वं विवादकोटिमाटीकते, अतश्च नेदं पुराणं तादृङ् महत्त्वं भजते । एतत्तु सारभूतं यद् भारतीयविश्वकोषरूपस्यास्य ग्रन्थस्य सङ्ग्रहो महता कालेन सम्पन्नः ।

महाराजभोजदेवकृते सरस्वतीकण्ठाभरणे श्रृङ्गारप्रकाशे वा पुराणस्यास्य सिद्धान्तार्थसन्निवेशः, श्रृङ्गारप्राकर्ष्ये तदाभासता च नास्य पुराणस्य पूर्णतः प्राचीनत्वं साधयितुमीशाते । अतो नायकस्य नायिकाया वा भेदविषये तत्पुराणोक्तमालम्बनसाहित्यं किमपि मौलिकत्वमावहतीति नास्ति निश्चयस्थानम् ।[१] एतदनुमीयते कैश्चिद्यत्सम्भवतः

१—'अग्निपुराण का काव्यशास्त्रीय भाग' नामको हिन्दीग्रन्थो वर्तते, यत्र अग्निपुराणगताः साहित्यशास्त्रीयविषया न्यक्षेण विवेचिताः ।

अग्निपुराणस्योक्तोंऽशो भोजपरवर्त्तिकालरचित इति। एतदपि प्रतीयते यत् पुनर्भू-नायिकारूपभेदस्य स्रोतः कामशास्त्रीयमासीत्।

परं शृङ्गारतिलकग्रन्थे कृतं कृत्स्नमपि विवेचनं प्रकामं तथा स्पष्टं वर्तते, यथा रुद्रभट्टकालो यदि असन्दिग्धरूपेण निर्णीतो भवेत्, तर्हि नायिकाभेदविषये यत्किमपि पश्चात्सिद्धान्तितम्, तन्मूलं शृङ्गारतिलक एवेति वक्तुं पार्यते।

ग्रन्थस्यास्य प्राचीनत्व-नवीनत्वविषये अन्तःसाक्ष्याधारेण किमपि यथाप्रमाण-मुपरि सङ्केतितम्। किञ्च, प्रमाणान्तरेणापि कलिकालसर्वज्ञश्रीहेमचन्द्रसूरितः पूर्वं शृङ्गारतिलकस्थितिः सप्रमाणा भवति, तथाहि--श्रीहेमचन्द्रेण शृङ्गारतिलकीयमाङ्ग-लिकपद्यमुद्धृत्य तत्खण्डितम्।[1] ततश्च सिद्धमेतद् यद् द्वादशतमशताब्द्याः पूर्वार्धतः पूर्वमेव ग्रन्थोऽयं निर्मितः, परमेवमपि दशरूपकतः पूर्वं रचनाऽस्य जातेत्यत्र नास्ति दृढं प्रमाणम्।

एष किलानुमानविषयो यद्--भरतनाट्यस्य व्याख्याया अभिनवभारत्याः, ध्वन्यालोकलोचनस्य च कर्तृभ्योऽभिनवगुप्तपादेभ्यो दशरूपकस्य च कर्तृभ्यो धनञ्जयेभ्यश्च (यौ द्वौ प्रायःसमकालिकौ) पश्चात् शृङ्गारतिलकरचना जातेति।

रुद्रटो रुद्रभट्टश्च—

एतत्तु काव्यालङ्कारशृङ्गारतिलकयोरनुशीलनेन निश्चीयते यत्—शृङ्गारतिल-कीयं कृत्स्नमपि प्रतिपाद्यं वस्तु रुद्रटकृतकाव्यालङ्कारस्य द्वादशाध्यायतः पञ्चदशाध्याय-पर्यन्तस्यांशस्य पुनराख्यानमात्रमस्ति, न किञ्चित्तत्र नवीनत्वम्। श्रव्यकाव्येषु रसस्या-परिहार्यता सरसतोपपत्तये रुद्रटेन प्रवर्तिता। रुद्रभट्टेनाप्येतदेवानूदितम्। रुद्रभट्टस्य च रुद्रटापेक्षयाऽर्वाचीनत्वेन किं नामात्र नूत्नम्। इत्थमेव शृङ्गारस्य विस्तृतं वर्णनम्, नायकनायिकाभेदविमर्शः, तद्विस्तरश्चेति सर्वमपि रुद्रटस्य पन्थानमेवानुहरति।

किञ्चान्यदपि—

श्रव्यकाव्येष्वपि नाट्यशास्त्रीयप्राचीनशैलीदिशा एव नायकनायिकानां प्रस्तुतिः दर्शिता। उभावपि स्पष्टतः शृङ्गारप्रसङ्ग एव नायकाद्यवतरणं निरूपितवन्तौ।

एतदेव तत्रोक्तं यत् शृङ्गारस्य संयोगविप्रलम्भरूपभेदद्वयी भवति, यत्र हि प्रणयानुरक्तस्त्रीपुंसयोः प्रणयपूर्वव्यापारवर्णनं भवति।

१—'रसादेः स्वशब्दोक्तिः'....इत्यादिसन्दर्भे रसादिपदं स्वशब्दाभिधानदोषस्योदाहरणे शृङ्गार-तिलकीयमङ्गलाचरणपद्यमुद्धृतम्।

अत्र गुणौत्तम्यविशिष्टनायकानां चातुर्विध्यं नायिकास्तु त्रिविधा एवोक्ताः-(क) आत्मीया, (ख) परकीया, (ग) सर्वाङ्गना[1]।

यत्तु विभावनिरूपणे शृङ्गारालम्बने नायिकाभेदा रुद्रभट्टेन ऐदम्प्राथम्येन निरूपिता इति केचित्, तत्तु सर्वथा भ्रान्तिमूलकमेव प्रतिभाति।

अत्रेदं तत्त्वम्—भरतेन नाट्यशास्त्रे विभावानुभावादीनां लक्षणं न वर्णितम्, किन्तु तत्र तेन कथितं यल्लोकसिद्धत्वात्तेषां लक्षणकथनमनावश्यकमिति। तथा च तदुक्तिः-'लोकस्वभावोपगतत्वाच्चैषां लक्षणं नोच्यते' इति। 'परमथापि—विभाव इति कस्मादुच्यते। विभावो विज्ञानार्थः। विभावः कारणं निमित्तं हेतुरिति पर्यायाः। विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इति विभावाः। यथा विभावितं विज्ञातमित्यनर्थान्तरम्…' इत्युक्तम्। एतेन तेन विभावो व्याख्यातः, परन्तु तत्रालम्बनविभावस्य तस्य भेदोपभेदानां वा साक्षादुल्लेखो नाकारि।

बहोः कालादनन्तरं सम्भवतो भट्टनायकाभिनवगुप्तधनञ्जयादिभिः प्रमाणानुगतैः प्रमेयैः ससाहित्यिकाभिनिवेशं रसास्वादनविधिः विस्तरपूर्वकं साङ्गोपाङ्गं निरूपितः।

नायिकाभेदविषये तु इदमुक्तमेव यद् दशरूपकीयो विमर्शः प्रकामं प्रतिष्ठां महत्त्वं च भजते। अभिनवगुप्तपादैककालिकत्वेन धनञ्जयस्य प्राचीनत्वमपि सुष्ठु पर्यवस्यति तद्विमर्शोऽपि शास्त्रीयोऽप्यस्ति, विवेकपुष्टश्च।

१–उक्तं हि रुद्रटेन—

व्यवहारः पुंनार्योरन्योन्यं रक्तयो रतिप्रकृतिः।
शृङ्गारः स द्वेधा संयोगो विप्रलम्भश्च॥
……………………तत्र स्यान्नायकः ख्यातः।
एवं स चतुर्धा……………………………………॥
……………………………तस्य स्युर्नायिकाश्चेमाः।
………………………………………………………॥

उक्तं च रुद्रभट्टेन—

चेष्टा भवति पुंनार्यो रत्युत्था ह्यतिरक्तयोः।
संयोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः॥
………………………………………………………।
……………………स्त्रीणामभीष्टस्त्विह नायकस्स्यात्॥
…………इत्थमत्र चत्वारो भेदाः क्रियया च्यन्ते।
स्वकीया च परकीया च सामान्यवनिता तथा।
कलाकलापकुशलास्तिस्रस्तस्येह नायिकाः॥

यद्यपि धनञ्जयेन नायिकानां शृङ्गारालम्बनान्तर्गतत्वं न प्रपञ्चितम्, उपर्युक्त-नाट्यशास्त्रवचनमुद्धृत्य लोकप्रसिद्धत्वादेव विभावानुभावादयोऽपि न निरूपिताः, परन्तु रसनिष्पत्तिप्रसङ्गे विभावस्य प्रामुख्यं महन्महत्त्वं चोररीकृतम्। नायकनायिकादयो हि आलम्बनत्वेन विभाव्यमाना इत्यपि तेनैव तत्रोक्तम्। आलम्बनविभावस्योदाहरणमप्येक-मुपस्थापितम्।[१]

धनञ्जयेन नायिकादयः शृङ्गारान्तर्गतत्वेन न निरूपिताः, तत्र हेतुस्तु—दश-रूपकस्य नाट्यशास्त्रीयग्रन्थत्वम्। नाट्यशास्त्रं प्रारम्भ एव वस्तु-नेतृ-रसाश्चेति नाट्यस्य त्रितयं मूलमभिहितम्, तत्प्रसङ्ग एव नायकनिरूपणसंसिद्धचै नायिकाभेदा अपि उक्ताः। अतो नायिकानायकादीनां पुनर्निरूपणमनावश्यकमासीत्। साहित्यदर्पण-रस-मञ्जर्यादिग्रन्था नायिकानिरूपणविषये दशरूपकीयां पद्धतिमनुहरन्ति। एषा पद्धति-श्चेत्थम्—लक्षणान्युल्लिख्य उदाहरणोल्लेखनम्। उदाहरणान्यपि अन्यदीयान्येव।

दशरूपके खलु शास्त्रीयदिशा प्रौढ्या शैल्या विषया विवेचिताः। गद्येन क्वचित्, कुत्रचिच्च पद्येनेति यथासंक्षेपं विषयाः प्रतिपादिताः। आनन्दवर्धन-वामन-मम्मटा-दयोऽपि शैलीमेनामनुहरन्ति।

रुद्रटीया पद्धतिश्च सम्यग् वर्गीकृता भामहदण्डिशैलीमनुहर्रात। परन्तु सा सुव्य-वस्थिततरा चास्ति।

रुद्रभट्टेन शृङ्गारतिलके पद्येषु लक्षणान्येव शास्त्रचिन्तामपास्य निर्दिष्टानि, किन्तु तेनाप्युदाहरणानि त्वन्यदीयान्येव।

तथा चायं निष्कर्षः—रुद्रभट्टस्य कृत्स्नमपि विवेचनं तादृगेव, यथा खलु पश्चाद् हिन्दीकाव्ये 'रीतिकालिक'—रचनासूपलभ्यत इति।

१— ज्ञाप्यमानतया तत्र विभावो भावपोषकृत्।
आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा॥

'एवमयम्' 'एवमियम्' इत्यतिशयोक्तिरूपकाव्यव्यापाराहितविशिष्टरूपतया ज्ञायमानो विभाव्यमानः सन्नालम्बनत्वेनोद्दीपनत्वेन वा यो नायकादिरभिमतदेशकालादिर्वा स विभावः। यदुक्तम्—

''विभाव' इति विज्ञातार्थ इति, तांश्च यथास्वं यथावसरं च रसेषूपपादयिष्यामः। अमीषां (विभावानां) चानपेक्षितबाह्यसत्त्वानां शब्दोपधानादेवासादिततद्भावानां सामान्यात्मनां स्वस्वसम्बन्धित्वेन विभावितानां साक्षाद्भावकचेतसि विपरिवर्तमानानामालम्बनादिभाव इति न वस्तुशून्यता''।

(द्र० दशरूपकम् ४।२)

शृङ्गारतिलकस्य रचनाया नायिकानिरूपणस्य च ग्रन्थोक्तं लक्ष्यं पश्चात्कालिकं साहित्यं परिपुष्णाति। यथा हि—प्रथमपरिच्छेदान्ते तेनोक्तम्—पूर्वोक्तसम्भोगशृङ्गार-सन्तानवितानैकतानः कविर्विदग्धगोष्ठीवनितामनोज्ञो भवति। तृतीयपरिच्छेदान्ते चोक्तम्—व्युत्पत्तयेऽभिजनैर्हि ग्रन्थोऽयं निषेवणीय इति। किञ्च शृङ्गारतिलकमपास्य कुत्र नाम काव्यकथा स्यात्; कुत्र च वैदग्ध्यम्, रसागमो गोष्ठीमण्डनं वा सम्भवतु ?[१] इति।

इत्थं भूयः परीक्षणेनैतत्सिद्ध्यति—रुद्रभट्टस्य शास्त्रज्ञानापेक्षया कवित्वमधिकतर-मासीत्। तदीया पद्धतिश्च विलासोल्लसित—'रीतिकालिक' हिन्दीकविमतं पूर्वमेव प्रदर्शयति रचनादिशा लक्ष्यदिशा च। किञ्च—दशरूपकतोऽर्वाचीने काले, यदा हि नवीना रचनादृष्टिरुद्भूता, तदाऽयमेव रुद्रभट्ट आचार्यत्वं भेजे।

एतावदवधि यत्खलूक्तं तस्य निष्कर्षः—

(क) रुद्रभट्टसमयो हि न निश्चयेन निर्धारितुं पार्यते। ग्रन्थोक्तदिशा रुद्रटो धनञ्जयतोऽप्ययमर्वाचीन इति भाति। हेमचन्द्रकृतकाव्यानुशासनरचनाकाले रुद्रभट्टीय-ग्रन्थाः प्रसिद्धा जाताः।

(ख) श्रव्यकाव्येषु रसस्थितिः रुद्रटेनैवादौ प्रवर्तिता, तदपरिहार्यता च साधिता। एतेन नायकनायिकाभेदा अपि उक्ताः। एतच्च न साक्षाद्विचारितम्, अपि तु शृङ्गार-रसस्य नायिका नायकाश्चेति पक्षमाश्रित्य तद्भेदानां विवरणं कृतं वर्त्तते। नाट्य-शास्त्रेऽपि सामान्याभिनयप्रसङ्ग एषा रीतिरनुसृता। रीतिरियं रुद्रटरुद्रभट्टसमयं यावत्-प्रचलिता।

१— अनेन मार्गेण विशेषरम्यं सम्भोगशृङ्गारमिमं वितन्वन्।
भवेत्कविर्भावरसानुरक्तो विदग्धगोष्ठीवनितामनोज्ञः॥
[शृङ्गारतिलके प्रथमपरिच्छेदान्ते]

इति मया कथितेन पथाऽमुना रसविशेषमशेषमुपेयुषा।
ललितपादपदासदलङ्कृतिः कृतधियामिह वाग्वनितायते॥
शृङ्गारतिलको नाम ग्रन्थोऽयं ग्रथितो मया।
व्युत्पत्तये निषेवन्तु कवयः कामिनश्च ये॥
कान्या काव्यकथा कीदृग्वैदग्ध्यं को रसागमः।
किं गोष्ठीमण्डनं हन्त शृङ्गारतिलकं विना॥ (द्र० शृ० ति०–३।५४-५७)

(ग) रुद्रभट्टस्य शृङ्गारतिलकोऽपि एतां पूर्वोक्तां सरणिमनुहरति। रुद्रटदिशमनुकुर्वता एव तेन काव्यालङ्कारवत् शृङ्गारालम्बनसन्दर्भपक्षमुपेक्ष्य सविस्तरं शृङ्गाररसस्य नायिका नायकाश्च सोदाहरणा उक्ताः। विषयदिशा तु रुद्रभट्टस्य रचनेयं काव्यालङ्कारीया कतिपयानध्यायानेव विस्तरेण पुनर्निर्वक्ति। उदाहरणानि विहाय किमप्यन्यन्नवीनत्वं नास्ति।

(घ) दशरूपकीया विषयविवेचनशैली शास्त्रानुगता प्रौढा प्रकृष्टा वैदुष्यमण्डिता चास्ति। रसनिष्पत्तिप्रसङ्गोऽपि धनञ्जयीयं पाण्डित्यप्राकर्ष्यं परिचाययति। अत्र यद्यपि नायिकाभेदा नेतृ-(पात्र) निरूपणप्रसङ्ग उक्ताः, तथापि यथास्थलम् आलम्बनविभावनिरूपणप्रौढ्या तद्वैशिष्ट्यं पृथग्विभाति।

(ङ) अग्निपुराणस्य एतद्विषयकोंऽशः प्रकामं संक्षिप्तः, साधारणश्च, किञ्च तद्रचनाकालोऽपि सन्देहास्पदमिति कृत्वा न खलु तदीयसिद्धान्ताः किमपि वैशिष्ट्यमावहन्ति।

(च) ततश्चायं निष्कर्षः—नायिकाभेदास्तावद् भरतनाट्यशास्त्रोपज्ञमेव। रुद्रटेन श्रव्यकाव्येष्वपि शृङ्गाररसप्रसङ्गे तस्यावश्यकता प्रतिपादिता। धनञ्जयकृतरूपकसन्दर्भितविमर्शैर्नायिकाभेदाः प्रौढित्वमभजन्त। रुद्रटोऽपि खलु भरतपथमाश्रित्य लक्षणानि सविवरणानि कविताश्च निर्माय उल्लिलेख। शृङ्गारतिलके[1] दशरूपके च आदौ लक्षणानि, तत उदाहरणानि उद्धृत्य विषयविवेचनस्य पद्धतिर्लक्ष्यते॥

भोजदेवकृता नायिकाभेदाः—

एतावता यदुक्तं तत्सर्वं खलु नायिकाभेदगतं नायिकाभेदनिरूपणस्य प्रथमावस्था मङ्गलाचरणमात्रं वा। यदा हि नायिकाभेदा दृश्यकाव्यमधिकृत्य श्रव्य-

---

१. शृङ्गारतिलके हि रक्ताया विरक्तायाश्च नायिकाया वर्णनमधिकं दृश्यते, नैतत्काव्यालङ्कारेऽस्ति। तत्रत्या निरूपणशैली च नहि प्रौढं पाण्डित्यं प्रकटयति। दशरूपके च मुग्ध-मध्य-प्रगल्भानां विविधा भेदा उपलभ्यन्ते। तत्र मुग्धाया यथा—वयोमुग्धा, काममुग्धा, रतौ वामा, मृदुकोपा च। मध्याया यथा—उद्यद्यौवना, कामवती, मोहान्तसुरतक्षमा, धीरा, अधीरा, धीराऽधीरा चेति। प्रगल्भाया यथा—'यौवनान्धा', 'स्मरोन्मत्ता', 'गाढयौवना' 'भावप्रगल्भा', 'रतिप्रगल्भा' प्रभृतयः। किञ्च—धीराऽधीरादिभेदत्रयी प्रगल्भाया अपि। मध्यायाः प्रगल्भायाश्च ज्येष्ठा कनिष्ठेति द्वौ भेदावपि भवतः।

काव्यान्यपि अधिजगृहुः, तदा खलु उदाहरणात्मकानि लक्ष्यपद्यान्यपि लक्षणकथनैः सहैव उद्धृतानि। स्पष्टश्चैतद् भोजदेवकृते सरस्वतीकण्ठाभरणे[1] शृङ्गारप्रकाशे[2] च।

ग्रन्थद्वयेऽपि नायिकाभेदा निरूपिताः, तत्राभरणे समासेन प्रकाशे च प्रपञ्चेन। आभरणे हि पञ्चमे परिच्छेदे संक्षेपेण नायिकाभेदा रसनिरूपिकाभिः कारिकाभिरुक्ताः। अग्रे च सप्तत्रिंशदुत्तरैकशततम—(१३७) कारिकासु रसविषयकं मतं विनिर्दिश्य 'अथैषां लक्षणोदाहरणानि' इत्युक्त्वा रससिद्धान्ताः प्रकामं निरूपिताः। तत्रैव यथास्थानं यथाक्रमञ्च नायिकानां लक्षणान्युदाहरणानि च अतिसंक्षेपतः प्रस्तुतानि सन्ति।

तत्रभवता महाराजश्रीभोजेन 'आभरणे' नायिकाभेदा भरतपथमाश्रित्यानेकैः प्रकारैर्निरूपिताः। रसप्रसङ्गे चाभिमानाऽहङ्कारश्शृङ्गारादिवत् 'पुनर्भूः' अपि कथिता। 'पुनर्भूः' नायिका कामशास्त्रानुगता, अग्निपुराणानुमोदिता च। महाराजभोजदेवेन सरस्वतीकण्ठाभरणे स्वीया-परकीया-सामान्याः, पुनर्भूश्च चर्चिताः। ग्रन्थेऽत्र नायिका-भेदप्रसङ्गोऽधोवक्ष्यमाणरीत्या नायिकाविभाजनस्य विविधां दिशं व्यनक्ति—

गुणतो नायिकाऽपि स्यादुत्तमामध्यमाधमा।
मुग्धा मध्या प्रगल्भा च वयसा कौशलेन वा॥
धीराधीरा च धैर्येण स्वान्यदीयापरिग्रहात्।
ऊढानूढोपयमनात् क्रमाज्ज्येष्ठा कनीयसी॥
मानर्द्धेरुद्धतोदात्ता शान्ता च ललिता च सा।
सामान्या च पुनर्भूश्च स्वैरिणी चेति वृत्तितः॥

---

१. आभरणे शृङ्गारप्रकाशे च 'शृङ्गारो रसराज' इति भोजेन महत्या युक्त्या परोक्षरूपेण साधितः। शृङ्गाररस एव सर्वरसानां निदानम्, आदिरसो वेत्यपि स मेने। स एव रसः 'अभिमानरूपः' 'अहङ्काररूपः' वेत्यपि स एव। तत्सङ्गादेव काव्ये रामणीयकमुद्भवति—

रसोऽभिमानोऽहङ्कारः शृङ्गार इति गीयते।
योऽर्थस्तस्यान्वयात् काव्यं कमनीयत्वमश्नुते॥

(द्र० सरस्वतीकण्ठाभरणम् ५।१)

शृङ्गारस्य सर्वोत्कृष्ट्यसाधनार्थमेव शृङ्गारप्रकाशग्रन्थो भोजेन निरमायीत्यपि सम्भाव्यते। रसनिष्पत्तिविषये रसभावसम्बन्धे वा तदीयसिद्धान्तः पूर्वाचार्याद् भिद्यते। डा० राघवेण 'भोजस्य शृङ्गारप्रकाशनामके' प्रबन्धे विषयोऽयं न्यक्षेण विवेचितः।

२. अत्रत्यं कृत्स्नमपि विवेचनं शृङ्गारप्रकाशस्याप्राप्त्या डॉ० राघवीयकृतितः सङ्गृहीतम् इति सधन्यवादं निवेदयामि।

आजीवतस्तु गणिका रूपाजीवा विलासिनी ।
अवस्थातोऽपराश्चाष्टौ विज्ञेयाः खण्डितादयः ॥
(द्र०—सरस्वती० ५।११०-११३)

अतः परं पूर्वाचार्यकृतं नायिकाभेदं शृङ्गारप्रकाशं वोपजीव्य आभरणो .-लक्षणानि लघूनि स्पष्टानि स्थूलरूपाणि च सन्ति । यथा हि—

(क) सर्वगुणसम्पद्योगादुत्तमा ।

(ख) पादोनगुणसम्पद्योगाद् मध्यमा ।

(ग) अर्धगुणसम्पद्योगादधमा ।

(घ) वयःकौशलाभ्यामसम्पूर्णा मुग्धा ।

(ङ) वयसा परिपूर्णा मध्या ।

(च) वयःकौशलाभ्यां सम्पूर्णा प्रगल्भा ।

शृङ्गारप्रकाशीया नायिकाभेदा विस्तृता व्यवस्थिताश्चेति राघवमहोदयः । ग्रन्थेऽत्र अधमा ज्येष्ठा च नायिके नोक्ते । स्वीयापरकीययोश्च प्रत्येकं दशोपभेदाः—

(१) उत्तमा, (२) मध्यमा, (३) कनिष्ठा, (४) ऊढा, (५) अनूढा, (६) धीरा, (७) अधीरा, (८) मुग्धा, (९) मध्या, (१०) प्रगल्भा च ।

एतेषां भेदोपभेदानां परस्परं सङ्कलनया नायिकानां प्रत्येकं त्रयश्चत्वारिंशदुत्तरैकशतं (१४३) भेदा भवन्ति ।

नायिकायास्तृतीयो भेदः 'पुनर्भूः' इति । तस्याश्च चत्वार उपभेदाः । यथा—(अ) अक्षता, (आ) क्षता, (इ) यातायाता, (ई) यायावरा च ।

सामान्याया नायिकायाः पञ्चोपभेदाः—

(१) ऊढा, (२) अनूढा, (३) स्वयंवरा, (४) स्वैरिणी, (५) वेश्या च ।

तत्र वेश्याया मुख्यास्त्रय उपभेदाः

गणिका-विलासिनी-रूपाजीवा चेति ।

अत्र सामान्यायाः पुनर्भ्वाश्च उत्तमादिभेदादन्येऽपि भेदा न साक्षान्निर्दिष्टा अपि त्वनुमेया एव ।

मानानुसारेण मध्याप्रगल्भयोर्धीराधीराख्यस्तृतीयो भेदो भोजेन स्वग्रन्थेषु क्वापि नोक्तः । किञ्च भोजः कान्तस्य प्रियतमां ज्येष्ठामनङ्गीकृत्य पूर्वानूढामेव ज्येष्ठामरीचक्रे, वात्स्यायनहेमचन्द्राद्युक्तदिशेति ।

पुनर्भ्वाः सामान्यायाश्च अवान्तरभेदप्रसङ्गे भोजेन यदपूर्वमुक्तम्, तदिह चर्च्यते—पुनर्भ्वा उपभेदेष्वाद्यास्त्रयो धर्मशास्त्रोदिता एव[1]। तत्र 'अक्षता' नाम—या उद्वाहतः पूर्वमेव प्राप्तसम्भोगा, यथा शान्तनुपत्नी सत्यवती। या तूढा प्राप्तसम्भोगा मृतपतिका पुनरूढा सा पुनर्भूः 'क्षता' इति निगद्यते, यथा—मन्दोदरी। या तु पुरुषान्तरव्यभिचरिता परप्रिया पुनः प्राप्तपतिका सा यातायाता, यथा—बृहस्पतिपत्नी तारा (सा खलु चन्द्रपरिगृहीता सती तेन सह अवसत्—बुधजन्मानन्तरं च पुनर्बृहस्पतिसकाशं प्रत्याजगाम) इति। या त्वटनस्वभावा सा यायावरा। एषा हि भ्रमणप्रसङ्गे पूर्वं पूर्वं पतिं परित्यज्य नवं नवं कान्तं स्वीकरोति, यथा—माधवीति भोजेनोक्तम्। माधवी हि विश्वं भ्रमन्ती तत्र तत्र पुरुषचतुष्टयमुपयेमे। यथाक्रमं च प्रत्येकं कान्तेन पुत्रमेकं सुषाव, ततश्च सम्पाद्य उद्वाहचतुष्टयीं गत्वा विन्ध्याटवीं तपश्चचार। एतत्सर्वं शापानुग्रहवशाज्जातम्। अत एव प्रत्येकस्मात् प्रसवात्परं वरदानप्रभावात् तस्याः कुमारीत्वमव्याहतमासीदिति पौराणिकसमयः। पुनर्भ्वा नायिकायाः, तदवान्तरभेदानाञ्चोल्लेख ऋते अग्निपुराणात् साहित्यशास्त्रीयग्रन्थेषु नवीन उपक्रमः।[2]

सामान्याया अभिधेयार्थमपहाय यौगिकार्थ एव भोजेन स्वीकृत इति तत्कृतविवरणतो ज्ञायते। धर्मविवाहपरिणीता भार्या स्वीया, परपुरुषगृहीता च परकीया, पुनरूढा पुनर्भूः। आसां सम्बन्धादि न सार्वजनीनम्।

विवाहसम्बन्धेन शरीरसम्बन्धेन वा (स्वयंवरादिहेतोर्वा) यस्यां कस्यापि एकस्य पुंसो नास्त्यधिकारः, सा सामान्या। अत्रोदाहरणानि द्रौपदीसीतेन्दुमतीप्रभृतयः। अनियतानेकोपभोग्या सामान्येति आभरणे भोजः। सामान्याया भेदद्वयी—ऊढा, अनूढा चेति। उदाहरणं यथाक्रमम्-द्रौपदी सीता च। तत्र द्रौपदी सामान्या ऊढा, यतः सा धर्मतः पञ्चभिः परिणीतेति। अनूढा सामान्या सीता, यतो विवाहतः पूर्वं धनुर्भङ्गपणं प्रपूर्य केनापि परिणेतुं शक्याऽऽसीदिति जनकसमयो बभूव। उपभेदोऽयं पणस्वयंवरे वरणीयाया नायिकायाः कृते सर्वत्र स्वीकृतः। स्वयंवरासामान्याया उदाहरणं यथा—इन्दुमती। अत्र भेदो यथा—निश्चितं पणं प्रतिज्ञां वा सम्पाल्य वीर्यशुल्केन वरेण नायिका वोढुं शक्या प्रथमा। एषा (स्वयंवरसामान्या)

१—पुनर्भूरक्षताक्षतायातायातायायावरा च। (शृ० प्र० १५ प्रकाशः)

२—वात्स्यायनेन कामसूत्र उक्तम्—

"विधवात्विन्द्रियदौर्बल्यादातुरा भोगिनं गुणसम्पन्नं च या पुनर्विन्देत् सा पुनर्भूः" (काम० ४।२।३९) इति।

च मध्ये स्वयंवरं समागतानां वराणां मध्ये यथेच्छं वरयित्री, अत्र वरणेच्छा नायिकागता। भोजकृतमेतत्सामान्या विवेचनात्मकवर्गीकरणं काव्यालङ्कारशास्त्रे किमप्यपूर्वतां भजते[1]।

सामान्यायास्तुर्यः पञ्चमश्च भेदौ स्वैरिणी वेश्या चेत्युक्तं प्राक्। नात्र किञ्चनापि वैशिष्ट्यं प्रतीयते। तत्र मर्यादां विहाय स्वेच्छाचारिणी स्वैरिणीति आभरण उक्तम्। वेश्या तु सामान्याया मुख्यं स्वरूपम्। तत्राधिकमनुल्लिख्य तदवान्तरभेदा विव्रियन्ते।

तत्र चतुषष्टिकलाज्ञा वेश्या गणिका, कुट्टमितादिहावभावज्ञापयित्री सा विलासिनी, रूपयौवनमात्रोपजीविनी सा रूपाजीवेति। अत्र भोजेन वासकसज्जाद्यष्ट-भेदेषु किमपि नूतनं नाभ्यदायि।[2]

अतः परं मन्दारमरन्दचम्पूकृता कृष्णकविना क्षताऽक्षतादयो निरूपयता भोजस्योल्लेखो विहितः, परं यातायातानायिकाया द्रौपदीत्युदाहरणं तदीयभ्रमपारा-धीन्यं प्रकटयति। तथाहि—

अक्षता च क्षता यातायातायायावरेत्यपि।
पुनश्चतुर्धा कथिताः पूर्वैर्भोजादिभिर्बुधैः॥
यातायाता तु युगपदूढानेकैस्तु भर्तृभिः।
यथा पाण्डुसुतैरूढा द्रुपदस्य कुमारिका॥ इति।

हेमचन्द्रकृतकाव्यानुशासनगता नायिकाभेदाः—

ग्रन्थेऽत्र नायिका यथासंक्षेपं निरूपिताः। लक्ष्याणि लक्षणानि चात्र सङ्कलितानि।

हेमचन्द्रदिशा मध्यामुग्धाप्रगल्भानां प्रत्येकं भेदद्वयी। तन्मूलं वयः कौशलञ्च। यथा—वयसा मुग्धा, कौशलेन मुग्धा। एवं वयसा मध्या कौशलेन मध्या। वयसा प्रगल्भा कौशलेन प्रगल्भा चेति। मध्यादीनां धीराऽधीरादिभेदा अपि स्वीकृताः।

१—अत्र सामान्याया 'ऊढा' 'अनूढा' 'स्वयंवरा' इति भेदत्रयी स्वयंवरे क्षत्रियकुमारीणां कृत एवेत्यनुमानविषयः। तत्रोढानूढ्योः परिणयस्तु वीर्यशुल्कं प्रपूर्य एव भवितु-मर्हति। तृतीया च स्वेच्छया वरवरणे शक्तेति।

२—सरस्वतीकण्ठाभरणे नायिकानां नायकानां च रूपप्रतिरूपयोः भेदेन सङ्कलनं कृतम्। तत्र नायकप्रतिनायकोपनायकानुनायका नायककोट्यः। नायिकाप्रतिनायिकोप-नायिकाऽनुनायिकाश्च नायिकाकोटयः। किञ्च—नायिकाभासनायकाभासोभयाभासा अपि निरूपिताः।

अत्रापि भरतोक्तदिशा पूर्वमूढा ज्येष्ठा, पश्चादूढा च कनिष्ठा कथिता। नायकस्य प्रियतरा-प्रियतमा वा ज्येष्ठा स्वल्पस्नेहभागिनी कनिष्ठेति परवर्त्तिसिद्धान्तो नात्र स्वीक्रियते।

एवमेव हेमचन्द्रेण दशरूपकीयालोकव्याख्योक्तदिशा नायिकाया अष्टविधभेदेषु परकीयायास्त्रैविध्यमेवोररीकृतम्—(क) विरहोत्कण्ठिता, (ख) अभिसारिका, (ग) विप्रलब्धा चेति।

अतः परं वाग्भटस्य (प्रथमस्य द्वितीयस्य च) वाग्भटालङ्कारे, काव्यानुशासने, प्रतापरुद्रयशोभूषणे च नायिकाभेदा निरूपिताः, किन्त्वत्र सर्वत्र न किञ्चिद्वैशिष्ट्यं नवीनत्वं खलूद्भावने वा दृश्यश्रव्यकाव्यसम्बद्धो नायिकाभेदशास्त्रीयप्रथमावस्थातुल्य एवं नायिकानिरूपणप्रकार एतेषु ग्रन्थेषु प्रायेण प्रचलति स्म। शृङ्गारालम्बनविभाव-रूपेण नायिकानां विवेचनं नाभूत्। लक्षणैः सह लक्ष्यान्यपि तत्रोदाहृतानि, परन्तु न स्वरचितानि। तत्र वाग्भटेन चतस्रो नायिका उक्ताः—अनूढा (कन्यका), स्वकीया, परकीया, पराङ्गना (सामान्या) च। जिनवर्धनाख्येन टीकाकृता परकीयात्रैविध्य-मुपपादितम्—सधवा—(जीवितभर्तृका), परकीया, विधवापरकीया, केनापि स्वीकृता विधवा (पुनर्भू) परकीया चेति।

अतः शारदातनयकृतं भावप्रकाशनम्, शिङ्गभूपालकृतं रसार्णवसुधाकरम्, द्वौ नाट्यशास्त्रीयौ ग्रन्थौ आस्ताम्, तथा च विश्वनाथकविराजकृतं सहित्यदर्पणम्, भानुदत्तकृतं रसमञ्जरीञ्चाश्रित्य नायिकाभेदाश्चर्च्यन्ते।

भावप्रकाशने नायिकाभेदा :—

भावप्रकाशनग्रन्थे भरत-रुद्रभट्ट-रुद्रट-धनञ्जयभोजदर्शितदिशा नायिकाभेदा उक्ताः। शारदातनयेनैव भरतमतमाश्रित्य नायिकानां देवशीला-दैत्यशीला-गन्धर्व-शीला-यक्षाङ्गना-राक्षसशीला-पिशाचशीला-नागशीला-मर्त्यशीलादिभेदास्तत्तद्भेदोद्धरण-सहिता दर्शिताः। भोजञ्चानुश्रित्य उदात्तोद्धताशान्तालिलिताश्चतस्रो नायिका उक्ताः। परं नैष भेदो भोजीयं मानऋद्धिसिद्धान्तमपेक्षते, अपि तु धीरोदात्तादिप्रसिद्ध-गुणसिद्धान्तमेवापेक्षते। प्रसङ्गेऽत्र चतसृणामपि नायिकानां वेषभूषाशीलादिभेदकगुण-धर्मादिविन्यासा अप्युक्ताः। किञ्च वासकसज्जाद्यष्टविधविमर्शोऽपि अभिनेयत्वदिशा, अभिनयदिशा च यथातर्कमुक्तः।

एतास्वष्टविधासु नायिकादशासु परकीयानां कृते दशात्रयी एवापेक्ष्यत इति केचित्, इत्यपि भावप्रकाशनकृता चर्चितम्। ताश्च तिस्रो दशाः—(क) विप्रलब्धा,

(ख) विरहोत्कण्ठिता, (ग) अभिसारिका च। भावप्रकाशनदर्शितदर्शनदिशा तु एतत्-सङ्ख्या यथा—[१३ (स्वीया) + २ (परकीया) + १ (सामान्या)] = १६ × ८ = (वासकसज्जादि) १२८ × ३ = (उत्तममध्यमाधमभेदात्) ३८४ चतुरशीत्युत्तर-त्रिशतं पर्यवस्यति। एतच्च रुद्रटमतमित्युच्यते। अत्र भेदप्रसङ्गे उदात्तोद्धतादयो नाट्योपयोगिनो न धृताः।

भरतोक्तप्रथमयौवनादिभेदचतुष्टयी अत्राप्यङ्गीकृताः। एतत्सर्वमपि नाट्य-दिशाऽभिनयशिल्पदिशा च विस्तरेणात्र ग्रन्थे विचारितम्। नात्र विमर्शे किञ्चनापि अभिनवत्वम्, परमद्यापि नाट्यशास्त्रोक्तिदिशा तु तत्परिचायकं साटोपं सर्वं निरूपितम्।

कृत्स्नमप्येतद्विचारजातं रसालम्बनप्रकरण एव जातम्। शृङ्गाररसावलम्बन-सन्दर्भे च नायिकाभेदाः, नायकभेदाः, शीलचेष्टादयश्च निरूपिताः। भावप्रकाशनग्रन्थे च लक्षणं तत्परिचयश्च न्यक्षेण वर्तेते, परमत्रोदाहरणानि न सन्ति।

रसार्णवसुधाकरः—

नाट्यशास्त्रीयग्रन्थेषु रसार्णवसुधाकरः, साहित्यशास्त्रीयग्रन्थेषु साहित्यदर्पणं च नायिकाभेदनिरूपणे सर्वान् अतिशयाते, ययोश्च नायिकाभेदस्य द्वितीयं सोपानं सुस्पष्टं लक्ष्यते। अत्र साक्षाच्छृङ्गारावलम्बनप्रसङ्ग एव नायिकादिभेदा विस्तरेण निरूपिताः। एतत्पूर्वग्रन्थेषु यद्यपि नायिकादय आलम्बनरूपेणोक्तास्तथापि नायिकानायकभेद-निरूपणं तु कथावस्त्वाद्यपेक्षयैवाभ्यधायि। परन्तु सुधाकरे दर्पणे च पूर्वोक्तप्रकारा-द्भिन्नः क्रमो वर्त्तते। अत्र रसान्तर्गतविभावनाप्रसङ्गे तन्निरूपणं जातम्। अनयो रचना-कालोऽपि प्राय एक एव। आलम्बनविभावप्रसङ्गे शृङ्गारावलम्बनं परिचाययता रसार्णवकृता प्रोक्तम्—

आधारविषयत्वाभ्यां नायको नायिकापि च।
आलम्बनं मतं तत्र नायको गुणवान् भवेत्॥

अत्रोक्तगुणाश्च—महाभाग्यौदार्यदाक्ष्यौज्ज्वल्यधार्मिकताकौलीन्यवाग्मिता-कृतज्ञतानयज्ञत्वशुचित्वमानशालित्वतेजस्विताकलावत्ताप्रजारञ्जकत्वानि।

इमान् गुणान् लक्षयित्वा, उदाहृत्य च सामान्यनायकस्य त्रयो भेदा उक्ताः—उत्तममध्यमाधमा इति। ततश्च धीरोदात्तादिगुणभेदा उक्ता उदाहृताश्च। ततश्च सर्वरससाधारणस्य नायकस्य विनिगमनात्मकं परिचयं विज्ञाप्य शृङ्गारमपेक्ष्य त्रयो नायका यथाक्रमं स्वीयानुरागपात्रं पतिः, परकीयानुरागपात्रमुपपतिः, सामान्या-

नुरागपात्रञ्च वैशिकः (पत्युपपतिवैशिका इति त्रयो भेदा निर्दिष्टाः)। नायकाश्च चत्वारः– अनुकूल शठ-धृष्ट-दक्षिणभेदात् । अत्र नायकगतं शाठ्यम्, धाष्टर्यम्, दाक्षिण्यं च ऊढासु सपत्नीषु निहितम् । ग्रन्थेऽत्र उपपतेर्दाक्षिण्यमानुकूल्यं धाष्टर्यं वा अनित्यत्वहेतुकमनुचित-मित्युक्त्वा तस्य शाठ्यस्य लक्ष्यलक्षणे उपस्थापिते। ततो वैशिकनायकस्य गुणा उत्तममध्यमाधमभेदानां च लक्षणानि एवोक्तानि, नोदाहरणानि। एवञ्चात्र रस-सामान्यनायकाः श्रृङ्गारनायकाश्च सपरिचयं सुस्पष्टं सोदाहरणं च यथा निरूपिताः, न तथान्यत्र बहुधा दृश्यते ।

अत्र नायिकाभेदप्रसङ्गे श्रृङ्गारानुगता एव ता निरूपिताः। तत्र स्वीयाया मुग्धामध्याप्रौढेति विख्यातास्त्रयो भेदाः सन्ति। तत्रापि मुग्धाया वयोमुग्धा-नव-कामा-रतौवामा-मृदुकोपा-सलज्जरतिशीला क्रोधेनाऽपभाषमाणा रुदती चेति षडुपभेदाः सोदाहरणं समुद्धृताः। मध्यायाश्च त्रयो भेदाः-समलज्जामदना-प्रोद्यत्तारुण्यशालिनी मोहान्तसुरता चेति । मानवृत्त्या च मध्याया अन्ये त्रयो भेदा धीरा, अधीरा, धीराधीरा चेति । प्रगल्भाया द्वौ भेदौ-सम्पूर्णयौवनोन्मत्ता प्ररूढमन्मथा चेति। अस्या अपि मान-वृत्तिपक्षतो धीरादिभेदत्रयी स्वीकृता। अत्र सर्वेषां भेदानां लक्षणान्युदाहरणानि च लभ्यन्ते ।

परकीयाया द्वौ भेदौ–कन्या (अनूढा) परोढा[1] चेति । तत्र कन्या नाटकेष्वादृता, परं परोढा तु (सदाचारमूलकरसाभासताबुद्ध्या) आर्यासप्तशत्यादिक्षुद्रग्रन्थ एव निरूपणीयेति, न नाटकेष्विति पर्यवसितम् । एतच्च रसाभासत्वभियैवेति अनुमीयते। अनूढा, कन्या च मुग्धाया एव वैशिष्ट्यमनुहरतीत्यप्युक्तम् ।

सामान्याया अपि द्वौ भेदौ रक्ता विरक्ता चेति। तत्र रक्ता नाटकोपयुक्ता, विरक्ता च प्रहसनभाणाद्युपयुक्ता। गणिका च गुणवन्तमपि नायकं नानुषज्जत इति रसा-भासत्वेन अरक्तापि सा नाट्यवर्ण्यानुपयुक्ता इति पूर्वाचार्यमतमुद्धृत्यापि नैतच्छिङ्ग-भूपालमतमित्युक्तम्। तन्मते च सामान्या वर्ण्या एवेति। अतः परं प्रोषितभर्तृकादि-भेदाष्टकं सोदाहरणमुत्तमामध्यमाधमाश्चेत्युपसंहारे प्रतिपादितम् ।

ग्रन्थेऽत्र नायिकानिरूपणप्रकरणं पूर्वाचार्यमतसङ्ग्रहात्मकमपि पूर्वोक्तविवरणेन प्रौढविवेचनागर्भत्वं पाण्डित्यपरिमण्डितत्वं च सुस्पष्टं परिलक्ष्यते ।

---

१. परोढा तु परेणोढा अन्यसम्भोगलालसा ।
लक्ष्या क्षुद्रप्रबन्धे सा सप्तशत्यादिके बुधैः ॥ १।१०९ ।

साहित्यदर्पणः—

ग्रन्थोऽयं प्रौढ्या चिन्तनया संस्कृतसाहित्ये लक्षणग्रन्थेषु परं प्रथिमानमाभजते। नायिकाभेदाश्चात्र वैदुषीमण्डितया शैल्या निरूपिताः। रसगता अपि तद्भेदा उक्ताः। मुख्या भेदाः पूर्वोक्ता अपि उपभेदा नवीनाः सन्ति।

स्वीयाया भेदोपभेदनिरूपणं यथा—

(क) मुग्धा—१—प्रथमावतीर्णयौवना, २—प्रथमावतीर्णमदनविकारा, ३—रतौ वामा ४—माने मृदु, ५—समधिकलज्जावती। (अत्रोपभेदा नाम्ना एव, सिद्धान्तास्तु पूर्वस्वीकृताः सन्ति)।

(ख) मध्या—१—विचित्रसुरता, २—प्ररूढयौवना, ३—प्ररूढतारुण्या, ४—ईषत्प्रगल्भवचना, ५—मध्यमव्रीडिता च।

(ग) प्रगल्भा—१—स्मरान्धा, २—गाढतारुण्या, ३—समस्तरतकोविदा, ४—भावोन्नता, ५—स्वल्पव्रीडा, ६—आक्रान्तनायका चेति।

किञ्च मध्याप्रगल्भयोर्धीरादिभेदत्रयी अपि उक्ताः। किञ्चैतयोर्ज्येष्ठा कनिष्ठा चेत्युपभेदा अपि स्वीकृताः।

ततश्च मध्यायाः प्रगल्भायाश्च द्वादशभेदाः, मुग्धाया एको भेदः, स्वीयायास्त्रयोदशभेदा मुख्यतः सन्ति। परकीयाया द्वौ भेदौ—कन्या परोढा चेति। सामान्यायाश्चैक एव भेदः, तथा सङ्कलनया षोडशविधा नायिकास्सन्तीति। इमाश्चावस्थित्यनुसारं स्वाधीनभर्तृकाद्यष्टभेदवत्यः। पुनश्च उत्तममध्यमाधमभेदेन त्रिधेति। तथा—१६×८=१२८×३=३८४, सङ्कलनया चतुरशीत्युत्तरत्रिशतं शृङ्गाररससम्बद्धा नायिकाः पर्यवस्यन्ति। रुद्रटेन, शारदातनयेन, शिङ्गभूपालेन चापि इयत्य एव नायिका ऊरीकृताः। परमथापि प्राचीनाचार्यदर्शितदर्शनदिशा परकीयायाः भेदत्रयी एव यथायुक्ति स्वीकृता—

१-विरहोत्कण्ठिता, २-अभिसारिका, ३-वासकसज्जा च। तथाप्युक्तम्—

> त्र्यवस्थैव परस्त्री स्यात् प्रथमं विरहोन्मनाः।
> ततोऽभिसारिका भूत्वाऽभिसरन्ती व्रजेत् स्वयम्॥
> सङ्केताच्च परिभ्रष्टा विप्रलब्धा भवेत् पुनः।
> पराधीनपतित्वेन नान्यावस्थात्र सङ्गता॥

(द्र०-सा० द० ३।१६०)

दर्पणकृताऽपि तृतीयपरिच्छेदे द्वाविंशत्युत्तरैकशततमकारिकातः परम्, अन्यदीयमतमाश्रित्य परोढाविषये कन्यकाविषये चैतन्मतमुपपादितम् ।

ततश्चायं निष्कर्षः—

रसार्णवसुधाकरस्य साहित्यदर्पणस्य चापि किमपि साम्यमस्ति । यथा हि दर्पणस्य प्रौढिः आभासते, तथैव रसार्णवस्य सर्वरससामान्यात्मकत्वम्, शृङ्गाररसावलम्बन-निर्धारणीकृतविभक्तीकृतवर्णनं वैशिष्ट्यं किमपि स्फुटमभिव्यनक्ति । उभयत्र ग्रन्थयोः लक्ष्यलक्षणगर्भा निरूपणशैली प्रौढा वर्तते । तत्रोदाहरणानि लक्ष्यभूतानि प्रायस्तरां प्राचीनान्येव । रसादिनिरूपणप्रसङ्गे साहित्यदर्पणस्य शैली रसार्णवमतिशेते । प्रायो न खल्वत्र ग्रन्थे प्रतापरुद्रयशोभूषणग्रन्थ इवोदाहरणानि स्वकर्तृकानि[1] ।

इमौ द्वौ ग्रन्थौ एतस्मादेव कारणाद् नायिकाभेदनिरूपणात्मकालङ्कारशास्त्रीय-वाङ्मये द्वितीयसोपानारूढौ कथ्येते, यतोऽनयोः शृङ्गाररसनिरूपणप्रसङ्ग आलम्बन-विभावरूपरसाङ्गविवेचनक्रमे नायिकानायकयोरालम्बनस्थानीयत्वं निर्धार्य तद्भेदानां निरूपणं कृतं वर्त्तते । पूर्वग्रन्थेषु प्रायः स्पष्टरूपेण नायिकादीनां प्रस्तावना नालम्बन-सन्दर्भे प्रकरणे च निर्धारितासीत् । अत्र च विवेचने प्रायः पूर्वोक्तलक्ष्योदाहरणोप-स्थानेन आचार्यस्य भावयित्री प्रतिभा प्रौढेति सूच्यते । तत्र ललित-रसपूर्णलक्ष्य निर्माणरचनाचातुर्यप्रदर्शने स्वरचिते नौत्सुक्यं लक्ष्यते ।

भानुदत्तकृतरसमञ्जरीग्रन्थे नायिकाभेदः—

ग्रन्थोऽयं रसमञ्जरीत्याख्योऽपि शृङ्गारमञ्जरीत्येव प्रतिभाति । तत्र प्रारम्भ एवाचार्य आह—'तत्र रसेषु शृङ्गारस्याभ्यर्हितत्वेन तदालम्बनविभावत्वेन नायिका तावन्निरूप्यते' । संक्षेपतः कथयितुं शक्यते यद्रसेषु शृङ्गारस्य महनीयत्वं श्रेष्ठत्वं च । रसाङ्गेषु च तथैवालम्बनविभावस्य, तत्रापि च नायिकायाः । अतस्तस्या निरूपणं प्रामुख्येन वर्णनीयम् ।

इहादौऽवधेयम्—

रसमञ्जरीकृता रसशास्त्रविषयकः स्वतन्त्रो रसतरङ्गिणीग्रन्थोऽन्योऽपि व्यरचि । रसमञ्जरी हि रसतरङ्गिण्याः परिशिष्टरूपा एव ।

---

१. अभिसारिके हि द्वे इति दर्पण उक्तम्—अभिसारयित्री—अभिसरणकर्त्री चेति । एवं प्रवासोऽपि भूतभवद्भविष्यमाणभेदात् त्रिधेति दर्पणमतम् ।

तरङ्गिण्या रसोहि यथाशास्त्रं यथाटोपं च निरूपितो गद्यशैल्या, परमुदाहरणानि काव्यगतलालित्यं परिचाययन्ति। यद्यपि रसमञ्जर्यां विषयसंक्षेपाच्छास्त्रीयविवेचनं न पर्याप्तविस्तारेण प्रकटीभूतम्, परं तावतापि तस्य गाम्भीर्यं व्यज्यत एव। अत्र लक्ष्याण्यपि स्वीयान्येवेति। अतः कवेः काव्ये लालित्यमञ्जुलतापरा प्रतिभा सुतरां प्रकाशिताऽस्ति।

गद्यभाषा सहकृतविवेचनोपादानेन तत्र शास्त्रीया गम्भीरता, स्पष्टता, प्रौढता च दृश्यन्ते नायिकादीनां मान-चेष्टा-हावभावादीनां भेदकगुणधर्मसहितं सोदाहरणं भेदोपभेदनिरूपणं ग्रन्थकर्त्तुः शास्त्रीयं पाण्डित्यं प्रकामं प्रकटीकरोति।

भानुदत्तीया रसमञ्जरीयं नायिकाभेदविषये किमपि नावीन्यमाधत्ते। एतस्मात् पूर्वं (मुख्यतः शृङ्गारतिलकं विहाय) नायिकादिनिरूपणे पूर्वस्वतन्त्रग्रन्थरचनायाः परिपाटी नासीत्, अपि तु रसनिरूपणे नाट्यशास्त्रीयग्रन्थे वा यथास्थानं नायिकाभेदा विवृताः। शृङ्गारे तदालम्बने वा अवश्यमेव आसक्तेराभासः तद्विस्तरस्य प्रामुख्यं लक्ष्यते। परमद्यापि नायिकाभेदमाधृत्य भानुदत्तेनैव ऐदम्प्राथम्येन ग्रन्थ आरचित इति नानुचितं वक्तुं प्रतिभाति।

एतदनन्तरं संस्कृते हिन्द्यां भाषान्तरेष्वपि एवमनेके ग्रन्था रचिता, यत्र नायिकाभेद एव मुख्योऽभवत्।

तद्युगीनवैलासिकमनोवृत्त्यनुरूपं वर्गविशेषवासनातर्पणसाधनभूतं 'हिन्दी—रीतिकालिक'—नायिकानिरूपणवाङ्मयमतिविस्तृतं जातम्। एतस्या नवीनशास्त्रीयनायिकानिरूपणपरम्परायाः प्रामुख्येन परिपाटीप्रवर्त्तक आचार्यो भानुमिश्र इत्यपि निगदितुं शक्यते।

तद्युगीनविलासमनोवृत्तिमनुसरती विलासप्रियाभिजात्यवर्गीयभावनामनुगच्छन्ती एषा नायिकाभेदनिरूपणप्रमुखा शैली समुपबृंहिता बभूव। फलतश्च लोकभाषासु तदनुरूपसाहित्यस्य प्राचुर्यं दरीदृश्यते। अस्याः प्रवृत्तेः मुख्यतो विख्यातः प्रवर्त्तको भानुमिश्र एवेति कथयितुं शक्यते।

---

१. भानुदत्तमिश्रेण रसपारिजाताख्यं किमपि ग्रन्थान्तरमपि व्यलेखीति। ग्रन्थोऽयं मोतीलालबनारसीदासप्रकाशनेन लाहौरनगरे सप्तत्रिंशदुत्तरैकोनविंशतितमख्रैस्ताब्दे प्रकाशितः। ग्रन्थेऽत्र दुर्दिनाभिसारिकेति नवीन उपभेदोऽपि दृश्यते। किञ्च—कामशास्त्रदिशा पद्मिनीप्रभृतिभेदा अप्यत्राहृताः।

रसमञ्जरीदिशा नायिकाभेदाः पूर्वोक्ता एव—स्वीया-परकीया-सामान्या चेति। तत्र स्वपत्यनुरक्ता स्वीया, यस्या मुग्धादिभेदत्रयी प्रसिद्धैव। अत्र 'अङ्कुरितयौवन-रूपम्' यद्वैशिष्ट्यम्, तदेव मुग्धाया भेदकं परिचायकं वेति बोध्यम्। प्रसङ्गेऽत्र चातुर्विध्यं लभ्यते—१—अज्ञातयौवना, २—ज्ञातयौवना, ३—नवोढा, ४—विश्रब्ध-नवोढा चेति।

अत्रेदं स्पष्टं न प्रतिभाति यद् अन्त्यं भेदद्वयम्, अज्ञातयौवनमुग्धायाः, ज्ञातयौवन-मुग्धायाः, स्वतन्त्रं वास्ति, यद् वा आद्यभेदद्वयस्यैवोपभेदाविमाविति। केचित्तु ज्ञातयौवनाया उपभेदाविमाविति स्वीचक्रुः, परं स्वतन्त्राविमाविति बहवः। उदाहरणानुसारं चतुर्णां पार्थक्यं स्पष्टमेव। चतुर्णां नामग्रहणपूर्वकं पृथक् पृथग् उदाहरणदर्शनात्। परं नायिकाभेदस्य प्रस्तारगणनानुसारं मुग्धा नानेकविधेति पश्चादुपपादयिष्यामः। ग्रन्थेऽत्र मध्या समानलज्जामदनेत्यभिहिता, अतिविश्रब्धनवोढे-त्यपि नूतनाख्या समुपदिष्टा च। प्रगल्भा च पतिमात्रविषयकेलिकलाकलाप-कोविदेति लक्षणेन निर्दिष्टास्ति। अस्याश्च यथाचेष्टं रूपद्वयी—(क) रतिप्रीतिमती, (ख) आनन्दसम्मोहिता च। प्रस्तारगणनासु नास्त्यासामाकलनं वर्त्तते।

मध्यायाः प्रगल्भायाश्च—धीरा, अधीरा, धीराधीरा चेति प्रत्येकमुपभेदाः सन्तीति, तयोः षाड्विध्यं पर्यवस्यति। तत्रापि ज्येष्ठा कनिष्ठा चेति भेदेन मध्याप्रगल्भयोः द्वादश भेदाः, मुग्धा चैकविधा। ततश्च स्वीयायास्त्रयोदशभेदाः। एतत्सर्वं साहित्यदर्पणा-नुगतं पूर्वाचार्यसम्मतं च।

परकीयाया द्वौ भेदौ—(क) परोढा (ख) कन्यका च। एतदुपभेदौ भानुदत्ते-नापि पूर्वाचार्यसदृशौ स्वीकृतौ। परन्तु एतद्भेदाः (प्रस्तारगणनाकृताः) षट् सङ्ख्यकाः प्रदर्शिताः सन्ति।

१—गुप्ता (सुरतगोपना, वृत्तसुरतगोपना—वर्त्तिष्यमाणसुरतगोपना—वृत्त-वर्त्तिष्यमाणसुरतगोपनेति भेदात्त्रिविधा)। २—विदग्धा (वाग्विदग्धा क्रियाविदग्धा च) ३—लक्षिता ४—कुलटा ५—अनुशयाना (एषा त्रिविधा), क—वर्तमानस्थानविघटना-दनुशयाना, ख—भाविस्थानाभावशङ्कया अनुशयाना, ग—स्वानधिष्ठानसङ्केतस्थलं प्रति भर्त्तुर्गमनानुमानादनुशयाना। ६—मुदिता चेति।

परकीयाया एतेषां स्वरूपभेदानां परिकल्पना अंशतः कदाचिदाभिजात्यवर्गीय-जनानां कामशास्त्रानुगतविलासहेतुतः, अंशतश्च, तन्त्रोक्तपञ्चमकारोपासनाफलतः,

सर्वतोऽधिकं च गीतगोविन्दादिषु समुकक्रुष्णोपासनागतं परकीयारतिवर्णनप्रभानुकरणतश्च प्रचलितेत्यनुमातुं शक्यते ।

अन्यैरप्याचार्यैः यथासन्दर्भमिमे भेदा उल्लिखिता इति[1] । अतश्च रसमञ्जरीकृताऽभाणि-'गुप्ता-विदग्धा-लक्षिता-कुलटा-अनुशयाना-मुदिताप्रभृतीनां परकीयायामेवान्तर्भावः' बोधव्य इति ।

हिन्दीसाहित्यस्य रीतिकालिकसाहित्ये नायिकाभेदविस्तरप्रसङ्गे भानुदत्तमतं प्रकामं महत्त्वमभजत । आभिजात्यवर्गीयाणां वैलासिकीं रुचिमनुसरता, उच्चवर्गीयाणां कलानुरञ्जनं कुर्वता कामुकतापूर्णां तेषां मनोवृत्तिं प्रदर्शयता नायिकाभेदनिरूपणेन यः साहित्यविस्तारः कृतः, स किल तात्कालिकीं वर्गविशेषस्य सामाजिकीमभिरुचिं सूचयति स्म । सा च समाजाभिरुचिः प्रकारान्तरेण नागरिकधनिकसामाजिकानां कलात्मकसहृदयत्वस्य सहजरूपेण प्रदर्शकमभवत् ।

सामान्या चैकप्रकारेति रसमञ्जरीकारोऽपि पूर्ववद् मेने । सङ्कलनया षोडशधा नायिकाः; ताश्च नायिकाः पुनस्त्रिविधाः—१—अन्यसम्भोगदुःखिता, २—वक्रोक्तिगर्विता, (एषा द्विविधा-क—प्रेमगर्विता, ख—सौन्दर्यगर्विता), ३—मानवती (एषा त्रिविधा—क-लघुमानवती, ख—मध्यमानवती, ग—गुरुमानवती) ।

इत्थं च नायिकासामान्यषोडशभेदाः—(१३ स्वीयायाः + २ परकीयायाः + १ सामान्यायाश्च–१६ भेदाः । प्रत्येकभेदस्य च प्रोषितभर्तृकाद्यष्टावस्थाभेदाद् नायिकानामष्टाविंशत्युत्तरैकशतम् (१२८) उत्तममध्यमाधमभेदाच्च चतुरशीत्युत्तरत्रिशतम् (३८४) वा भेदाः पर्यवस्यन्ति । सङ्ख्येयं भानुमिश्रेणापि स्वीकृता । पुनश्च दिव्याऽदिव्यदिव्यादिव्यादिभेदाश्च द्वापञ्चाशदुत्तरपञ्चशताधिकैकादशशतं (११५२) नायिकाः सिद्ध्यन्ति । परमेष भेदो जातिभेदकृत इति भानुमिश्रेण नाङ्गीकृतम् ।

प्रोषितभर्तृकाद्यष्टविधभेदातिरिक्तः प्रवत्स्यत्पतिकाख्यो नवमो भेदोऽपि ग्रन्थकृदाचार्येण उररीकृत्योपस्थापितः । सयुक्तिकपक्षोऽयं ग्रन्थकर्त्तुराचार्यस्य नवीनोद्बोधनकर्तृत्वं ज्ञापयति । किञ्च, प्रवत्स्यत्पतिकाख्यो भेदो भविष्यद्वर्तमानभेदेन पुष्पितो बभूव । एतस्मात् परस्मिन् काले संस्कृतसाहित्ये हिन्दीसाहित्ये चैतद्विषयकवर्णने एतद्भेदस्यातिप्रभाववशाद् नवीनभेदस्योद्भावकतया भवत्प्रवासभविष्यत्प्रवासभेदावपि सम्मेल्य नायिकावस्थाभेदा दश सञ्जाताः । ततश्च 'रसमञ्जरी' तावद् हिन्दीसाहित्यं संस्कृतसाहित्यं चोपजीवयतीति निष्कर्षः ।

१—तत्तदाचार्यकृतग्रन्थेषु उपलब्धा एतद्भेदा यथास्थानं चर्चिताः ।

इत्थं च एतदपि कथयितुं पार्यते यद् भानुमिश्रस्तस्य रसमञ्जरी रसतरङ्गिणी चेति द्वयोरपि परवर्त्तिसंस्कृतहिन्दीसाहित्यशास्त्रे नायिकाभेदनिरूपणसन्दर्भे महद्वैशिष्ट्यम् ।

गौडीयवैष्णवभक्तिपरम्परायां नायिकाभेदा :—

कृष्णभक्तिसम्प्रदायानुगतास्तत्रापि विशेषतो गौडीयसम्प्रदायाचार्या नायिकाभेदान् वैचित्र्येण निरूपितवन्तः । अत्र दर्शने श्रीकृष्णः, तं प्रति प्रीतिरतिप्रेमानुरक्तिभक्तिमधुररत्यादयो भावाश्च निरूपिताः । अत्र तु, श्रीकृष्ण एव एकः सर्वोत्कृष्टो नायकः, सम्बद्धाः सर्वा नायिकाः सभेदोपभेदमाडम्बरेण निरूपिताः । उज्ज्वलनीलमणिनामको ग्रन्थ एतत्सम्प्रदाये सर्वानतिशेतेतराम् । श्रीरूपगोस्वामिचरणैरारचितोऽयं ग्रन्थो भक्तिसम्प्रदाये महान्तं महिमानं बिभर्ति । ग्रन्थेऽत्र प्रारम्भ एव आलम्बनविषय उक्तम्—

'अस्मिन्नालम्बनाः प्रोक्ताः कृष्णस्तस्य च वल्लभाः' इति ।

सर्वरसराजभूते मधुररसे सदैव कृष्णस्तस्य चाग्रे निरूपिता वल्लभा एव सदाऽऽलम्बनत्वं भजन्ते । धीरोदात्तादयश्चत्त्वारो नायकभेदाः, तेषां पुनर्द्वावपभेदौ-पतिरुपपतिश्चेति ।[1] ततो नायकस्य भेदोपभेदनिरूपणतः पश्चात् नायिकाभेदा

---

१. विषयोऽयं सप्रसङ्गोऽत्र समुल्लेख्यः । तथाहि कन्यायाः पाणिगृहीता धर्मानुसारं परिणीय तस्याः पतिर्भवति । यथा—श्रीमती सीता रामचन्द्रस्य, तत्रभवती रुक्मिणी च कृष्णस्येति । आह चात्र व्याख्याकाराः श्रीजीवगोस्वामिचरणाः—पतिः पुरवनितानाम्, द्वितीयो (उपपतिः) व्रजवनितानाम् । उपपतिविषये चोक्तम्—

रागेणोल्लङ्घयन् धर्मं परकीया बलार्थिना ।
तदीयप्रेमवसतिर्बुधैरुपपतिः स्मृतः ॥

अस्यायमर्थः—परकीयाया नायिकायाः कामुकः, रतिवशाद् धर्मं परित्यज्य, परकीयाः प्रेमास्पदं नायको लीलावेषधारी रसमूर्त्तिः श्रीकृष्ण एव मधुराख्ये भक्तिरसे उपपतिः परकीयानायको वेति साधारणतः ।

गौडीयसम्प्रदायदर्शनदिशा तु श्लोकस्यास्यायमर्थः—परकीयाया अबलाया इच्छुकं रागान्मधुररतितो धर्मञ्चोल्लङ्घयन् परनायिकाप्रेमस्थानं लीलापुरुषोत्तमो मधुरोज्ज्वलरसमूर्तिः श्रीकृष्ण एव मधुराख्यभक्तिरसे उपपतिरिति ।
अग्रे चोक्तम्—

'अत्रैव परमोत्कर्षः शृङ्गारस्य प्रतिष्ठितः' इति ।

अस्यायं यथासम्प्रदायमर्थः—औपपत्यविषयकप्रेमप्रसङ्गेऽत्रैव व्रजवनिताभिः पराङ्गनाभिः सह सर्वरसलीलालवालस्य भगवतो मधुरशृङ्गारस्य, उज्ज्वलाख्यरसस्य चरमोत्कर्षत्वं प्रतिष्ठितम्, अर्थात्—भगवतो व्रजाङ्गनानां च परस्परं जाराभिमतशृङ्गारकेलिष्वेवोज्ज्वलशृङ्गारः प्रकाममौत्कृष्ट्यं भजते । तथाहि—परकीयारतिर्हि सततं बहुवारिता, यत्र

उल्लिखिताः। तत्र मधुररसे केवलं कृष्णवल्लभा एव नायिका इति मधुररससमयः। तत्र तु द्वावेव भेदौ—स्वकीया परकीया चेति। न तत्र सामान्यायाः तृतीयो भेदः। तयोर्दास्यः, सख्यश्च स्वकीयापरकीययोरेवान्तर्गता।

गोकुलकन्यासु या बालाः श्रीकृष्णे पतिभावेनानुरक्तास्ताः स्वकीया एव बोद्धव्याः। भगवति पतिनिष्ठायां सत्यां तासां विषये स्वीयाया एवौचित्यात्।

परकीया च द्वेधा--कन्या परोढा चेति। अतः परं कृत्स्नमपि विवेचनमेतत्-सम्प्रदायानुरूपमेव। तत्र नायिकानां त्रय उपभेदाः—'साधनपरा', 'देवी' (देव्यः), 'नित्य-प्रिया' चेति। आद्याया द्वौ भेदौ-'यौथिकी' 'अयौथिकी' चेति। श्रीकृष्णोपनिषदुक्तदिशा पूर्वजन्मनि श्रीरामचन्द्ररूपमाधुर्यमुग्धा मुनयो भगवन्तं पतित्वेन कामयाञ्चक्रुः। ते च संहत्य स्त्रीत्वं प्राप्य गोकुले समुद्भूताः। एकशो भगवद्रागरञ्जिताः साधनपरायणा ये मुनयो यथासमयं व्रजे नारीत्वं भेजिरे, ताः साधनपराः। याश्च सुरयुवतयो भगवत्-प्रेमबद्धा व्रज उद्भूतास्ता देव्यः। राधा-चन्द्रावली-विशाखा-ललिता-श्यामा-पद्मा-शैव्या-धनिष्ठा-भद्रिका-तारा-विचित्रा-पालिकाद्याऽङ्गना यूथाधीश्वर्यः। इत्थं शताधि-कानि रमणीयूथानि सन्ति, यत्र सर्वा आनन्दकन्दस्य भगवतो नित्यप्रियाः सन्ति।

गौडीयवैष्णवपरम्परागतनिष्ठाश्रद्धावनुश्रुतीश्चोपजीव्य भेदोपभेदान् विस्तर-पूर्वकं परिचाय्य एतदुक्तम्—पञ्चधा वृन्दावनेश्वर्याः सख्यः—'सखी', 'नित्यसखी', 'प्राणसखी', 'प्रियसखी', 'परमश्रेष्ठसखी' चेति। अत्र सर्वञ्चैतत्साटोपं न्यरूपि। परं तत्तु सर्वं सम्प्रदायानुगतमिति प्रकृतानुयोगादुपेक्ष्य अत्रेदमेव व्याहरणीयं यत्—

कामुकत्वं च प्रच्छन्नम्, नायकनायिकयोः समागमोऽपि तत्र नितरां दुर्लभ इति, अतश्च तस्यां परकीयारतौ रसस्य परमोत्कर्षत्वं सिद्ध्यति। एषा च व्याख्या गौडीयवैष्णव-भक्तमतानुगता एव। परं व्यवहारेषु तदानीमर्थस्याध्यात्मभावमुपेक्ष्य समाजे विलासि-जनेप्सितप्रदाः प्रादुरासीत्।

उक्तं हि श्रीरूपगोस्वामिचरणैः—

लघुत्वं त्वत्र यत्प्रोक्तं तत्तु प्राकृतनायके।
न कृष्णे रसनिर्यासस्वादार्थमवतारिणि॥ इति

अर्थात्—लोकव्यवहारमूलकधर्ममर्यादावशात् सामान्यलोकजीवने लौकिकशृङ्गारसन्दर्भे एव परकीयासम्बद्धोपपतिनिष्ठायाः परस्त्रीरत्या अपकृष्टत्वं हेयत्वं च। न खलु तथाऽलौकिक-मधुररसप्रसङ्गे श्रीकृष्णसम्बन्धे। तेषां किलावतार एव गौडीयमतेन भक्तानामुज्ज्वलशृङ्गारस्या-स्वादनाय।

उज्ज्वनीलमणिग्रन्थे नायकनायिकाभेदाः कृष्णभक्तिसम्प्रदायानुगताः सन्ति, यत्र पौराणिकी साम्प्रदायिकी च मताग्रहदृष्टिरभिनिविष्टा वर्तते। अत एवं तत्र नायिकाभेदाः समाजानुगता जीवनानुगताश्च न सन्ति, अपि तु एतत्सम्प्रदायानुगता एव। एवञ्च स्थूलदृष्टिमतिक्रम्य सम्प्रदायसिद्धान्तमनुहरन्तीति। तत्र वर्णितानां नायिका-नायकानां स्वरूपं न खलु लौकिकसमाजानुरूपम्, अपि तु तन्निरूपणं गौडीयमत-मान्यताऽनुसारि आध्यात्मिकभूमिकाप्रतिष्ठितं चेत्यलम्।

अतश्च नायिकाभेदनिरूपणप्रसङ्गे सामान्यायाः सत्तामस्वीकृत्य नायिकाभेद-सम्प्रदायसमयोऽप्येभिरुपेक्षितः। भक्तिरससमयानुसारं मधुरायाः प्रीतेः, प्रेम्णो रतेर्वा स्थायिभावरूपेण प्रतिष्ठात्र नितरामपेक्ष्यते। सत्यनन्ये गाढप्रेमणि एव सर्वतो-भावेन पतिरूपेण प्रियतमरूपेण वा भगवतो मधुरोपासनायां स्वीयाभावः परकीयाभाव एव वा सम्भवति, न सामान्याभावः। एतत्सिद्धान्तदिशा माधुर्यमेवैकमालम्बनम्, नायकोऽपि रसानन्दमूर्तिः केवलं व्रजेन्द्रनन्दन एक एव त्रिकालाबाधितः, तदतिरिक्तस्य नायकस्य यत्र सम्भावनापि न विद्यते, तत्र खलु का नाम सामान्यानायिका स्यात्। किञ्च लीलाविग्रहम्, आनन्दकन्दं व्रजचन्द्रं विहाय कोऽन्यो वात्र नायकः! एतदनुसारं सैरन्ध्र्यपि परकीया एव।

एवञ्चात्र नायिकाया द्वावेव भेदौ—स्वकीया-परकीया च। मुग्धामध्याप्रगल्भाः स्वकीयाभेदा इति बहवो नायिकाभेदाः, परन्तु मधुरोपासका रसाचार्यास्तु परकीयाया अपि एते भेदा इति व्याजह्रुः।

क—मुग्धाया अवान्तरभेदाः—

१—'नववयाः', २—'नवकामा', ३—'रतौ वामा', ४—'सखीवशा', ५—'सव्रीडरतप्रयत्ना', ६—'रोषकृतदाष्पमौना', ७—'माने विमुखी'।

ख—मध्याया अवान्तरभेदाः—

१—'समानलज्जामदना', २—'प्रोद्यत्तारुण्यशालिनी', ३—'किञ्चित्प्रगल्भ-वचना', ४—'मोहान्तसुरतक्षमा', ५—'माने कोमला', ६—'माने कर्कशा' (धीराऽ-धीरा-धीराधीरेति भेदा एतदतिरिक्ताः)।

ग—प्रगल्भाया अवान्तरभेदाः—

१—'पूर्णतारुण्या', २—'मदान्धा', ३—'उरुरतोत्सुका', ४—'भूरिभावोद्गमा-भिज्ञा', ५—'रसाक्रान्तवल्लभा', ६—'अतिप्रौढवचना', ७—'अतिप्रौढचेष्टा', ८—'माने अत्यन्तकर्कशा', (मानवृत्त्यनुसारं धीरा, अधीरा, धीराधीरा चापि)।

गौडीयवैष्णवपरम्परायां सर्वाधिकरसास्पदं खलु मध्यैव। तत्र कारणं हि मध्यायां मुग्धावन्मनोमोहनकारिणीत्वम्, प्रौढावच्च मादकप्रागल्भ्यमिति द्वयोः मिश्रणमत्र प्रकामं खलु परिलक्ष्यते। एवञ्च मौग्ध्यप्रागल्भ्ययोःस्सन्धिरूपा मध्यावस्था एव मधुररसे मनोरमतमा पूर्णतश्च रसास्पदम्।[1]

उढानूढयोर्मध्ये अनूढैव कन्या। कन्याया एक एव भेदः—मुग्धा इति। परं स्वीयायाः परोढाया वा पूर्वोक्तमुग्धादिभेदत्रैविध्यमस्त्येव।[2]

इमे सर्वे भेदा लक्ष्यलक्षणसहिता निरूपिताः। तदनन्तरम् [3]अभिसारिकाद्यष्टा-वस्था नायिका अपि विवृताः। अत्रापि विभागद्वयम्--(क) हृष्टा (ख) खिन्ना चेति। तत्र 'स्वाधीनपतिका' 'वासकसज्जा', 'अभिसारिका', इमास्तिस्रो नायिका हृष्टाः, आतश्चेमाः 'मण्डिता' ('सज्जिता' 'शृङ्गारसुभगा' वापि)। अवशिष्टाः पञ्च नायिकाः खिन्ना इति, ताश्च मण्डनवर्जिता एव।

व्रजेन्द्रनन्दनं प्रति सप्रेमभक्तेः, मधुराया रतेर्वा गाढतायास्तारतम्यानुसारेण नायिकाः—उत्तमामध्यमाकनिष्ठाः भवन्ति।

गौडसम्प्रदायानुगतरसपद्धत्यनुसारम्-यूथेश्वरी-दूती-(सा च द्विधा-स्वयंदूती, आप्तदूती च) सखीदूती-सखी-सखीविशेषहरिवल्लभाप्रभृतीनां वर्णनं यथाविस्तरं तत्र कृतं वर्त्तते।

संक्षेपेण गौडसम्प्रदायाभिमतनायिकाभेदवैशिष्ट्यं निर्दिश्यते—

(क) कृष्णस्य तद्वल्लभानाञ्चालम्बनत्वम्। रसमूर्तिकृष्णस्य आध्यात्मिकं नायकत्वं गौडसम्प्रदायानुगतमेव। तत्र नायकस्यैक्यम्, नायिकानाञ्चानन्तता। तत्रापि अनन्तायां सत्यामपि ईर्ष्यां विहाय सर्वासाम् एकत्र भगवत्येव सर्वासामेकोन्मुखी गाढा मधुरा च रतिः, पत्युपपतिभावौ च।

१--सर्व एव रसोत्कर्षो मध्यायामेव युज्यते।
यदस्यां वर्तते व्यक्ता मौग्ध्यप्रागल्भ्ययोर्युतिः॥

२--सामान्यतो नायिकाः पञ्चदशधा—१-कन्या मुग्धा, २-स्वीया मुग्धा, ३-स्वीया धीरमध्या, ४-स्वीया अधीरमध्या, ५-स्वीया धीराधीरमध्या, ६-स्वीया धीरप्रगल्भा, ७-स्वीया अधीरप्रगल्भा, ८-स्वीया धीराधीरप्रगल्भा चेति। अत्र द्वितीयतोऽष्टमं यावत् सप्तोपभेदा परकीयाया अपि भवन्ति। तदेवं सङ्कलनया ८+७=१५ पञ्चदश भेदा जाताः, किञ्च अष्टा-वस्थाद्योतकाष्टसङ्ख्यया गुणिता (१५×८=१२०) विंशत्युत्तरैकशतं भेदाः सञ्जाताः। तत्रापि प्रत्येकम्-उत्तमा-मध्यमा-कनिष्ठादिभेदत्रैविध्येन (१२०×३=३६०) षष्ट्युत्तर-त्रिशद्भेदाः पर्यवस्यन्ति।

३—गौडीयदर्शनेऽपि अभिसारिकाया द्वौ भेदौ—अभिसरणकर्त्री, अभिसारयित्री चेति स्वीकृतम्।

२—अत्र सिद्धान्ते उपपतिर्नाम आलम्बनात्मिकायाः परकीयारतेर्मधुरशृङ्गारे परमोत्कर्षस्वरूपता। एवम् भगवद्विषयिकाया औपपत्यप्रीतेर्महनीयगौरवास्पदत्वं च।

३—सामान्याया अस्वीकारः, अथ च परकीयायामपि मुग्धामध्याप्रगल्भेति भेदत्रैविध्यस्वीकारः।

४—मध्यायां रसस्य सर्वोत्कृष्टत्वप्रतिपादनम्, किञ्च कृष्णं प्रति माधुर्यप्रीतेस्तारतम्येन नायिकागता उत्तमादिभेदाः।

५—नायिकादिसन्दर्भे पौराणिकानां गौडसाम्प्रदायिकानाञ्च गाथानामनुश्रुतीनां सिद्धान्तानाञ्च यथाभेदमाकलनम् इति।

वीरेन्द्र-रीसर्च-सोसाइटी–राजशाही, बंगाल-(सम्प्रतिबंगलादेश) प्रकाशितं सम्प्रदायस्यास्य मुख्यं ग्रन्थान्तरमस्ति कविकर्णपूरविरचितमलङ्कारकौस्तुभम्।

श्रीकविकर्णपूरमतानुसारं हि रति-प्रीति-मैत्र्यादयो गुणास्तद् (भगवद्)-रूपा एव। तत्र स्त्रीपुंसयोर्युगलीभूय व्यवहारं रतिः। सा च सम्प्रयोगविषया। या तु असम्प्रयोगविषया, सा प्रीतिरुच्यते। इत्थमेव मैत्रीसौहार्द्रदेवरतिप्रभृतिभावान् परिचायं-परिचायं रसस्तावत् सुष्ठु निरूपितः। शृङ्गारनिरूपणं खलु श्रीमद्रूपगोस्वाम्युक्तदिशा कृतम्। सामान्या नाङ्गीकृता, स्वीयायाः परकीयायाश्च मुग्धादिभेदत्रैविध्यमङ्गीकृतम्। स्वोढापरोढारूपभेदयुगलीं, वासकसज्जाद्यष्टावस्थाश्चाश्रित्य द्व्यधिकैकशतं नायिकाः पर्यवस्यन्ति। कन्यारूपाया अनूढापरकीयायाश्चत्वार उपभेदाः—(क) ज्येष्ठा, (ख) कनिष्ठा, (ग) अत्यन्तमृद्वी, (घ) मध्यमृद्वी चेति। प्रकृत्यनुसारं चात्युत्तमोत्तमामध्यमा चेति त्रयो भेदाः। साधनोपासनानुसारं चान्येऽपि त्रयो भेदाः—'सिद्धा', 'सुसिद्धा', 'नित्यसिद्धा' इति। ततश्च संकलनया १३×२=२६, २६×८=२०८, २०८+४=२१२, २१२×३=६३६, ६३६×३=१९०८ अष्टोत्तरनवशताधिकैकसहस्रं नायिकाः पर्यवस्यन्ति।

अत्रायं निष्कर्षः—अत्र सिद्धासुसिद्धानित्यसिद्धेति त्रयो भेदा नवीना एव। किञ्च उत्तमामध्यमाकनिष्ठास्थानेऽत्युत्तमोत्तमामध्यमेत्याद्युक्ता इति।

मन्दारमरन्दचम्पूः[1]—

कृष्णकविविरचितेऽस्मिन् ग्रन्थे विशेषमहत्त्वस्य विषया नाधिकाः। अत्र मुग्धादित्रैविध्यं स्वीयागतमेव। मुग्धायाश्च ज्ञातयौवना अज्ञातयौवना चेति भेदद्वयी।

---

१. काव्यमाला (सिरीज ५२)।

ग्रन्थकृता पुनरत्र भेदद्वैविध्यमूरीकृतम्—शुद्धनवोढा, विश्रब्धनवोढा चेति। मध्यागतं प्रौढागतं चात्र किमपि नावीन्यं नास्ति, केवलमनयोर्ज्येष्ठा कनिष्ठा चेत्युपभेदावुक्तौ।

अत्रेदं सावधानेनावधेयम्—सामान्या परकीया च द्वे अपि प्रौढे एवेति [1]कृष्ण-कविमतम्। न ते मुग्धामध्ये।

सामान्या परकीया द्वे प्रौढे इत्येव सम्मते।

(द्र० काव्या० पृ० ८०)

किञ्च—वासकसज्जाद्यष्टभेदा मुग्धातिरिक्तानामन्यासां नायिकानामेव भवन्तीति स्वकीयं कृष्णकवेरभिमतं मतम्। केषाञ्चिन्मते मुग्धाया अपि इमे अष्टभेदा भवन्तीत्यपि स एव। किञ्च दिव्याऽदिव्यादिव्यादिव्येति त्रयो विभेदा अपि नायिकानां भवन्तीति तन्मतम्। एतन्मतं कैश्चन भरतादिभिरेवोक्तं न सर्वैरालङ्कारिकैः। उद्धतोदात्ता-ललिताशान्तेतिभोजीयभेदा अप्येतत्सम्मतम्। **"कथिता पूर्वैर्भोजादिभिर्बुधैः"**—इति व्याहरताऽनेन **क्षताऽक्षतायातायातायायावरेति** भेदा सोदाहरणं निरूपिताः। परमत्र ग्रन्थकृदुक्तिस्तु "युगपदनैकैरूढा यातायातेति स्वांकृता" इत्युक्त्वा च—द्रौपदी तेनोदाहृता। भोजविषये सोक्तिर्भ्रान्तिमूलैव। भोजेन बृहस्पतिपत्नी तारा यातायातेत्युक्ता। पूर्वपृष्ठे तदुल्लिखितं वर्तते।

कामशास्त्राभिमता पद्मिन्यादिचतुर्भेदा अपि अनेन स्वीकृताः। किञ्च—आयुर्वेददिशा प्रकृतिभेदमुपजीव्य कफिनी-वातला-पित्तलेति भेदा अप्युक्ताः। अभिसारिका-प्रसङ्गे च दिवाभिसारिकाश्यामाऽ-(निशा) भिसारिकेति भेदयुगली, तत्र श्यामाभिसारिकायाः शुक्ला कृष्णा चेति पुनर्द्वौ भेदौ। किञ्च सरस्वतीकण्ठाभरणोक्तदिशा नायिका, प्रतिनायिका, उपनायिका, अनुनायिका चापि निरूपिताः

ग्रन्थोऽयं चम्पूः, अतो गद्यं पद्यं चात्र यथास्थानं विषयनिरूपणप्रसङ्गे दृश्येते एव। परमुपर्युक्तप्रकरणेऽस्मिन् पद्यमेवास्ति। तच्च प्रायशोऽनुष्टुम्मयम्। आदौ नायिकानां भेदोपभेदा नामग्राहं गृहीताः, ततः संक्षेपेण लक्षणान्युदाहरणानि च दृश्यन्ते। अत्र लक्ष्याणि यद्यपि कविकृतान्येव तथापि तानि लक्षणानुकूल्यप्रदर्शकान्येव, न तु काव्यरूपशृङ्गारविलासमनोरञ्जनवर्द्धकानीति न वा शृङ्गारपरककाव्योदाहरणानि।

नाटकलक्षणकोशः—

ग्रन्थेऽत्र नायिकानिरूपणं परम्परागतसरण्यपेक्षया किमपि नावीन्यमाधत्ते[2]।

---

१. काव्या० १०८०।

२. (द्र० नाटकलक्षणरत्नकोशः)।

ग्रन्थस्य कर्ताऽऽचार्यसागरनन्दी, खल्वादौ पूर्वाचार्यवत् स्वीयापरकीयासामान्येति भेदनिरूपणमपास्य प्रथमतः खण्डिताविप्रलब्धेत्याद्यष्टभेदनिरूपणप्राथम्येन विषयोपस्थापनं कृतवान् । किञ्च—अभिसारिका, कुलजा, वेश्या (क्रमशः स्वीया, सामान्या) चेति द्विधोक्ता । परकीयायास्तु चर्चैव नास्ति । तच्च कदाचिन्नाट्यसूत्रोपनिबद्धप्रसङ्गप्रभावात् ।

आचार्यभरतेनापि नानासत्त्वसमुद्भवा प्रकृतिस्त्रीणां विविधेत्युक्तम् । यथा—बाह्या, आभ्यन्तरा, बाह्याभ्यन्तरा चेति । तत्र बाह्या वेश्या, आभ्यन्तरा कुलीना, बाह्याभ्यन्तरा कृतशौचेति ।

तत्र बाह्याभ्यन्तरे नायिके विवृते, परं तृतीया कृतशौचाभिधा बाह्याभ्यन्तरा नायिका सम्भवतः नाट्यानुपयोगित्वेन न व्याख्याता, अतश्च न सा स्फुटमवगन्तुमर्हेत्युपपादितं प्राक् । किञ्च—अष्टावस्थानायिकाभेदप्रसङ्गान्तर्गताभिसरणसन्दर्भे वेश्या-कुलजा-प्रेष्याश्च चर्चिताः । 'परकीया' शब्दः भरतेन कुत्रापि नोक्तः । सागरनन्द्याचार्यकाले प्रेष्याशब्दो दूतीमभिधत्ते स्म । अतस्तत्रापि मुख्यतो द्वौ भेदावेव पर्यवस्यतः । स्यादेतत्—नाटकलक्षणरत्नकोशग्रन्थो यां परम्परामाश्रित्य प्रणीतः, तस्यां परम्परायां परकीया लोकसम्मता न भवेदिति तत्र स भेदो नोक्त इति प्रतीयते ।

अग्रे ग्रन्थकर्ता—भरतदिशा अभिसरणरीतिमुक्त्वा तदनुकूलान् नवसमयानपि व्याहरन् तत्र कुलजायाः कृते गोधूलिवेला सर्वथोपयुक्तेति केषाञ्चिन्मतमित्यवादीत् । यद्यपि कामबाणजर्जरितानां कृतेनास्ति कालप्रतिबन्ध इति रसिकसमयः । किञ्च उपर्युक्ताष्टातिरिक्ता सभ्या नायिकाऽपि नवमा स्वीकृता । सभ्या नाम सा या—पतिगृह एव निरन्तरं भीता शारीरिकसुखावसरं लब्ध्वापि यदा कदाचिद् हृद्येव निगडितमिव मनोऽभिलाषं संस्थाप्य तूष्णीमास्थिता । (सभ्या च स्वीयाया एव भेदविशेष इति वक्तुं पार्यते) ।

मानप्रसङ्गे चात्र ग्रन्थे मुग्ध-मनाङ्मुग्ध-समृद्धातिसमृद्धभेदा उक्ताः, परं लघुमाना-मध्यमाना-गुरुमानेतिभेदा नोक्ताः । नात्र किञ्चिदपरं वैशिष्ट्यम् ।

शृङ्गारमञ्जरी—

अयं 'बड़ेसाहेब' इत्यपराख्येन सन्त-अकबरशाहमहोदयेन रचितो ग्रन्थः । एष च पश्चात्कालिकोऽपि काव्यशास्त्रीयपरम्परायां महान्तं महिमानमाधत्ते । एष हि ग्रन्थः एकपञ्चाशदुत्तरैकोनविंशतिशततमख्रैस्ताब्दे हैदराबादराज्यस्य पुरातत्त्वविभागद्वारा प्राकाश्यमानीतः, डा० राघवमहोदयेन च सम्पादितः । ग्रन्थस्यास्य विशालपृष्ठका-

यस्य भूमिका षोडशाधिकशतपृष्ठात्मिका वर्तते, यत्र विदुषा सम्पादकेन महता परिश्रमेण तत्तत्पाण्डुलिपीरुपजीव्य ग्रन्थविषयाः प्रकाशिताः ।

कुतुबराज्यस्यान्तिमः शासकः 'अबुलहसन' आसीत्, यदीयो राजगुरुसन्तशाहराजू आसीत्, तज्ज्येष्ठपुत्रः सन्त-अकबरशाह आसीत्, यः खलु 'बड़े साहब' इति ससम्मानं व्याह्रियते स्म, तेनैव ग्रन्थोऽयं आन्ध्र—(तेलुगु) भाषायामारचितः । ग्रन्थकारस्य पूर्णं नाम 'हजरत सइय्यद अकबरशाह हुसैनी' इति ।

स एव ग्रन्थः संस्कृतेऽनूदितो विद्वद्भिः, शृङ्गारमञ्जरीत्याख्यया विख्यापितः ।

अस्य नवस्य ग्रन्थस्य रचनाप्रयोजनं निर्दिशतादावेवोक्तम्—

"रसमञ्जरी आमोदपरिमल-शृङ्गारतिलक-रसिकप्रिया-रसार्णव-प्रतापरुद्रीय-सुन्दशृङ्गार-नवरसकाव्य-दशरूपक-विलासरत्नाकर-काव्यपरीक्षा-काव्यप्रकाशप्रमुख-ग्रन्थान् विचार्य प्राचीनेषु यानि लक्षणानि युक्तियुक्तानि, तानि सङ्गृह्य अन्यानि परित्यज्य प्राचीनोदाहरणानुसारेण नायिकाभेदान् कल्पयित्वा, येषामुदाहरणानि न सन्ति तेषामुदाहरणानि विरचय्य, येषां नामानि न सन्ति तेषां नामानि स्थापयित्वा ……प्राचीनलक्षणेषु यान्युपयुक्तान्युदाहरणानि तानि तत्तन्नायिकास्थलेषु लिखित्वा चर्चाग्रन्थो गद्यरूपो लक्षणग्रन्थः, फक्किकारूप उदाहरणग्रन्थः, पद्यरूपो लक्षणोदाहरणे नायिकाभेदाः शृङ्गारः नवरसेषु शृङ्गारस्य प्राधान्यात् शृङ्गाररसालम्बनविभावा नायिकानायकाः, शृङ्गाररसानुकूलाः, सात्त्विकभावाः, पूर्वोक्तग्रन्थवर्णितपद्मिन्यादिजातयो जातिसंस्कारो जातिभेदाश्चैवं सरसाशेषविशेषा निरूप्यन्ते[1]" ।

अनया उपक्रमप्रस्तावनया विवेच्यग्रन्थस्य समस्तमुख्यवैशिष्ट्यं सूच्यते ।

१—एतस्य लेखकेन सम्बद्धविषयाणामनेकेषां ग्रन्थानां सम्यगालोडनं कृत्वैव विवेच्यग्रन्थस्य रचना कृता ।

२—प्राचीनानां ग्रन्थानां लक्षणोदाहरणानां विश्लेषणात्मके परीक्षणसंशोधने अपि कृते ।

३—यदा च विषयनिरूपणप्रसङ्गे आवश्यकता परिलक्षिता, तदा नवलक्षण-नवीनलक्ष्यविषयसम्बन्धिनूतनभेदोपभेदनवीननामकरणानि चापि विहितानि ।

४—विषयस्य गौणत्वं महत्त्वं वाऽनुसृत्य प्रसङ्गस्य संक्षेपणं विस्तारणं वा कृतम् ।

---

१. द्र० शृङ्गारमञ्जरी—पृ० २, (हैदराबादपुरातत्त्व—विभागसंस्करणम्) ।

५—नवरसेषु शृङ्गारस्य प्राधान्येन शृङ्गारसम्बन्धिनायिकानायकभेदानां शृङ्गाररसानुकूलसात्त्विकभावादीनां पद्मिनीचित्रिणीशङ्खिनीहस्तिनीप्रभृतिजातियोषितां च निरूपणं कृतम्[1]।

६—प्रसङ्गेऽत्रेदमवधेयम्—उपर्युक्तग्रन्थविवरणे द्वौ हिन्दीभाषामयौ ग्रन्थावपि गृहीतौ—(क) केशवदासकृता 'रसिकप्रिया',(ख) सुन्दरदासकृतः 'सुन्दरश्शृङ्गारश्चेति।

एतस्मिन् ग्रन्थे विषयाः सविस्तरं सम्यक् विवेचिता निरूपिताश्च। विषय-विवेचनस्य मुख्य आधारभूतो ग्रन्थः भानुदत्तस्य रसमञ्जरी, तस्याश्च द्वे अप्रकाशिते टीके—'आमोदपरिमले'। तत्रापि मुख्यत आमोदस्य सहायता उररीकृता। बहुषु स्थलेषु रसमञ्जरी मतानुसारि लक्षणं पूर्वपक्षरूपेण उपस्थापितम्। अव्याप्त्यतिव्याप्त्या-दिदोषनिराकरणसरण्या उत्तरपक्षरूपेणामोदकारसिद्धान्तमतोपस्थापनं सादरं उपन्यसता ग्रन्थकारेणोक्तम्—'आमोदकारास्तु' इति। बहुधा चामोदवर्णितपक्ष एव समर्थितः। यदा कदा च तस्य पक्षं प्रत्याख्यायता शृङ्गारमञ्जरीकारेण स्वतन्त्रं स्वमतमुपस्थापितम्।

अस्मिन् व्याख्यात्मकसमालोचनप्रसङ्गे या सरणिः स्वीकृता, तस्यां विषयाणां लक्षणाख्याने वैशिष्ट्यं वर्तते, विषयविभाजने भेदोपभेदकथने वा सरणिगता विशिष्टता लक्ष्यते। यदा कदा च लक्ष्योदाहरणेष्वपि नवीनता सूचिता वर्तते।

विवेच्यमान एतस्मिन् ग्रन्थे भेदोपभेदनिरूपणप्रसङ्गे केचन नवीना अपि उपभेदा उपस्थिताः, परन्तु तत्र नवीनोद्भावनापेक्षया तद्युगीनवासनात्मकविलासिताया एव सूचनं परिलक्ष्यते। परमत्र किञ्चिद् वैशिष्ट्यमपि परिदृश्यते। मुगलसम्राजां राज-सभासु, आभिजात्यवर्गेषु तस्मिन् युगे वैलासिक्या अभिरुच्याः प्रखरः प्रवाहः प्रवहमान आसीत्। नायिकाभेदविषयकहिन्दीभाषाग्रन्थकारैश्च तदा स्वस्वग्रन्थेषु विषयविवेचन-परकशास्त्रीयप्रौढि विहाय अस्पष्टसंक्षिप्तलक्षणान्यभिधाय शृङ्गारप्रधानाः सुललिता उदाहरणभूताः समुद्दीपिकाः काव्यरचनाः कृताः, परन्तु अत्र शास्त्रीयपक्षनिरूपणं सम्यक् प्रौढत्वं भजते।

---

१. इदानीं वात्स्यायनमतानुसारेण गुणैर्हस्तिन्यादिनायिकाभेदाः, भद्रादिनायकभेदाश्च निरूप्यन्ते। हस्तिनी-चित्रिणी-शङ्खिनी-पद्मिनीगुणेभ्यो भद्रदत्त-कुचमार-पाञ्चालगुणानामभिन्नत्वात् प्रत्येकमेषामुदाहरणानि (न) लिखामः। हस्तिन्यादिनायिकासु परस्परगुणसाङ्कर्येण जाति-सङ्कराः स्त्रियो जायन्ते।

(द्र० शृङ्गारमञ्जरी पृ० ५४)

ग्रन्थेऽत्र नायिकाभेदाः—

अत्र अज्ञातयौवना ज्ञातयौवना चेति मुग्धाया भेदद्वयम्। तत्र द्वितीयाया द्वौ उपभेदौ—(क) नवोढा (ख) विश्रब्धनवोढा चेति। अतिविश्रब्धरूपमध्याभेदस्यात्र सयुक्तिकं खण्डनं विद्यते। प्रच्छन्नमध्या प्रकाशमध्येति मध्याया द्वावुपभेदौ उक्तौ। इमौ च नवीनाविति प्रतिभाति। प्रगल्भाया द्वावुपभेदौ—(क) रतिप्रीतिमती, (ख) रत्यानन्दपरवशा चेति।

धीराधीरादिभेदविषये च कोपमुपजीव्य रसमञ्जरीकृता तौ भेदौ परकीयायाः सामान्याया अपि स्वीकृतौ, एतच्च शृङ्गारमञ्जरीकृतापि समर्थितम्। परं परकीयाया एको विशेषो भेद उद्बोधितेति, तस्या एव इमावुपभेदौ। एतच्च पश्चाद् व्याहरिष्यते।

एतद्ग्रन्थदिशा परकीयाया द्वौ भेदौ--अन्या परोढा च। द्वितीयस्याः पुनरुपभेदौ--उद्बुद्धा (स्वयमनुरागिणी) उद्बोधिता (नायकप्रेरितानुरागवती) चेति। उद्बोधितायाः पुनर्भेदाः--धीरा, अधीरा, धीराधीरा चेति। उद्बुद्धाया अपि तावन्त एव—गुप्ता, निपुणा, लक्षिता चेति। अत्र न खलु भानुदत्तवत् परकीयाषाड्विध्यमङ्गीकृतम्, अपि तु भेदत्रयमेव।

गुप्तायास्त्रयो भेदाः--वृत्तसुरतगोपना-वर्तिष्यमाणसुरतगोपना-वृत्तवर्तिष्यमाणसुरतगोपनाभेदात्। निपुणाऽपि तावद्भेदवती एव--'वाङ्निपुणा', 'क्रियानिपुणा', 'पतिवञ्चननिपुणा' चेति। तत्राद्यौ भेदौ-पूर्वप्रसिद्धभेदयोर्वाग्विदग्धा-क्रियाविदग्धयोर्नामान्तरमेव, तृतीयस्तु नवीन एव। स च तात्कालिकमुस्लिमप्रासादेषु--राजपुत्रप्रासादेषु व्याप्तानाभिचारं परिचाययतीति अनुमीयते।

लक्षिताया द्वौ भेदौ--'प्रच्छन्नलक्षिता' 'प्रकाशलक्षिता' चेति।

परकीयाया ये अन्ये त्रयो भेदा उपर्युक्ताः पूर्वप्रसङ्गे मुख्यतो नामग्राहं नोक्ताः, ते तु प्रकाशलक्षिताया अवान्तरभेदा एव। प्रकाशलक्षिताश्चतस्रः--(क) कुलटा, (ख) मुदिता, (ग) अनुशयाना; (घ) साहसिका चेति। अनुशयानास्तिस्रः--(क) 'विघटितसङ्केता', (ख) 'अप्राप्तभाविसङ्केता', (ग) 'शङ्कितसङ्केतजारगमना' चेति। अत्र एतत्सूचितं वर्तते, यद्यपि रसमञ्जरीकृता अनुशयानाया भेदत्रितयी एवोरीकृतास्तथापि आमोदकारदर्शितदिशा अधिकभेदाः सम्भवन्ति।

अत्र 'साहसिका' इति भेदो नवीन एव, तात्कालिकीं मनोवृत्तिं सूचयति। एतस्य लक्षणं तत्र वर्तते--साहसकृतजारसम्भोगा साहसिका इति।

ग्रन्थेऽत्र सामान्यायाः पञ्च नवा उपभेदा उक्ताः--(१) 'स्वतन्त्रा', (२) 'जनन्य-धीना', (३) 'नियमिता', (४) 'क्लृप्तानुरागा', (५) 'कल्पितानुरागा' चेति।

'नियमिता' इत्यस्य तात्पर्यम्--या विवाहमन्तरापि धनलोभात् कञ्चिदेकं पुरुषमाश्रित्य नियतसम्बन्धस्थापना स्यात्।

धनेच्छया बहुभिर्भुक्तापि या एकत्र पुरुष एवानुरागं विधत्ते, सा 'क्लृप्तानु-रागा' इति। या तु धनार्थं केवलमनुरागमभिनयति, न तु वस्तुतोऽनुरज्यते सा 'कल्पितानुरागा' इति। सामान्याया इमे भेदास्तात्कालिकीनां गणिकानां विभिन्न-विधानां स्वरूपाणि परिचाययन्ति।

ग्रन्थेऽत्र 'अन्यसम्भोगदुःखिता', 'मानवती' च खण्डिताप्रसङ्गे निरूपितेति। वक्रोक्तिगर्विता च अष्टावस्थातिरिक्ता नवमी नायिका कल्पिता। अतश्च स्वाधीनपतिका-दयोऽष्टभेदा एव न, अपि तु नव भेदाः। अत्र प्रत्येकं क्व क्व स्वीयादिभेदाः स्वीक्रियन्ते इत्येतत् सर्वं सविवेचनं लक्ष्यलक्षणसमन्वितं यथायुक्ति निरूपितम्। अत्र निरूपणं कियद् युक्तिसम्मतं कृतमिति स्वाधीनपतिकाभेदप्रसङ्गे द्रष्टव्यम्। तदाष्टविध्यं यथा—'स्वीया'–'मुग्धा'–'मध्या'-प्रगल्भा'–'परकीया'-'सामान्या'-'दूतीवञ्चिका'-'भावि-शङ्किता' चेति। एवमेव वासकसज्जामध्ये 'अवसितप्रवासपतिका' इति वर्तते, न तु प्रोषितपतिकामध्ये। इत्थं विरहोत्कण्ठिताया द्वावुपभेदौ—'कार्यविलम्बसुरता' 'अनुत्पन्नसम्भोगा' चेति। अनयोर्द्वितीयस्याः पुनश्चत्वार उपभेदाः—१—'दर्शनानुता-पिता', २—'श्रवणानुतापिता', ३—'चित्रानुतापिता', ४—'स्वप्नानुतापिता' चेति।

विप्रलब्धायाश्च द्वौ भेदौ—'नायकवञ्चिता' 'सखीवञ्चिता' चेति। खण्डिता च षड्विधा—'धीरा', 'अधीरा', 'धीराधीरा', 'मानवती', 'अन्यसम्भोगदुःखिता', 'ईर्ष्यागर्विता' चेति। इमे च भेदोपभेदा महता विस्तरेण निरूपिताः, इयान् विस्तरो नान्यत्र लभ्यते।

इत्थमेव च कलहान्तरिताया नायिकाया अपि ईर्ष्याकलह-प्रणयकलहभेदाभ्यां द्वावुपभेदौ। 'प्रेम-सौन्दर्य-सौभाग्य-नैपुण्यान्याधारीकृत्य वक्रोक्तिगर्विताऽपि चतुर्विधा। अवान्तरभेदेषु स्मित-यौवन-सौकुमार्य-विलासप्रभृतीनि वैशिष्ट्यान्यादाय लक्ष्यलक्षणे कृते। प्रोषितपतिका-प्रवसत्पतिका-प्रवस्यत्पतिकातिरिक्तः सख्यनुतापिताऽपि तुरीयभेदः प्रोषितपतिकायाः कृतः।

रसमञ्जरीकारमतेन स्वयमभिसरणकर्त्री नायिकाऽभिसारिका, प्रियं चाभि-सारयति या सा 'वासकसज्जा' इति। अत्रेदं वैशिष्ट्यं यत्—प्रियसमीपमभिसरन्ती

नायिकैव 'अभिसारिका'। अन्यत्र नेयम्। परकीयाभिसारिकाया भेदा अत्र वर्णिताः सन्ति—ज्योत्स्नाभिसारिका, तमोभिसारिका, दिवाभिसारिका, गर्वाभिसारिका, कामाभिसारिका च। अन्योऽप्येको भेदो लक्ष्यते—प्रेमवाक्याभिसारिका।

उत्तममध्यमाधमास्त्रिभेदास्तु ग्रन्थेऽस्मिन्नपि स्वीकृताः। अन्ते च ग्रन्थकृता संक्षेपेण कामशास्त्रीयाः पद्मिन्यादिचतुर्भेदा अपि निरूपिताः।

इत्थं चैतस्य ग्रन्थस्यैतद्वैशिष्ट्यं यदत्र बहूनां नवीनानां भेदोपभेदानामुद्भावना वर्त्तते। अनुवादवशादन्यस्माद्वा कारणादत्र संस्कृतभाषा प्रवाहमयी नास्ति, न वा तत्र शास्त्रीयप्रयोगप्रौढिनैपुण्यं परिलक्ष्यते[1]।

शृङ्गारामृतलहरी, रसरत्नहारः, रसचन्द्रिका च—

अथात्र नायिकाभेदप्रसङ्गे उक्तास्त्रयो ग्रन्था अपि चर्च्या एव। तथाहि—सोमराजकृतशृङ्गारामृतलहर्यां[2] संक्षेपेण शृङ्गारालम्बनरूपेण नायकान्निरूप्या-

---

१—'शृङ्गारमञ्जरी'विषये सूचितं यन्मूलग्रन्थोऽयम् ग्रन्थ आन्ध्र-(तेलगू)-भाषायां विरचितो वर्त्तते—

तेनान्ध्रभाषायां रचितः शृङ्गारमञ्जरी ग्रन्थः।
स्वयमकबरेण भूभृन्मुकुटमणिरञ्जिताङ्घ्रिकमलः॥ (लेन ?)

एतेनोपक्रमणिकापद्येन सूच्यते यत्स्वयं श्रीमता अकबरसाहिना ग्रन्थस्यास्य रचना कृता। अग्रेऽपि तत्रैवोक्तम्—''बड़ेसाहबाकबरशाहः 'शृङ्गारमञ्जरीग्रन्थराजं रुचिरं विरचयति''। अनेन एतदपि यथाकथञ्चिद् व्यज्यते यदस्य संस्कृत-संस्करणमन्यैर्विरचितमिति।

डॉ० भगीरथमिश्रेण 'हिन्दीकाव्यशास्त्र का इतिहास' नामा हिन्दीभाषामयो ग्रन्थः कश्चन व्यरचि। ग्रन्थस्यास्य नवीनसंस्करणे 'शृङ्गारमञ्जरी' ग्रन्थस्य यो हिन्दीभाषाऽनुवादो वर्तते, स त्वाचार्यचिन्तामणित्रिपाठिना लिखित इत्यभाणि, परं तत्रैव ग्रन्थे पश्चात् स्वोक्ति विशदीकुर्वता श्रीमिश्रेणावादि यत्—'अस्य (बड़ेसाहेबाकबरशाहस्य) कृते चिन्तामणित्रिपाठिना प्रथमं तेलुगुभाषायां रचितस्य, ततः संस्कृतेऽनूदितस्य शृङ्गारमञ्जरीग्रन्थस्य व्रजभाषायामनुवादो विहितः, एषा सैव 'शृङ्गारमञ्जरी' अस्ति। हिन्दीभाषात्मकस्य 'शृङ्गारमञ्जरी'ग्रन्थस्य सम्पादनं डॉ० भगीरथमिश्रेण, प्रकाशनं च लक्ष्मणपुरविश्वविद्यालयेन कृतमिति। ततश्चायं निष्कर्षः—

'शृङ्गारमञ्जरी' नामको मूलग्रन्थो हि तेलगूभाषायामारचितः, बड़ेसाहेबमहोदयेन यो हि संस्कृतेऽनूदितः, अनुवादितो वा, तस्य पुनर्हिन्दीरूपं हि आचार्यचिन्तामणित्रिपाठिना कृतम्, ततश्च नायं कर्त्तुरुपज्ञाऽस्ति ग्रन्थः, अनूदितत्वात्। किञ्च ग्रन्थेऽत्र विषयनिरूपणे यच्छास्त्रीयविश्लेषणरूपा विस्तृता विवेचनशैली दृश्यते, सा तु प्रायस्तरां संस्कृतसंस्करण एव विद्यते।

२—द्र० काव्यमालायाश्चतुर्दशं गुच्छकम्।

लम्बनभूता नायिका अपि सप्रपञ्चं शास्त्रदृष्ट्या निरूपिताः। अत्र शृङ्गारमञ्जरीदिशा सविवेचनं लक्षणं प्रौढगद्ये लिखितम्। ग्रन्थकर्त्रा स्वीयाया एव भेदत्वेन मुग्धा स्वीकृता। परं मध्या प्रगल्भा च परकीयायाः सामान्यायाश्च भेदत्वेनोक्ते। नवोढापराख्याया मुग्धाया भेदद्वयी—(क) अज्ञातयौवना, (ख) ज्ञातयौवना चेति। विश्रब्धनवोढा मध्याया एव भेद इति केचित्। परे तु—मुग्धाया इति। मध्यैवोद्यतयौवनेति कथ्यते। प्रगल्भानिरूपणे किमपि नावीन्यं नास्ति। धीरा च परकीयाभेद इत्यपि सोमराजेन नाङ्गीकृतम्। ज्येष्ठा कनिष्ठा च मुग्धाया भेद एव, तत्त्वं च कान्तगतप्रेमातिशयेन, न तु विवाहक्रमेणेति सोमराजेन सयुक्तिकमभ्यधायि। परकीयाया गुप्तादयः षड् भेदाः स्वीकृताः, वृत्तसुरतगोपना, वर्तिष्यमाणसुरतगोपनादिभेदात्।

(अनुशयाना च वर्तमानस्थानविघटनानुशयाना, भाविस्थानविघटनानुशयाना, स्वानाधिष्ठितस्थानस्य भर्तुरनधिष्ठानेन)।

गुप्तवर्तमानसुरतगोपनाविदग्धा, वाग्विदग्धा, क्रियाविदग्धा। सामान्यापि यथार्थानुरागवती भवेत्, परं परकीयायां मानस्य सत्ता नानेन उररीकृता। आगमिष्यत्पतिका च वासकसज्जाभेद इत्यपि स एव। एवम् अवसितप्रवासपतिका, आगतपतिका वाऽपि तद्भेद एव। अभिसारिकायाश्च अभिसरणकर्त्रीत्वं तत्कारयित्रीत्वं वोररीकृतम्। प्रवत्स्यत्पतिका च प्रोषितपतिकाभेद एवेति।

शिवरामत्रिपाठिकृतः 'रसरत्नहारः'[1]

ग्रन्थकर्त्रा नक्षत्रमालाग्रन्थे (द्र० काव्यमालापञ्चमगुच्छकम्) चर्चितोऽप्ययं विषयो 'रसरत्नहार' ग्रन्थे सविस्तरं निरूपितः। तत्र रसमञ्जर्युक्तनायिकालक्षणान्यपि समालोचितानि।

धीरादिविषयेऽनेनोक्तम्—पूर्वाचार्याणां मते स्वकीयाभेदा एव, परन्तु परवर्तिनां मते परकीयाया अपि द्वावन्यावपि भेदौ व्याख्यासूक्तौ—(क) गुरुजनभीता, (ख) भुजङ्गभीता[2] चेति। तत्र प्रथमा तावद् नाटकलक्षणरत्नकोशदर्शितदिशा 'सभ्या' इत्येव भाति।

रत्नहारोदाहृतदिशा प्रथमा नायिका परकीया इति भाति। या पितृगृहे परवशा स्वीयाऽपि द्वितीया स्पष्टतः परकीया एव।

---

१. काव्यमाला (षष्ठगुच्छकम्, पृ० १२७।

२. ,, ,, पृ० १२७।

रसचन्द्रिका:—

अलङ्कारकौस्तुभग्रन्थकारस्यालङ्कारिकस्य विश्वेश्वरपण्डितस्य कृतिरियं प्रौढ्या शैल्या प्रसिद्धिं भजते। अत्र रचयित्रा नव्यन्यायस्य प्रौढां वैदुष्यपूर्णां शैलीमनुसृत्य भूयः परीक्ष्य पुङ्खानुपुङ्खरूपेण पदपदार्था विविक्ताः, आतश्चात्र नायिकाभेदमहिमानं भजते, विचारणाशैलीवैशिष्ट्यात्।

रसविषयकोऽप्ययं ग्रन्थो रसनिरूपणान्नारभ्य तद्युगीनां प्रवृत्तिमनुसृत्य नायक-नायिकाभेदमुखेन प्रारभ्यते, तत्रापि च नायिकामहिमानं समङ्गीकृत्य तत एव ग्रन्थारम्भः। अत्र नायिकात्रैविध्ये अज्ञातयौवना, ज्ञातयौवना चेति मुग्धाया भेदौ, ज्ञातयौवनाऽपि द्विविधा—नवोढा विश्रब्धनवोढा चेति सङ्कलनया मुग्धाया भेदत्रयी। मध्याप्रगल्भयोस्तु धीराधीरादिभेदा यथापूर्वमत्राप्युक्ताः, परं प्राचां मते इमे भेदाः स्वीयायाः, अर्वाचां मते च परकीयाया इति व्याहृतम्। ज्येष्ठात्वकनिष्ठात्वयोर्मूल-मत्रापि प्रेम, न तु विवाहक्रमः।

परकीयायाश्चानूढापरोढारूपं भेदद्वयमपाकृत्य मुग्धाविदग्धादिषड्भेदाः, अधिकन्तु कन्याऽनूढा सप्तमभेदोऽपि स्वीकृतः। उपभेदाश्चादसीयाः पूर्वानुगता एव। सामान्याया नास्ति, कोऽप्यवान्तरभेदः। इमाः सर्वा अपि अन्यसम्भोगदुःखिता-मानवती-वक्रोक्तिगर्विताभेदात् पुनस्त्रिविधाः। मानस्तु—प्रणयेर्ष्याप्रत्यक्ष-स्वप्नायित-भोगाङ्कदर्शन-गोत्रस्खलन-श्रवणभेदाद् बहुविध उदाहृतः। लघुमध्यगुरुरूपेण मानस्य निर्धारणं कृतम्। भेदप्रसारे च स्वीयास्त्रयोदश, परकीये द्वे, सामान्या एकैव। सङ्कलनया षोडश। अष्टावस्थाभेदाः, पुनश्चोत्तममध्यमाधमास्त्रयो भेदास्तदेवम्—(१६×८= १२८×३=३८४) चतुरशीत्युत्तरत्रिशतं भेदा भवन्ति। नात्र दिव्यादिव्यादिभेदा उक्ता।

अत्र किञ्चित्—पूर्वं कन्या, परकीयात्वेन गणिता, तथा चासतीरूपा सा जाता (उदाहरणरूपेण)। एषा नायिकाकृतोद्वाहाऽपि कन्याकालिकं जारं प्रति प्रणयभाव-व्यवहारं [1]वर्तयति।

अत्र ग्रन्थे प्राधान्येन साहित्यदर्पणतो यत्र कुत्र नाटयशास्त्रतो यदा कदाचिच्च

---

१. कन्यका यथा—

आरोपिता शिलायामश्मेव त्वं स्थिरेण मन्त्रेण।
मग्नापि परिणयापदि जारमुखं वीक्ष्य हसितैव॥
(द्र० रसचन्द्रिका, चौखम्बा संस्कृतसीरीज, पृ० १२ (सं० १९८२)

रसमञ्जरीतोऽपि सामग्री सङ्गृहीता, क्वचिच्च पूर्वाचार्याणां मतान्युद्धृतानि। खण्डनमण्डनादीन्यपि संक्षेपेणात्र वर्तन्ते। पदपदार्थाश्च प्रौढ्या शास्त्रार्थशैल्या निरूपिताः, उदाहरणानि प्रायस्तरामन्यदीयानि बहुत्र स्वीयान्यपि। निष्कर्षस्तु सिद्धमेतत्—शृङ्गारप्रधानेऽपि युगे ग्रन्थोऽयं शास्त्रीयगाम्भीर्यशैलीमनुसृत्यारचितः। ग्रन्थश्चायमादितोऽन्तपर्यन्तं परां शास्त्रीयां प्रौढिं भजते।

कतिपये अन्ये ग्रन्थाः—

सदुक्तिकर्णामृतम्, शार्ङ्गधरपद्धतिः, पद्यरचनादयः। अत्राद्ये ग्रन्थे[1] किमपि न क्रमशो निरूपितम्, परं शृङ्गारप्रवाहवीचिप्रकरणे इमा नायिका उक्ताः—'मुग्धा, मध्या, प्रौढा, नवपरिणीता, विश्रब्धनवोढा (गर्भवती), सत्यवती (कुलजा), स्वैरिणी, असती, कुलटा वा, (एतदुपभेदाः—गुप्ता, विदग्धा, लक्षिता च) वेश्या, खण्डिता, अन्यसम्भोगचिह्नदुःखिता, विरहिणी, वासकसज्जा, स्वाधीनभर्तृका, विप्रलब्धा, कलहान्तरिता, मानिनी, (एतदुपभेदा उदात्तमानिनी, अनुरक्तमानिनी च) प्रवस्यद्भर्तृका, प्रोषितभर्तृका, प्रोषितसम्भेदा, अवसितप्रवासपतिका, आगतपतिका वेत्यनर्थान्तरम् अभिसारिका च (एतद्भेदाः—तिमिराभिसारिका, ज्योत्स्नाभिसारिका, दुर्दिनाभिसारिका चेति)।

नामग्राहमासामुदाहरणानि सन्ति, न तु लक्षणनिरूपणे। तत्रापि 'वेश्या' नायिकाया नामोदाहरणाभ्यां परं—दाक्षिणात्यस्त्री, पाश्चात्यस्त्री, उदीच्या—तत्रापि ग्राम्या, प्राच्या चेति। आसां नामान्युदाहरणानि च सन्ति। अत्र 'ग्राम्या'-नायिकाया ग्राम्यत्वं न दोषास्पदम्, अपि तु तस्या नैसर्गिकं सारल्यं सौन्दर्यं च रामणीयकमित्यवादि—

न तथा नागरस्त्रीणां विलासा रमयन्ति नः।
यथा स्वभावमुग्धानि वृत्तानि ग्राम्ययोषिताम्[1]॥

शार्ङ्गधरपद्धतौ[2] तु भरतोक्तदिशा देवत्वाप्सरस्त्वादि समाश्रित्य विविधा अङ्गना निरूपिताः। तत्र देवस्त्री-अप्सरसो यक्षाङ्गना राक्षसीप्रभृतयः किमपि महत्त्वमाभजन्ते, परमत्र नास्ति तस्य किमप्यन्यद् वैशिष्ट्यम्।

---

१. ग्रन्थोऽयम् 'पञ्जाब ओरियन्टलसिरीज'प्रकाशितः।

१. द्र० सदुक्तिकर्णा० पृ० १४८।

२. बम्बेगवर्नमेण्टसीरीजप्रकाशितोऽयं ग्रन्थः।

आङ्कोलकरलक्ष्मणभट्टस्य (अदसीयः समयोऽज्ञातः) **'पद्यरचना'** (एष सुभाषितग्रन्थः, काव्यमाला ८९) ग्रन्थोऽपि सदुक्तिकर्णामृतपद्धतिमनुहरति। अत्र चतुर्थ-शृङ्गारव्यापारे नायिकाया वयस्सन्धिस्तारुण्यमवयवाश्च वर्णितानि। पञ्चमे व्यापारे च विरहिणी वर्णिता। सप्तमाष्टमयोश्च नायिकाया नामान्युदाहरणानि च सन्ति। यथा--कुलाङ्गना, प्रोष्यत्पतिका, प्रोषितपतिका, उत्कण्ठिता च। ततश्च 'अथाङ्गना-वान्तरभेदाः' इत्युक्त्वा नवोढाविश्रब्धनवोढामुग्धामध्याप्रौढाऽसती (विदग्धा, गुप्ता, लक्षिता च) वेश्याकुलटा, प्रेमगर्विता, सौन्दर्यगर्विता, खण्डिता, कलहान्तरितादय उदाहृताः। नास्त्यत्रान्यन्नौत्न्यम्। सर्वमपि खलु तत्सामयिकमेव, येन परिचितानामेषामनुल्लेखेऽपि क्षतिविरहात्, केवलं प्रवृत्तिवशादेव सर्वमुदलेखि ग्रन्थकर्त्रेति।

रसिकजीवनम्--

संस्कृतमयस्यास्य ग्रन्थस्य रचयिता कवी रामानन्दत्रिपाठी वर्तते। कविरयं काशीस्थः सरयूपारीणब्राह्मणः, बहुत्रविषये च रचनाकृत्।

तदानीं खलु न केवलं हिन्द्याम्, अपि तु तेलुगुभाषायां संस्कृतेऽपि शृङ्गार-प्रवृत्तिस्सुदृढाऽऽसीदित्युपर्युक्तविवरणैः स्पष्टम्।

यद्यपि रसमञ्जरीशृङ्गारमञ्जरीप्रभृतयो ग्रन्था यथाशास्त्रं निर्मिताः, तथापि नायिकानां रतिसम्बन्धिसौन्दर्यम्, तदुद्दीपकता च तदानीन्तनाचार्यहृदयेषु सुप्रतिष्ठितमासीत्।

रसतरङ्गिणीरचनातः परमपि नायिकाभेदविषयकग्रन्थद्वयरचनामिमां भावनां परिचाययति।

प्रस्तुत आलोच्यग्रन्थोऽयं रसिकजीवनाख्यः 'रीति'कालिकमनोवृत्तिं पर्याप्तं परिचाययति।

तदानीन्तनानामन्येषामाचार्याणामिव ग्रन्थकर्तुरपि शास्त्रीयविश्लेषणापेक्षया लक्ष्यकाव्यद्वारा शृङ्गाररूपाङ्कनद्वारा नायिकानिरूपणेऽधिका रुचिः सुस्पष्टं प्रतीयते।

रसिकजीवनकारस्य कवेर्व्यक्तित्वं कृतित्वञ्च--

तद्रचितस्य **'विराड्विवरणम्'** इति शीर्षकलघुग्रन्थस्य भूमिकायां कवेर्विषये मत्पित्रा प० श्रीनारायणपतित्रिपाठिमहोदयेन यल्लिखितम्, तदग्रेऽनूद्यते—

अस्मत्पूर्वजाः पण्डितश्रीरामानन्दमहोदयाः **'दाराशिकोह'**राजकुमारेण **'विविध-विद्याचमत्कारपारङ्गम'** इति पदव्या सम्मानिताः। यदा तु औरङ्गजेबः पितरं

शाहजहाँसम्राजं कारायां बद्ध्वा, ज्येष्ठसहोदरं दाराशिकोहं जघान, तदानीम् अस्मत्पूर्वपुरुषेण श्रीरामानन्दमहोदयेनाभाणि—

नो सैन्यं चतुरङ्गमीश्वरकृपानाशे प्रभूतं धनं
नो वा पौरुषमात्मनो न च नृपान् मन्ये समर्थान् यतः।
दाराशाहमहीपतिर्दशहयैर्वीरार्गलाग्रामतो
यातस्तां मधुरां कथञ्चिदकरोद्विश्रान्तिमेकक्षणम् ॥ १ ॥

येनेयं धरणी समुद्रवलया प्रत्यर्थिभूपालया-
प्येकीकृत्य वशीकृता हि नितरां दिल्लीनृपेण स्वयम्।
रङ्गान्तक्षितिपेन सोऽपि बत यत् कारागृहं प्रापित-
स्तस्माद् दैवशणाम्बुजाक्षरमयीं मन्ये समर्थां लिपिम् ॥ २ ॥

येनेयं श्रीदकाशीसकलकविजनोद्दामदानप्रकाशै-
राकीर्णा धर्मवर्णामृतयुतसलिलैः संस्कृता स्वर्णदी च।
आकूपारं क्षितीशो नतिविनयमतिर्यश्च कर्त्रेश्वरस्तद्-
दाराशाहेन्द्रमौलेर्विपदि कथमहो जीवनीयं हि विश्वम् ॥ ३ ॥

धर्मस्तुर्ययुगे न तेन जयति त्वेकाङ्घ्रितां श्रावितो
यावत्तावदपुण्यपण्यनिरतं निर्जित्य दानैः कलिम्।
यः पुण्यामृतवाहिनीं सुकृतवान् विश्वम्भरां श्रीदतद्-
दाराशाहविपत्सु हा कथमहो प्राणा न गच्छन्त्यमी ॥ ४ ॥

दाराशिकोहस्यास्य सभा, या साम्प्रतमपि अधिकाशि दालमण्डीक्षेत्रे **'पुरानो अदालत'** नाम्ना ख्यातिं भजते, किञ्च दाराशिकोहकृता **'अतिथिवसतिः'** (सराय) अद्यावधि राजघाटक्षेत्रे रेलवेस्टेशननिर्माणाद् भग्नरूपा दृश्यते। किञ्च वाराणस्यां **'दारानगर'** इति प्रयागे च **'दारागञ्ज'** इति स्थानेऽपि तदीयमहिमानमुच्चैः ख्यापयतः।

रामानन्दस्तु तदानीं काश्यां पण्डितेषु श्रेष्ठः, सभासु च प्रथमपूजाभागासीत्। तदीया पितृभक्तिस्तु सुदृढा इति तत्कृततत्तद्ग्रन्थाध्ययनतः सुस्पष्टं प्रतीयते। एतत्कृता ग्रन्था लुप्तप्राया अपि केचन अवशिष्टा अद्यावध्युपलभ्यन्ते। तद्विवरणमधस्तादुपोध्रियन्ते—

स्तोत्राणि—

अत्र कियन्तिचन खण्डितानि जातानि। यथाशक्ति विवरणानि प्रस्तूयन्ते—

नाम श्लो० सं० छन्दः कालः

१—**रुद्रताण्डवम्** । ८ । पञ्चचामरच्छन्दः १९४४ सं० तमे देवीस्तवराजचतुर्भुजाष्ट-काभ्यां सह मुद्रयित्वा निःशुल्कं वितीर्णम् ।

२—**सदाशिवस्वरूपस्तुतिः** । ८ । दण्डकच्छन्दः १७५९ वैशाखकृष्णशुक्रवारः । अस्या-दिमे 'सार्धे द्वे' पद्ये न लभ्येते ।

३—**महाकालस्तोत्रम्**—दण्डकच्छन्दः । आद्यौ श्लोकौ लब्धौ ।

४—**शङ्करस्तोत्रम्**—त्रिभङ्गीच्छन्दः । आद्यश्लोकतः परं द्वितीयस्य अंश एव लब्धः, नात्र श्लोकसङ्ख्या निश्चेतुं पार्यते ।

५—**भास्करस्तोत्रम्** । ८ । दण्डकच्छन्दः । सं० १७५५ भाद्रशुक्ल ६ शनिः ।

६—**मार्तण्डस्तोत्रम्**—स्रग्धरा । ५॥ । पादोनषट्-श्लोकाः ६ एव लब्धाः, नातोऽन्तं वक्तुं शक्यते ।

७—**चतुर्भुजाष्टकम्** । ८ । पञ्चचामरच्छन्दः । सं० १७२३ फाल्गुने निर्मितम्, सं० १९४४ तमे देवीस्तवराजेन मुद्रितम् ।

८—**कृष्णाष्टकम्** । ८ । उपजातिच्छन्दः । सं० १७२४ ज्येष्ठः १२, शुक्रः ।

९—**रामाष्टकम्** । ८ । विविधानि च्छन्दांसि ।

१०—**रामकीर्तिस्तोत्रम्** । ५ । शार्दूल० स्रग्धरे'च्छन्दसी ।

११—**आद्यास्तवराजः** । १४ । स्रग्धरा, शिखरिणी, शार्दूल० ।

१२—**श्यामास्तवराजः** । १६ । स्रग्धरा, शिखरिणी, शार्दूल० । ग्रन्थोऽयं सानुवादं मुद्रितः ।

१३—**बगलामुखीस्तवराजः** । १५ । शार्दूल० शिररिणी च छन्दः ।

१४—**देवीस्तवराजः** । १० । त्रिभङ्गीच्छन्दः । सं० १९४४ तमे रुद्रताण्डवचतुर्भुजाष्ट-काभ्यां सार्धं काश्या म् 'अमरप्रेस' यन्त्रालये प्रकाशितः ।

१५—**विन्ध्येश्वरीपञ्चकम्** । ५ । शार्दूलच्छन्दः । नेदं पूर्णमलम्भि, अतः पञ्चक-मित्यलेखि ।

१६—**विन्ध्यवासिनीकल्पद्रुमस्तोत्रम्** । ८ । स्रग्धराच्छन्दः । सं० १७४२ आ० शु० प्रतिपदि निर्मितम्, १९६१ संवत्सरे प्रकाश्य निःशुल्कं वितरितम् ।

१७—**महिषमर्दिनीस्तवः** । १० । पृथ्वीच्छन्दः ८, शार्दूल० २ । वैशाख शुक्ल १३, शुक्रे रचितः । सङ्कटास्तोत्रमेतत् ।

१८--दुर्गाष्टपदी । ९ । आर्याच्छन्दः ।

१९--गङ्गाष्टपदी । ९ । ,,

२०--जाह्नवीस्तुतिः । ८ । स्रग्धराशार्दूलपृथ्वीच्छन्दांसि ।

२१--गङ्गालहरी । ८ । त्रिभङ्गीच्छन्दः ।

२२--गङ्गास्तवः । १६ । पज्झटिकाच्छन्दः । चौपाई इति भाषायाम् ।

२३--गङ्गामृताष्टकम् । ६ । स्रग्धरा । नान्तं वर्तते ।

२४--गङ्गाष्टकम् । ८ । शार्दूल० अन्तिमे च पृथ्वी ।

२५--मणिकर्णीकुसुमम् । ८ । त्रिभङ्गी । १७४२ संवत्सरे भाद्रकृष्णः १३ ।

२६--कविकौतुकाष्टकम् । ८ । मन्दाक्रान्ता ।

२७--कामाष्टकम् । ८ । ,, ।

२८--कोपाष्टकम् । ४ । मन्दाक्रान्ता । पूर्वार्धमिदम्, पूर्णं नालम्भि ।

२९--लोभाष्टकम् । ८ । मन्दाक्रान्ता ।

३०--मोहाष्टकम् । ४ । ,, । पद्यद्वयमेवालम्भि ।

३१--मोहनाशनम् ,, ,, ।

३२--आत्मस्तोत्रम् । अस्य त्रिभङ्गीच्छन्दोलिखितं पद्यत्रयमेवालम्भि । अन्तलाभाभावात् श्लोकसङ्ख्या न ज्ञाता ।

३३--विष्णूत्थापनस्तोत्रम् । स्रग्धरा । केवलं १॥ श्लोको लभ्यते ।

३४--तारापतिस्तोत्रम् । आर्दूल० । श्लोकत्रयं लभ्यते ।

ग्रन्थविवरणम्

१--वेदार्थमन्त्रसङ्ग्रहः--नित्यकर्मश्राद्धाद्युपयोगिनो मन्त्रा अत्र सङ्गृहीताः ।

२--तत्त्वदीपिका । सिद्धान्तकौमुदीव्याख्येषा । आदितो हलन्तस्त्रीलिङ्गं यावत्, तिङन्तकारकयोश्च कियांश्चिदंशो लभ्यते । अदसीयं मङ्गलं यथा--

नत्वा साम्बसदाशिवाङ्घ्रियुगलं कृत्वा गुरोर्वन्दनं
स्मृत्वा चापि समन्ततोऽर्थगहनास्तास्ता मुनीनां गिरः ।
शिष्याणामनवद्यबुद्धिविमलज्ञानाय सत्कौमुदी
टीकामुक्तिविशेषयुक्तिनिकरैः कुर्मः प्रमोदास्पदम् ॥

३--तर्कगुम्फणा--तर्कसङ्ग्रहग्रन्थोऽत्र पद्यमयीकृतः । छात्रसौविध्याय प्रयासोऽयं सर्वथा सुकर उपायस्तेषां कृते । उदाहरणं यथा--

चक्षुर्ग्राह्यगुणो हि रूपमुदितं शुक्लादिभिः सप्तधा
जिह्वाग्राह्यगुणो रसो हि मधुराम्लाद्यैर्मतः षड्विधः ।
घ्राणग्राह्यगुणस्तु गन्ध उदितो यस्तु त्वचा गृह्यते
स स्पर्शः कथितः स चापि कथितः शीतादिभेदैस्त्रिधा ॥

ग्रन्थस्यास्य बहून्युदाहरणान्याहर्त्तुं पार्यन्ते, निबन्धविस्तरभिया न तान्युल्लिख्यन्त इति ।

४--**वैद्यकम्**--विषयेऽत्र औषधसङ्ग्रहात्मकः कश्चन ग्रन्थोऽलम्भि, न च तत्र आद्यन्तौ उपलभ्येते । अतस्तद्विषये किमधिकं वच्मि ! मन्ये पूरयितुमिच्छासीदिमं ग्रन्थम् ? अदसीयकविता ललिताः । साधारणोऽप्ययं ग्रन्थो महान्तमुपकारं साधयति । उदाहरणं यथा सर्पवृश्चिकदंशप्रतीकाराय—

यः पिबति पुष्पदिवसे जलपिष्टं सितपुनर्नवामूलम् ।
तत्सन्निधौ न वर्षं वृश्चिकभुजङ्गाः प्रसर्पन्ति ॥

गर्भाधानप्रसङ्गे—

मूलं या लक्ष्मणायाः पिबति ऋतुमतीगर्भबद्धानुरागा
पुष्यार्कादिप्रसङ्गात् कथमपि विधिना साधकैः प्रापितायाः ।
जीवद्वत्सैकवर्णोद्भवसुरभिपयःपेषितायास्तदानीं
रामानन्दप्रसङ्गाद् झटिति खलु भजत्येव बन्ध्यापि गर्भम् ॥

अलमति विस्तरेण । साम्प्रतं हिन्दीभाषानिबद्धं किमपि प्रस्तूयते—

लाजी तजपत्रज त्रिकुटवंश विलोचन जानु
नागकेशरीसहित सब तोला तिन तिन मानु ।
सब मिलाइके खाइए चूरनसुभग बनाइ
रामानन्द सुनासिका रुधिर थमा ह्वै जाइ ॥

५. ज्योतिषम्—

अत्र विषये न कोऽपि ग्रन्थोऽलम्भि, परं काश्चन जन्मकुण्डल्यो लब्धाः । **शाहजहाँसम्राजो** जन्मकुण्डली एतदीयहस्तलिखिताऽपि लभ्यते, यस्यां **जन्मसमयस्तु**—१६४८ वैक्रमाब्दः, १५१३ शालिवाहनाब्दः, माघमासः, शुक्लप्रतिपद् बुधवारः

इत्युल्लिखितः। अत्र नाम—'खुरमसुलतान' इति वर्तते। ऐतिहासिकैर्गवेषणीयोऽयं विषयः। एतज्जन्मकुण्डलीस्तुतिर्यथा—

लोकानां सौख्यदात्री सुतजयजननी तुष्टिदायुःप्रदात्री
माङ्गल्योत्साहकर्त्री गतभवसदसत्कर्मणां व्यञ्जयित्री।
नानासम्पद्विधात्री धनकुलयशसां सर्वदा वर्द्धयित्री
रिष्टापद्विघ्नहन्त्री गुणगणवसतिर्लिख्यते जन्मपत्री॥

६. **निर्णयार्णवः**—ग्रन्थेऽत्र तिथिपर्वनिर्णयो यथाप्रमाणं सामान्येन कृतः। १७३५ सं० समुल्लेखो वर्तते। अपूर्णोऽयम्।

एवं शकुनशास्त्रीयोऽपि कश्चन निर्णयग्रन्थो लब्धः, परं खेदास्पदमेतत्, सोऽप्यपूर्णः। तदीयानि द्वित्राण्युदाहरणानि—

दन्तिस्तम्भगतो गजेन्द्रफलदो राज्यं हयस्थो गवां
लाभं धेनुगतो महोत्सवकरः स्यात् भूरुहे संस्थितः।
क्षेत्रे क्षेत्रफलप्रदः खरगतो रोगं मृतिं माहिषे
प्रासादेऽपि तथोन्नतिं प्रकुरुते ध्वाङ्क्षो ध्वजस्थो जयम्॥

अत्र प्रायः विंशतिः श्लोका लभ्यन्ते।

७. **वैदिककर्मकाण्डग्रन्थाः**—

विषयेऽत्र बहवः ग्रन्था लब्धाः। यथा—(१) विवाहपद्धतिः, (२) षोडशक्रियानुक्रमः, (३) आरामोत्सर्गः, (४) जलाशयोत्सर्गः, (५) वनोत्सर्ग इत्यादयः।

एषु षोडशक्रियानुक्रम एव पूर्णो लभ्यते, यस्यायमाद्यः श्लोकः—

नत्वा श्रीगणपं गुरुं ग्रहगणान् गौरीं गिरां देवतां
दिक्पालान् सकलान् समस्तकलशाधिष्ठातृदेवानपि।
रामानन्दकविः करोति कृतिनां मोदाय संक्षेपतो
रम्यं षोडशकर्मणा मृदुपदैस्तत्तत्क्रियानुक्रमम्॥

ग्रन्थेऽत्र कविना स्वपितामहयोर्नामनी अपि लिखिते—

विद्याविश्रुतविश्वनाथतनयः श्रीमान् सदाचारवित्
कस्तूरीतनयश्च यो 'मधुकरः' तस्यात्मजेन स्वयम्।
इत्येकादशवासरोचित इह व्यालोड्य तत्पद्धतिं
'रामानन्द'-मनीषिणा विरचितो नामक्रियानुक्रमः॥

एतद्विषये संक्षेपत एव दिग्दर्शनं विधाय विषयान्तरेषूपह्रियते किञ्चित्—

८ लिङ्गानुशासनम्—

एतन्नामकः कश्चन ग्रन्थोऽपि कोषविषयको व्यरचि, यतो हि अमरकोषस्य रामाश्रम्याख्यव्याख्या प्रतिलिपिः तदीयहस्तलिखिता आसीत् ? एष खल्वनुमाविषयो यत् तत्परिशिष्टरूपो ग्रन्थोऽयमारचितः। ग्रन्थोऽयं नोपलब्धः, परं तट्टीका खण्डिता ज्ञापयति—

नत्वा विश्वेश्वरं देवं स्वीयलिङ्गानुशासने।
रामानन्देन विदुषा टीकेयं तन्यते शुभा॥

९. छन्दः शास्त्रम्—छन्दोरत्नाकर :—

ग्रन्थोऽयं सज्जन इव सद्वृत्तः। एष खलु प्रतीतिविषयो यदत्र ग्रन्थे **वृत्तरत्नाकर**तोऽपि प्रस्तारभेदा वर्धिताः, परमाप्रारम्भमासमाप्ति न पठित्वा किं नाम मया समीक्ष्यताम्। अदसीयं मङ्गलाचरणं यथा—

नत्वा वाचमचिन्त्यशक्तिविलसत्सद्गद्यपद्यामृत-
प्रोन्मीलद्बहलप्रमोदजनने कल्पात्मिकां वीरुधम्।
कुर्मोऽनेकमुनिप्रणीतविविधाँस्तत्तत्प्रबन्धानपि
व्यालोड्य प्रतिपत्तये कविगिरां रत्नाकरं छन्दसाम्॥

१०. तन्त्रशास्त्रम्—

विषयेऽत्र बद्धादरस्तत्रभवान् ग्रन्थकारः। आतश्च लिखितेषु तत्तद्ग्रन्थेषु तत्तत्तान्त्रिकमन्त्रा उद्धृताः।

विराड्विवरणनामकग्रन्थेन सहापि **'श्यामास्तवराजः'** एकः प्रकाशितः, यत्र कालीमन्त्रा उद्धृताः।

इदं किलानुश्रूयते—चरमे वयसि ग्रन्थकारैस्संन्यास आश्रितः। ततः परञ्च अधिकाशि उपलक्ष्मीकुण्डं कालीमठं संस्थापितवान्, यत्र भगवत्कालीमूर्तिरधुनापि विराराजीति।

किञ्च—अधुना प्रतिहायनं भाद्रशुक्लपूर्णिमायां (प्रौष्ठपद्याम्) एतन्मठाध्यक्षा अस्मद्गृहमेत्य भिक्षां स्वीकुर्वन्ति। संन्यासतः परं स्वस्तोत्रेषु ग्रन्थकर्ता **'ज्ञानानन्दः'** इति नैजं नाम समुदलेखि।

ईदृशस्तुतिषु—(क) आद्यास्तवराजः (ख) श्यामास्तवराजः (ग) बगलामुखीस्तवराजश्च पूर्णा लभ्यन्ते । यदीयोऽयमाद्यःश्लोकः—

वामे षट्कोणवृत्ते बहिरपि चतुरस्रीकृतेऽर्ध्यामृतेनाऽ-
भ्युक्षाधारादिशक्तेर्यजनमिह महामण्डले तन्निधाय ।
रं वह्नेर्मण्डलायात्यपि च दशकलाद्यात्मनेऽर्च्या नमोऽन्तैः
कुम्भं फट्कारसूर्ध्वं तदुपरि वसनैर्भूषयेद् रक्तमाल्यैः ॥

विविधविधमनुपूरितोऽयं स्तवः चत्वारिंशता श्लोकैः पूर्णः । शार्दूलविक्रीडितं वृत्तम् ।

११. आकाशवासिनीसपर्या—

ग्रन्थस्यास्य चतुश्श्लोकात्मकमाद्यं पत्रं नोपलभ्यते । द्वितीयस्मात् चतुर्थं पृष्ठं यावल्लभ्यते । अदसीयोऽष्टात्रिंशत्तमः पूर्तिश्लोको यथा—

विचार्याचार्याणां निगमविहितं पद्धतिमतं
मुदे तत्तत्कौलव्रतनिरतकौलव्रतजुषाम् ।
इयं 'ज्ञानानन्द'द्विजवरनिबद्धात्मवचनैः
सपर्यापर्याप्तिं भृशमुपगताऽऽकाशवसतेः ॥

१२. असितादिविद्यापद्धतिः (सपर्या)—

ग्रन्थोऽयं तान्त्रिकदिशा विरचितः । अत्र त्रयोदश पत्राणि, अन्त्यमर्धपद्यं यथा—

भाद्रे संवति शोणिते गुहतिथौ कृष्णे बुधे वासरे
'ज्ञानानन्द'-मनीषिणा विरचिताऽगात्पद्धतिः पूर्णताम् ॥

'असितासपर्या' ग्रन्थोऽयं श्लोकबद्धः, एकादशपत्रात्मकः, एकपञ्चाशच्छ्लोकात्मक इति चानुमाविषयः ।

ग्रन्थस्यास्यान्ते पूर्वश्लोकोऽयं किमपि वैपरीत्यमाधत्ते—

विचार्याचार्याणां निगमविहितं पद्धतिमतं
मुदे तावत्तत्क्रमनिरतकौलव्रतजुषाम् ।
इयं 'ज्ञानानन्द'-द्विजवरनिबद्धात्मवचनैः
सपर्यापर्याप्तिं भृशमुपगते ह्यसिततनोः ॥

(संवत्—१७३९ भाद्रासितसप्तम्याम्)

१३. कालरात्रिविधानम्—

त्र्यधिकैकशतानुष्टुम्मयोऽयं ग्रन्थः १७३५ फाल्गुने शुक्ले तृतीयायां लिखितः। कुतश्चिच्चात्र ग्रन्थे तान्त्रिकपूजाविधिरपि सङ्गृहीतः।

१४. गुह्यषोढाविवरणम्—

ग्रन्थस्यास्यादिमत्रयोदशश्लोकेष्वेको यथा—

प्रातः पद्मासनस्थः शिरसि परिलसच्छ्रीसहस्राम्बुजान्तः
प्रोन्मीलच्चन्द्रबिम्बस्थलगलविमलज्योतिजाग्रत्त्रिकोणम् ।
हंसाख्ये तत्र पीठे वरमभयकरं रक्तशय्योपविष्टं
शुक्लालङ्कारशुक्लाम्बरधरममलं श्रीगुरुम्भावयामि ॥

श्लोकतः परं गद्येषु मन्त्रविवरणम्, समन्त्रकरन्यासः, अङ्गन्यासश्चेत्यादि विषया निरूपिताः।

अथ साहित्यग्रन्थाः—

१. रसिकजीवनम्--

प्रकृतग्रन्थोऽयं नायिकाभेदविषयकः। अत्र **'रसमञ्जरी'** प्रभृत्युक्तदिशा दशविध-नायिकालक्षणानि सोदाहरणानि सन्ति। द्वितीयस्मिन् तरङ्गे नायकभेदा नायक-सहायकपीठमर्दादिप्रभृतयः सोदाहरणा निरूपिताः। तृतीयस्मिन् पुनस्तस्मिन् शृङ्गारनिरूपणम्, तुर्ये मानमानम्, पञ्चमे प्रवासनिरुक्तिः, षष्ठे विप्रलम्भशृङ्गार-निरुक्तिः, सप्तमे च हावभावादयो निरूपिताः। मूलग्रन्थे एकत्रिंशत् पत्राणि। तत्र भाषानुवादो मया (श्रीनारायणपतित्रिपाठिना) कृतः। अदसीयमङ्गलाचरणं तु पाठकैः ग्रन्थादौ द्रष्टव्यम्।

शृङ्गाररसमयोऽप्ययं ग्रन्थः कवितासरसतया नितरामास्वाद्यः। विटावतरणं यथा—

मरीचिरुचिसञ्चयैश्चपलचञ्चुकोटीभृतः
समुल्लसति चन्द्रमाश्चपलयंश्चकोरानिह ।
मरुच्चलति शीतलो रटति चञ्चरीकश्चिरं
भविष्यति हि निश्चलस्तव स चण्डिमानः कथम् ॥

ग्रन्थोऽयं प्रकाश्यमान एव, पाठकानां हस्तगतं राजते, आतश्च कृतं बहूदाहरणप्रयासैः।

ग्रन्थस्यास्यान्ते न हि निर्माणसंवत्प्रभृति वर्त्तते। कदाचित् इतोऽप्यग्रे किमपि ग्रन्थकर्त्तूं रचयितुमिच्छाऽऽसीत्, अन्यथा ग्रन्थान्तरेषु लघुषु पञ्चाङ्गलेखको नाम कथमत्र तिथ्यादि नालिखत्। अस्तु नाम, साम्प्रतं विहृतभाव उदाह्रियते—

कन्दर्पोल्लासिलीलाविलसितबहलामोदसम्पद्विचित्रा
तिर्य्यक् सम्भाव्यनेत्राम्बुजमतिललितं वाचमाचम्य भर्त्तुः।
ह्रीगर्भां स्वामवस्थामवनतवदनच्छद्मना व्यञ्जयन्त्या-
स्तन्व्यास्तन्नात्र चित्रं विहृतमपहरन्त्यन्तरं कस्य पुंसः॥

२. **पद्यपीयूषम्**--

अष्टात्रिंशत्तमपत्रैः पूर्णोऽयं ग्रन्थः। एतदीयानि आदिमानि एकविंशतिः पत्राणि नोपलब्धानि, परं द्वाविंशत्तमपृष्ठे वृक्षान्योक्तयः, तत्र चन्दन-चम्पक-माकन्द-जम्बू-पनस-बन्धूक-बिल्व-नारिकेल-खर्जूर-बदरी-लवली-धात्री-उदुम्बर-शाल्मलि-पूग-निम्ब-वटप्रभृतयो वर्णिताः। ततः परं माध्वी-लवङ्गी-ताम्बूलवल्ली-प्रभृतिलतिकाः स्तुताः। ततो वायुवर्णनप्रस्तावोऽस्ति। ततो नवरसनिरूपणप्रस्तावः, ततोऽग्रे कीर्ति-प्रस्तावः, दानप्रस्तावः, विविधप्रस्तावः, राजसेवनप्रस्तावः, प्रकीर्णकप्रस्तावः, चित्र-काव्यप्रस्तावः, समस्यापूर्तिप्रस्तावश्च विलसन्ति।

ग्रन्थस्यास्य स्वल्पो रसास्वादो नितरामपेक्ष्य इति विचार्य सर्वे आम्रस्य एव रसमास्वायन्तु—इति रसालपद्यमुदाह्रियते।

रसाल किमचीकरत् किल भवानपूर्वं तपो
गुणप्रकरमीरितुं न खलु शक्यते मादृशैः।
यथा तव पचेलिमामृतफले रसः पीयते
तथा न तरुणीजनाधरसुधोद्भवा माधुरी॥

ग्रन्थस्यास्यान्त्यः श्लोको ग्रन्थकर्तृपरिचयात्मको यथा—

देशो यस्य वशिष्ठजोत्तरभवः शाण्डिल्यगोत्रं हि यत्
ख्याता यस्य कुले त्रिपाठिपदवी वृत्तिविशेनान्वयात्।
यत्तातः श्रुतिपारगो मधुकरो यस्यात्मजैर्निर्मितो
'रामानन्द'बुधैः सभासु[1] विदुषां पीयूषमास्तां मुदे॥

---

१. 'सुभासु' इति मूलपाठः।

३. रामचरित्रम्—

ग्रन्थेऽत्र वाल्मीकीयरामायणस्य उत्तरकाण्डीया कथा ललितपद्यैर्बद्धा 'दोहा-चौपाई' प्रभृतिहिन्दीच्छन्दस्सु।

ग्रन्थोऽयं सीतावनवासावधिरुपलब्धः। अग्रेऽपि लिखितोऽयमिति प्रतीयते, परं न निश्चितम्; किन्तु सुन्दरकाण्डीयः कियांश्चिदंशः पृथग्लब्धः। स चेत्थं प्रतीयते—यत् '**तुलसीकृतरामायणम्**' खलु तदानीं नवीनमासीत्, तदाधृत्य काव्यमिदं रचितम्। तदुद्धृतिर्यथा—

जलबुदबुदमखिलं जगद् गच्छत्यायुरिदं हि।
'रामानन्द'-विवेकतो रामनाम सुखदं हि॥
उत्तरचरितमिदं हि सच्छन्दोभिर्विविधं हि।
प्रभवतु राममुदे सदा रामानन्दकृतं हि॥

अतःपरं रावणजन्मवर्णनं पठनीयम्, यद्धि त्रिभङ्गीच्छन्दस्युपनिबद्धं विलसति—

भीषणदशवदनं भीषणरदनं भीषणविंशतिरोचनकं
भीषणभुजदण्डं रणभुविचण्डं रिपुखण्डनमरिभयजनकम्।
रक्षःकुलपालं प्रकृतिकरालं भूपालं क्रव्यादकुले
रावणमतिगर्वं सततमखर्वं सा सुमालितनया सुषुवे॥ १०॥

इदं हि खल्वेकं लघुकाव्यमेवासीत्। पद्यानि यस्य हृद्यान्यासन्। सर्गान्ते लिखितमेकं श्लोकमत्रोदाहरामि, येन कवेर्मनोगतभावा ज्ञातुं शक्यन्ते—

काव्ये वाल्मीकिबद्धे यदिह विरचितं वर्त्मनैतेन बुद्ध्वा
तस्मादुद्धृत्य सारं निजमतिविभवाद्यद्धि लब्धं तु तस्मात्।
नानाच्छन्दोवितानैः पठितुमवसरे पाटवैः सत्कवीनां
रामानन्दैर्निबद्धो भवतु रघुपतेः प्रीयते काव्यबन्धः॥ ११॥

काव्येऽस्मिन् प्रायः सर्गान्तकथानां पुष्पिका किलेत्थं वर्णिता वर्तते—"**इत्युत्तरगतरामचरित्रं वैदेहीवनगमनपवित्रम्**" इति।

प्रसङ्गेऽत्र सुन्दरकाण्डस्य सौषम्यं विभावयन्तु सुधियः—

यस्यां सीतार्थमुद्योगस्तरणं वारिधेरपि।
लङ्कादाहादिकञ्चैव सौन्दरी सोच्यते कथा॥ १॥
नश्वरमिदमिति तत्त्वतः संसार कलयन्ति।
तदपि न हरिमिह तत्त्वतो 'रामानन्द'-भजन्ति॥ ६॥

उद्यल्लाङ्गूलदण्डः स्फुरदुरुरसनो भुग्नदंष्ट्राकरालः
पिङ्गाक्षस्ताम्रवक्त्रः परिघसमलसद्दीर्घदोर्दण्डचण्डः ।
विस्तारायामतो यत्तनुरपि दशकं योजनानां सत्रिंशद्
वेगात् सोऽयं हनूमान् विहगपतिरिव व्योममध्यं जगाहे ॥ ३ ॥

अथ विलङ्घ्य योजनशतमब्धिं पुनरपि कपिरभजत् तनुवृद्धिम् ।
तदनु लघुः शिथिलीकृतखेदे दशकन्धरनगरीमभिपेदे ॥
विविधविविधवनराजिविचित्रा नन्दनवनरचनेव पवित्रा ।
सरलासनकरवीरकदम्बा कुटजकेतकीचम्पकवृन्दा ॥
सप्तच्छदखर्जूरसमृद्धा सहसहकारपनसतरुविद्धा ।
कोटिकोटिरजनीचरजुष्टा कनकपुरी बहुतरसुखपुष्टा ॥

ब्रह्मास्त्रेण निबद्धच वायुतनयं नीत्वा दशास्यान्तिकं
पप्रच्छ स्वयमेव राक्षसपतिः कस्त्वं कुतः कस्य वा ।
सुग्रीवान् मिलनं हि बालिविजयं रामाङ्गनादर्शनं
वृक्षोत्पाटनमद्भुतं कथितवान् दूतत्वमव्याहतम् ॥

इत्यलं पल्लवितेन । अन्या अपि ललितरचना रसनीयाः सन्ति ।

४. कटाक्षशतकम्—

शतकमिदं नन्वष्टादशश्लोकावधि लब्धम् । रचना—

नीलाञ्जनोत्कटविषैर्विषमीकृतानि
तिग्माग्रमार्गणगणग्रथितान्तराणि ।
वामभ्रुवस्तदपि वाञ्छति हृत्सरोजं
हा हन्त सस्मितकटाक्षनिरीक्षितानि ॥

५. धन्यशतकम्—

अस्यापि त्रयोदशैव श्लोका उपलभ्यन्ते । अश्लीलतादोषग्रस्तोऽप्ययं वास्तविकं सम्भोगश्रृङ्गारं प्रकटयति । शतकेऽत्र प्रतिचतुर्थपादं समानमेवास्ति—

अव्यक्तामभ्यसन्तीमिव हि नहि नहीत्यादिकन्दर्पकक्षां
मा मा मामेति मामेत्यभिलपितलसत्कामसङ्ग्रामदक्षाम् ।
रामानन्दाननाब्जोत्कटभ्रुकुटितटाकुञ्चनां भावयन्तीं
धन्याः केचिद् भजन्ते निधुवनमुदिताः कामिनीं यामिनीषु ॥

६. शशाङ्कशतकम्—

अस्यापि केवलं पञ्चदशैव श्लोका लब्धाः । अत्र चन्द्रकलङ्क उत्प्रेक्षितः—

विलसति हिमकरबिम्बं राजतमिव भाजनं पुरतः ।
शालग्रामशिलेयं मध्यगता लाञ्छनव्याजात् ॥
इन्दोरखण्डबिम्बं शिवलिङ्गं स्फाटिकं जयति ।
बिल्वीदलभरपूजितमिव रत्या लाञ्छनं भाति ॥
कामेनाम्बरभूमौ कन्दुक एषोऽम्बरे रन्तुम् ।
उच्छालित इति मन्ये गुम्फितोऽसितेन पट्टेन ॥
पायसपिण्डश्चन्द्रः तत्र कलङ्कस्तिलप्रक्षेपः ।
विष्णुपदे किल दत्तो रत्या कामस्य कान्ताय ॥

अन्तिमः श्लोकोऽयमेकस्मिन् स्फुटपत्रे समुपलब्धः । अस्मिन् **'विष्णुपदशब्दो'** द्व्यर्थकः । एतद्भिन्नानि भूयांसि पद्यानि लब्धानि, किन्तु विस्तरभियाऽत्र नोपस्थाप्यन्ते ।

७. हास्यसागरः—लघुप्रहसनमिदम् ।

तत्र नान्दी यथा—

उन्मीलत्पुण्डरीकप्रचुरतरपरीणाहकर्णान्तकान्ति-
नीलाम्भोजन्मकल्पाञ्जनरसविसरप्रोल्लसत्खञ्जनश्रीः ।
द्रष्टुं कान्ताननेन्दोर्द्युतिमतिचकितप्रेक्षितैरुल्लसन्ती
पार्वत्याः शर्महेतोः परिणयसमये कापि दृग्भङ्गिरास्ताम् ॥

नान्द्यन्ते सूत्रधारः

एतेषां पण्डितानां पटुतरकटुकव्यञ्जिकापञ्जिकास्तां
वाचालास्तावदेते दधतु जडधियो मूकतां वावदूकाः ।
गङ्गाकल्लोलकल्पाः सपदि सुकृतिनां सज्जनानां समाजे
'रामानन्द'–द्विजानां यदवधि सरसा वाग्विलासाः स्फुरन्ति ॥

एतत्प्रतीयते यद्यदा 'औरङ्गजेबेन' काशिकमन्दिराणि भग्नानि, तदा खिन्न-खिन्नेन ग्रन्थकर्त्राऽभाणि —

हन्यन्ते निर्निमित्तं सकलसुरभयो निर्दयैर्म्लेच्छजातै-
दीर्यन्तेऽमी सदेवाः सकलसुमनसामालयाश्चातिदीर्घाः ।
पीडचन्ते साधुलोकाः कठिनतरग्राहिभिः कामचारैः
प्रत्यूहैस्तैः क्रतूनां सभयमिव जगत् पामराणां कुमारैः ॥

यद्यपि दृश्यकाव्येषु ह्यभिनयोपयोगिन्यो वर्तमानकालिक्यः क्रियाः खलु क्रिया-समभिहारेण प्रयुज्यन्ते, तथाप्यधस्तनीये श्लोके तादृश्यः क्रियाः तात्कालिकीं घटनां ख्यापयितुं प्रयुक्ताः। पद्येऽस्मिन् कलियुगं नायकत्वेनोपस्थाप्य तस्य पुत्राणां विवाह उपवर्णितः। विवाहोपक्रमे गोत्रोच्चारादिका विधयो घटाटोपमय्यां भाषायां समुपवर्णिताः। भरतवाक्यमिदं विमृशन्तु काव्यरसिकाः—

आसारैः परिपूरयन्तु वसुधामेते महावारिदाः
कालेषु प्रतिवा-(वत्) सरं फलवती शस्यैश्च पूर्णा मही ।
गावः कामदुधा भवन्तु सुधियस्सन्तु त्रयीनिर्भरा
राजानः परिपालयन्तु पृथिवीमानन्दसान्द्राः प्रजाः ॥

८. काशीकुतूहलम्—

ग्रन्थोऽयं विशालः, परं खण्डितः। नात आद्यन्तावुपलभ्येते । अत्र प्रकरणानि—(१) पञ्चक्रोशकुतूहलम्, (२) दानकुतूहलम्, (३) कालकुतूहलम्, (४) निर्धनकुतूहलम्, (५) सुवंशकुतूलहम्, (६) कुवंशकुतूहलम्, (७) सार्थककुतूहलम्, (८) अनर्थकुतूहलम्, (९) सारमेयकुतूहलम्, (१०) काककुतूहलम्, (११) क्रोड-कुतूहलम्, (१२) दुर्जनकुतूहलम्, (१३) काणकुतूहलम्, (१४) स्नेहकुतूहलम्, (१५) मोहकुतूहलम्, (१६) विप्रद्रोहकुतूहलम्, (१७) जम्बुकद्रोहकुतूहलम् ।

कुतूहलानि कानिचिद् बृहन्ति लघूनि च कानिचित् । उदाहरणं यथा—

तत्रोचितनर्तनलीलौघं पश्यन्त्याकर्ण्य च वीणौघम् ।
नानातालध्वनिसङ्गीतं कुरुते जनचित्तं सुप्रीतम् ॥

पञ्चक्रोशकुतूहलत एतज्ज्ञायते यदद्यावधिफाल्गुनशुक्लद्वितीयायां जायमानायां देवयात्रायां गानमण्डली, लीलामण्डली च भवतः स्म ।

शङ्का यत्र न संस्कृतेस्त्रिजगतां रङ्कायते चान्तकः
कालव्यालविशालभीतिरहिता यत्रोद्भवा जन्तवः ।
नैशो यत्र कलिः कदापि कलुषव्यापारदीक्षाविधौ
सेयं किन्न निषेव्यते भगवतो भर्गस्य काशीपुरी ? ॥१॥

भवतु—साम्प्रतं 'दानकुतूहलस्य' अथ 'कालकुतूहलस्य' च रसास्वादनं सापेक्षमत्र—

दानकुतूहलम्—

इदमेव खलु भवसागरे करणीयमस्ति चिरेण।
पिब भुङ्क्ष्व देहि गृहाण भोः कर्मणेह परेण ॥३॥
धनमेव दाननिदानमत्र ददाति नो कृपणस्तु।
इति वक्ति 'रामानन्द'-गीरयमेव पापनरोऽस्तु ॥४॥

कालकुतूहलम्—

येषु येषु विषयेषु ममत्वं तेषु तेषु नश्वरमिति तत्त्वम्।
यदि नश्वरमिदमखिलमखण्डं भज हरिमिह भवतरणतरण्डम् ॥२॥
प्राणतत्त्वमिह यस्य हि वश्यं तस्य योगफलमखिलमवश्यम्।
कुण्डलिनीचालनमतिधीरः प्रभवति भुवने सुभगशरीरः ॥७॥
कालकुतूहलमष्टकसारं गुरुमुखतः कलयति भवपारम्।
रक्षति जन्मजराभयभीतं 'रामानन्द'—मनीषिविगीतम् ॥९॥

अस्तु नाम—अन्यान्यपि कुतूहलानि खल्वेवंविधान्येव मनोरञ्जकानि सन्ति, किन्तु प्रस्तारकारणान्नेहोपन्यस्यन्ते।

९. किरातभावदीपिका—

किरातार्जुनीयमहाकाव्यस्य टीकेयम्। ग्रन्थोऽयं प्रायः किरातार्जुनीयेन साम्यं भजते। नास्यादिरुपलभ्यते। एतदन्तो यथा—

मूलार्थैकनिबन्धना सहृदयानन्दैकसन्दोहदा
मन्दारद्रुममालिकेन सुखदा सर्वार्थदा सर्वदा।
'रामानन्द'-विनिर्मिता कतिपयैर्गूढैरगूढीकृता
सेयं भारविसूरिकाव्यविवृतिर्भूयात् सतां प्रीतये ॥

१०. काव्यप्रकाशप्राकृतार्थः—

ग्रन्थेऽत्र काव्यप्रकाशीयं प्रत्युल्लासं प्राकृतपद्यानि संस्कृतानि। ग्रन्थोऽयं कृत्स्न आप्तः। मङ्गलाचरणं यथा—

गलन्मदलसद्गण्डमिलन्मैलिन्दमेदुरम् ।
वेतण्डतुण्डमानन्दकन्दं वन्दे शिवात्मजम् ॥
काव्यप्रकाशिकागूढप्राकृतार्थविवेचनम् ।
'रामानन्देन' कविना गुरुं नत्वा वितन्यते ॥

अत्र किञ्चित्--

चत्वारिंशद् वर्षाणि यावद् फलाहारं कुर्वन् गायत्रीपुरश्चरणकर्ता, सरयूपारस्थ-गोरक्षपुरीयमझौलीराजगुरुः पण्डितश्रीमहादेवदत्तमिश्र उक्तवान्, यत्, एष एव श्रीरामानन्दमहाशयः सन्न्यस्य स्कान्दकाशीखण्डस्य संस्कृतव्याख्यां लिलेख, याऽद्यापि प्रसिद्धा । परं तदज्ञानवशाद् मया (श्रीनारायणपतित्रिपाठिना) स्वीयकाशीखण्डीय-भाषाटीकाभूमिकायाम् १९६५तमे ख्रैस्ताब्दे मुम्बापुरीस्थश्रीवेङ्कटेश्वरप्रेसप्रकाशितायां किलेदमुदलेखि—'**यतीन्द्ररामानन्दस्वामी**' इति ।

एतन्न ज्ञायते—यदयमेव रामानन्दीयसम्प्रदायसंस्थापकः '**कबीरदासगुरुः**' पञ्चगङ्गाघट्टस्थपाषाणफलके पूजितचरणपादुकः सोऽन्यो वा ? परमस्मत्पूर्वपुरुषेण लिखितमिति सन्देहास्पदमेव । प्रमाणाभावाद् वयमत्र किमपि वक्तुमसमर्थाः ।

साम्प्रतमत्र कवयितुर्हिन्दीपद्यान्युद्ध्रियन्ते, यतो हि तान्यत्र प्रासङ्गिकानि; हिन्दीभाषामयत्वात् —

रामानन्द पी को एक कुहुक सतावै पिको
कुहुक सतावै पिको कुहुक निकेत है ।
कानन भनक भोर कानन भनक भोर
कानन भनक भोर हू न कोउ देत है ।
कंज विकसेरी हिय कंज कैसे विकसै री
विकसै विपिन क्यों विपिन को निकेत है ।
चित्तमें न चेत भई ऐसी हौं अचेत आली
हरि चले चेत मेरो हरि चले चेत है ॥१॥
गरद मिलायो दई गरद मिलायो दई
गरद मिलायो तऊ चन्द न छपत है ।
पंचवान ही को लागे पंचवान ही को दूजे
पंचवान ही को पिक पंचम जपत है ॥

नलिनी सलिल बिन जैसी मुरझानी सखि
तैसी मुरझानी मन मीन सौ चपत है।
रामानन्द कवि जैसे ग्रीषम तपत तैसे
पोय विन आली विरहानल तपत है ॥२॥
रामानन्द आइबे की गरज नहीं धों उत
गरज नहीं धों इत गरज जनाए है।
चंचल चलाए पै न चंचल चलाए पिअ (य)
चंचल चलाए चित चंचल चलाए हैं।
चातक कसाई बैन पिअ के सुनाये पै न
पिअ के सुनाए बैन पिअ के सुनाये हैं।
मोर मतवारे पै न पिअ मतवारे आये
घनस्याम आये पै न घनश्याम आये हैं ॥३॥
विरह झकोरी मन नेकऊ न उझकोरी
औचक चकोरी बैन विष सी सुनाई है।
बाज आयो जिअ कैसे करि जीतिए री जिअ
रामानन्द चंद जिअ जारत जुह्नाई है॥
चंचरीक चंचलरी देखि चित चंचल री
कियो चित चंचलरी तैहूँ चंचलाई है।
विरह सरदही में विरहसर दही में
विरह दरदको सरद देन आई है ॥४॥
भावे न तुसार जामे पुहुमी तुसार जामे
पौनऊ तुसार बहै हिम को मजूस है।
बिरह दहन को तुसार न बुझावै सखि
विरह दहन जीअ भयो आबनूस है॥
रामानन्द कवि पिअ दीपक पनूस है
मेरी मूरति पनूस मेरे पिअ को पनूस है।
सुखी दुखी लोगनि को सुख दुख जानिबे को
आली यह पूस हिम रितु को जसूस है ॥५॥

बिकसे सरोज पै न विकसै री ही सरोज
ही सरोज करै चित चन्दसों चकोरी के।
सुदिन मनाए औधिके सुदिन मन आए
सुदिन सुनाए पिक पंचम ठगोरी के॥
विविध सुगन्ध चीर 'रामानन्द' दम्पती सरीर
मंडन करत मुख लै अबीर झोरी के।
प्रीतम न मेरे आइबे की प्रीतम की
मेरे प्रीत मन आए सखि आए दिन होरी के॥६॥

अपराऽपि खण्डितैका पुस्तिका समासादिता, यस्यां दशपद्यान्येवोपलभ्यन्ते, येषु शृङ्गाररस एव शृङ्गारितः। तद्यथा—

अजहूँ लौं वह कामकेलि अलसानी बाल
ऐसी छबि जाकी निसु दिन उर ठानिये।
जाके पीत वरन कपोल के ऊपर छूटे
अलक समूह भोंर भार से बखानिये॥
प्रकट कलुष हिअ गोपन करत ऐसी
चपल चकित चित चित्त में समाइये।
परम प्रचण्ड पंचवान वान पावक सों
विकल सरीर 'रामानन्द' मनभाइये॥

अधुना खलु शान्तरसमयानि कानिचित् भाषापद्यान्यास्वादयन्तु रसज्ञाः—

हंसा काहू जात न जानो!
यह तन मानस ललित केलि तजि औचक कियो पयानो।
देखत मात-पिता परिजन सब तिनको कछु न बसानो॥
आइ नगरवासी भाई सब पलक एक पछितानो।
कहँ धों रह्यो कहाँ लों आयो फिरि धों कहाँ समानो॥
'रामानन्द' अमर यह खेचर छन में भयो विरानो॥१॥

साधो यह जग भरम भुलानो ।

मात-पिता वनिता सुत संपति विषम विषय लपटानो ।

मैं मेरो अभिमान मोह बस माया रस बौरानों ॥

नहि सूझै परमारथ को पथ निज सारथ अरुझानो ।

'रामानन्द' नन्द नन्दन तजि सेवत चरन विरानो ॥२।

'पद्यपीयूष'—ग्रन्थान्ते कविना **'वृत्तिविशेनान्वयात्'** इत्यलेखि । एतज्ज्ञायते यत्-सरयूपारस्थगोरक्षपुरीयविशेनकुलतिलकमझवलीराजबोधमल्लस्य सभायां पण्डितैः शास्त्रार्थः कृतः । एतत्तत्प्रहितपत्रतो गम्यते । तदानीं यावत् **'पिण्डी'** ग्रामेण सहसम्पर्क आसीत्, यतः कवयितुः प्रपितामहो **'दिवाकरत्रिपाठी'** विद्याध्ययनाय काशीमागतवान्, अन्नपूर्णाकृपया चाधिकाश्येव उवास, विश्वनाथकृपया च स्वपुत्रस्य नामापि **'विश्वनाथ'** इति चक्रे । एतत्सर्वं 'षोडशक्रियानुक्रम' ग्रन्थे वर्तते ।

सम्प्रति यथाप्रसङ्गं राजस्तुतिः लिख्यते—

वीर श्रीबोधमल्ल स्फुरति तव करे नीलवर्णासिवल्ली

निर्णीता सा भुजङ्गी सकलकविजनैः प्रोल्लसद्वाग्विलासैः ।

रामानन्दद्विजातेर्मनसि निविशते कापि शङ्का निसर्गात्

तद्दष्टारातिवर्गः कलयति भुवने मुक्तिमेतद्विचित्रम् ॥

अथ प्रश्नोत्तरात्मकः कश्चिच्छ्लोकः—

आस्ते नूनं गतिश्चेत् कथयतु कुशली भूतले नास्ति कुम्भः

कुत्र स्यादन्वयोऽस्य प्रथम इह पुनः कारके प्रश्न एषः ।

आख्याते कुत्र शक्तिर्भवति वदतु मामुत्तरं चेल्लकारे

बुद्धिर्वादे दृढा चेदथ भजतु पदं सादरं मन्दतायाः ॥

अत्रापि केचन स्फुटप्रश्नात्मकाः श्लोका अवलोकयन्तु—

के युष्मद् गुरवः किमस्त्यपि कुलं कः स्यात् प्रसङ्गोऽपि ते

तेषामध्ययनं किमस्ति भवता किं तत्र वाऽऽधीयते ।

अन्तेवासिजनाश्च कत्यपि पुनस्त्वय्यस्ति तेषां दया

रामानन्दमनीषिणस्त्वमधुना प्रब्रूहि प्रश्नोत्तरम् ॥

सच्छिष्येण निजाभिमानशमनं कृत्वाऽऽत्मना वाङ्मन-
स्कायैरीश्वरभावना कुशलिना सुश्रूषितव्यो गुरुः।
तत्कारुण्यकटाक्षकल्पितमतिः शास्त्रेषु वागीश्वरो
रामानन्दमते भवत्यनुदिनं चेत् प्रीतिरुज्जृम्भते॥

तदनु अपरोऽप्येकः प्रश्नात्मकः श्लोको दृग्गोचरी कुर्वन्तु काव्यकलामर्मज्ञाः। तथा च—

का श्लाघा विदुषां धरावनकृते को वा कृतो वेधसा
सम्बोध्यो नृजनः कथं किमिह वा पुर्य्याः पदं वाचकम्।
किं स्यादत्र विपूर्वकस्य सुकवे! कल्पस्य बोधेऽव्ययं
दाक्षीपुत्रमुनिप्रणीतमहितात् सूत्राद् वदाशूत्तरम्॥

अधुना खलु यतिस्तुतिमयानि हृद्यानि पद्यानि विभावयन्तु—

पत्रं वागीशभारतीयोग्यम्—

स्वस्तिश्रीभारतीनां प्रभवति भवती भारती यस्य कण्ठे
नावद्यागद्यपद्यापटुचटुलपदैर्हृद्यविद्याविनोदैः।
वाचामीशे मुनीशे यमनियमसदाचारनिष्ठावशिष्ठे
रामानन्दस्य तस्मिन्नखिलगुणगुरौ स्यात् सहस्रं नतीनाम्॥ १।

कारुण्याद्वैतभावादिह कुशलमथ श्रीमतान्तन्नितान्त-
स्वान्ते सम्भावयामो वयमहह! सदोदन्तचिन्ताभिपन्नाः।
संसारावर्तगर्त्ते सपदि सुखधिया दुःखमूले रटन्त-
स्तिष्ठामः कोऽभिजाने विधिकृतमधुना वश्यभाव्यं किमास्ते॥ २।

कामं विन्दन् मरन्दं बहलपरिमलोल्लाससंयातरङ्गो
दैवादम्भोजगर्म्भादुपरि परिणतश्चेतसा बद्धसङ्गः।
अस्मिन्नेवान्तराले हरिहरिदुरितोद्रेकझञ्झानिलेन
प्रोद्धूतः क्वापि यत्र प्रभवति नलिनं वीक्षितुं नापि भृङ्गाः॥ ३।

एवंविधाः स्फुटाः श्लोका यत्र तत्र प्रकीर्णरूपेणोपलभ्यन्ते। तेषां सर्वेषां रसास्वादनं तु पृथक् पुस्तकाकाररूपेण कर्तुं पार्य्यते। महाकविना ह्यनेन बह्वयः भाषा-किंवदन्तयोऽपि श्लोकबद्धाः कृताः। यथा—'कौआ नाक ले गयो' सदृशी किंवदन्ती तु

साम्प्रतमपि व्यवहारपथमवतरति। इमास्तदानीमपि व्यवह्रियमाणा आसन्। अत एव महाकविनाऽनेन श्लोकबद्धाः पर्यवसिताः। तद्यथा—

छिन्ना नासा वायसेन प्रमादादित्थं मोदात् केनचित् कश्चिदुक्तः।
मूढः कश्चिद् वायसान् धावमानो नासां स्वीयां न स्पृशत्यल्पबुद्धिः॥

अग्रे एकं सटीकं मूलमपि पश्यन्तु सुधियः—

नीतो बाह्यं केनचिद् ब्राह्मणेन नागो दावादंशुकान्तर्विलेन।
दष्टुं धावन् मन्दधीरात्मदोषाद् रामा-(ज्ञाना) नन्द ! स्यात् खले न प्रतीतिः॥
दावानल सों काढ़ि कै उरग उबार्‌यो जाहि।
ताहि डँसै जौं उरग खल 'नन्द' पुकारिअ काहि॥ २॥

इमानि खलु तत्तद् ग्रन्थेभ्य उद्धृतानि ललितपद्यानि स्तोत्राणि च पं० रामानन्दकवेर्महाकवित्वख्यापने स्वतो निदर्शनानि। न ह्यत्र प्रमाणान्तरस्यापेक्षा वर्वर्ति।

तदेवं संक्षिप्य सर्वमुक्त्वा साम्प्रतं कविवंशः प्रस्तूयते—

अकबरसम्राजः प्रायः राज्यसमकाले अस्मत्पूर्वपुरुषो **दिवाकरत्रिपाठी** विद्यां अध्येतुं **काशीमाजगाम**। स खलु ज्यौतिषज्ञो बभूव, तत्पुत्रो **विश्वनाथत्रिपाठी** बभूव, यत्कृतो ग्रहलाघवतिलकग्रन्थो वर्तते। तत्पुत्रो **मधुकरत्रिपाठी** आसीत्। यज्ज्येष्ठात्मजो **रामानन्दत्रिपाठी**, कनिष्ठसुतः **परमानन्दत्रिपाठी**। तत्र रामानन्दीयमितिवृत्तं यथाज्ञानमुपर्यलेखि। कनिष्ठस्य परमानन्दत्रिपाठिनः पुत्रः **पं० सूर्यमणित्रिपाठी**। स खलु नितरां धर्मनिष्ठस्तपस्व्यासीदिति श्रूयते। तत्पुत्रः **सनाथत्रिपाठी**, तदीय वैदुषीप्रभाविता **राजकुमारक्षत्रपतिसिंहः**, तत्पुत्रो **देशपतिसिंहः**, अन्ये च भूस्वामिनः शिष्यतां गृहीत्वा ग्रामान् भूमींश्च ददौ। ता भूमयोऽद्यावधि अस्मत्पार्श्वे आसन्। तत्पुत्रो **गणपतित्रिपाठी**। एतत्कृत एकशिवालयो लक्सासक्षेत्रे वर्तते।

अस्य पुत्रत्रयी

गङ्गाप्रसादत्रिपाठी, दुर्गाप्रसादत्रिपाठी, अयोध्याप्रसादत्रिपाठी। एषु आद्यावनपत्यौ दिवंययौ। अन्त्योऽयोध्याप्रसादत्रिपाठी महाविद्वान् आङ्ग्लपारस्यभाषयोश्चाधीती। एष खल्वादौ ब्रिटिशशासनेन न्यायालयपण्डितीकृत्य पटनां प्रेषितः। तत्र क्रमेण उन्नतिं कृत्वा। 'मुंसिफो' बभूव-तदनन्तरं च सदरसदूर-(सदराल)पदं प्राप्तवान्। एष प्रकाममुपार्ज्य ग्रामान् क्रीतवान्। ततो निवृत्त्य षण्मासान् काशीं समुष्य

गृहसन्निधौ विशालं शिवालयं प्रतिष्ठाप्य कार्तिकवदिनवम्यां मणिकर्णिकायां प्राणायामं कुर्वन् तनुं जहौ।

अदसीयाऽपि पुत्रत्रयी

चन्द्रशेखरत्रिपाठी अग्रजः। मध्यमो मम (नारायणपतित्रिपाठिनः) पिता **रमापतित्रिपाठी**। अनेन एकं विशालं श्रीलक्ष्मीगोपालयोः मन्दिरं प्रतिष्ठाप्य देवाः प्रतिष्ठापिताः। कनिष्ठः **श्रीचन्द्रपतित्रिपाठी**। चन्द्रशेखरत्रिपाठी काश्यां श्रेष्ठः पण्डित आसीत्।

तात्कालिकः काशिराजो महाराजश्रीमदीश्वरीनारायणसिंहदेवः (G. C. S. I.) तदीयो भक्त आसीत्। स्वयमागत्य तद्दर्शनं विदधाति स्म।

महाराजश्रीकाशीनरेशाज्ञयाऽनेन काष्ठजिह्वस्वामिकृतशिवचरणपरिचर्याग्रन्थस्य टीका कृता।

अनेन शारीरकसूत्रवृत्ति-परिभाषेन्दुशेखरविचार-श्लोकबद्धाष्टाध्यायी-पूजापुष्करिणी-रामकथा-मत्स्यपुराणटीकाप्रभृतिग्रन्थाः रचिताः। पूजापुष्करिणीग्रन्थादेव गणेशसूर्यविष्णुगङ्गाविश्वनाथस्तुतीः सङ्गृह्य 'पञ्चदेवस्तवाः' इति नाम्ना पञ्च स्तोत्राणि १९४४ तमे खैस्ताब्दे प्रकाश्य पण्डितसभासु स्मृतिरूपेण वितरितानि।

नास्य पुत्र आसीत्। द्वे कन्ये आस्ताम्। कनिष्ठपितृव्यश्चन्द्रपतित्रिपाठी तु निरपत्य एव शिवरात्रिं समुपोष्य रात्रौ शिवसायुज्यमवाप।

अस्मत्तातपादानां तदुपरि महान् स्नेह आसीत्।

वयं खलु चत्वारो भ्रातरः द्वे भगिन्यौ चेति षट् सहोदराः स्मः। एषु अहमेवावशिष्टः।

अस्मद् ज्येष्ठभ्रातुर्लक्ष्मीपतेः कनिष्ठभ्रातुः **उमापतेश्च** दिवंगते सति मम पितुरवस्था जर्जरिता सञ्जाता। १९४८ तमे वैक्रमाब्दे यदा मम ज्येष्ठभ्रातुर्विद्यापतेरवस्थाऽष्टाविंशद्वर्षीयाऽथ च ममावस्था सप्तदशवर्षीयाऽऽसीत्, तदा पिता महाप्रयाणं कृतवान्। तदनु पति-पुत्रवियोगदुःखसन्तप्ताया मातुः शारीरिकी मानसिकी च खिन्नता उत्तरोत्तरं वृद्धिं गता। अस्मिन्नेव काले मम गृहे प्रथमपुत्ररत्नस्य प्रादुर्भावोऽभूत्, यस्य संज्ञा **'काशीपतिः'** इति प्रसिद्धा।

एवंविधे पर्यवसिते काले १९५२ तमे वैक्रमाब्दे पौषशुक्लदशम्यां भगवन्नाम स्मरन्ती माताऽपि असारं संसारं विहाय स्वर्जगाम। मातृ-पितृविहीनः स चाहं नानाविध-गृहकार्यव्यासक्तः सन्नपि यथामतिर्यथावकाशं चाशरणशरणायाः मातुः शारदायाः शुश्रूषां नाजहाम्। अत एव अधस्तनानां ग्रन्थानां प्रणयेन क्षमोऽभवम्—

१. **रससर्वस्वम्**—ग्रन्थेस्मिन् सलक्षणोदाहरणाः सर्वे विषया प्रकरणशः संस्कृतभाषायां संगृह्य लिखिताः। (प्रकाशनतिथिः, आषाढकृष्णदशम्याम्, मङ्गलवासरे, १९५२ तमे वैक्रमाब्दे)।

२. **काशीखण्डः**—ग्रन्थोऽयं १९६५ तमे वैक्रमाब्दे श्रीव्येंकटेश्वरप्रेसमुम्बापुरीतः प्रकाशितः। भाषा-टीकायुतोऽयं ग्रन्थः कैलाशवासीकाशीनरेशप्रभुनारायणसिंहजू-देवाय समर्पितः।

३. **वाराणसीमाहात्म्यम्**—पुस्तकमिदं कूर्मपुराणस्य पञ्चाध्यायीरूपम्। भाषाटीका-विभूषितमिदमपि श्रीव्येंकटेश्वरमुद्रणालयतः प्रकाशितम्।

४. **महिम्नस्तोत्रपञ्चमुखीटीका**—ग्रन्थस्यास्योल्लेखः प्राक् सञ्जातः।

५. **नीतिदृष्टान्तमाला**—अष्टोत्तरशतश्लोकपरिमितः संस्कृतमूलहिन्दीछायासहितोऽयं ग्रन्थोऽप्रकाशित एव।

६. **श्रीविश्वनाथशतकम्**, ७. **श्रीगङ्गाशतकम्**, ८. **श्रीकाशीशतकम्**—शतकेष्वेतेषु पञ्चशतश्लोकाः समाविष्टाः। एतान्यप्रकाशितान्येव।

९. **शृङ्गारतिलकतिलकम्**—विश्वविश्रुतस्य महाकविकालिदासविरचितस्य शृङ्गार-तिलकाख्यस्य खण्डकाव्यस्य प्रकाशनं मम भाषापद्यतिलकेन सहितं काशीस्थलहरी-मुद्रणालये जातम्।

१०. **स्तोत्रपञ्चरत्नम्**—मम हिन्दीभाषापद्यानुवादसहितानि श्रीमच्छङ्कराचार्य-प्रणीतानि पञ्चस्तोत्राणि—अपराधक्षमापन—द्वादशपञ्जरिका—चर्पटपञ्जरिका-पञ्चरत्नमालिका—पञ्चाक्षरस्तोत्रञ्च—१९६५ तमे वैक्रमाब्दे लहरीमुद्रणालयत एव प्रकाशितानि।

११. **वसन्तलता**—सामाजिक उपन्यासोऽयं बङ्गभाषातोऽनूद्यलहरीमुद्रणालयत एव प्रकाशितः।

१२. **भूकम्पकाव्यम्**—काव्येऽस्मिन् मौनी अमावास्यातिथौ, १९९१ तमे वैक्रमाब्दे (ख्रैस्ताब्दतिथिः-१५-१-१९३४ ई०) भारतराष्ट्रे घटितस्य प्रचण्डभूकम्पस्य

संस्कृतश्लोकेषु वर्णनं वरीवर्ति। अस्य काव्यस्य क्रमशः प्रकाशनं तदानीन्तने संस्कृतपाक्षिकपत्रे 'सुप्रभातम्' इत्याख्ये समभूत्।

एतत्सम्पूर्णं विवरणं नवत्युत्तरैकोनविंशतिशततमे वैक्रमाब्दे श्रीमन्नारायणपतित्रिपाठिना प्रकाशिते **'विराड्विवरणाख्य'** ग्रन्थे कविकुलकथाशीर्षके हिन्दीभाषायां मुद्रितं वर्तते। समस्तस्यास्य विवरणस्य लेखकः—पं० त्रिपाठिनारायणपतिः।

मया किल **'रसिकजीवनम्'** नामकं ग्रन्थं सम्पादयता ग्रन्थकर्तुर्व्यक्तित्वकृतित्वपरिचयस्तत एव सङ्कलय्यात्र विदुषां प्रमोदायोपनिबद्धः। संस्कृतभाषायां नायिकाभेदविषयविकासविवरणञ्च संक्षेपतस्तत्तद्ग्रन्थान् आलोड्य रसिकजीवनप्रस्तावनारूपेणाहं खल्वत्र सङ्कलितवान्। ग्रन्थस्यास्य सम्पादनप्रसङ्गे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलसचिवः **श्रीविश्वम्भरनाथत्रिपाठी**—व्याकरणविभागाचार्यो **डॉ० कालिकाप्रसादशुक्लः**—साहित्यविभागप्राध्यापकाः **श्रीवायुनन्दनपाण्डेयमहोदयाश्च** विशेषतो धन्यवादार्हाः, येषां हि नाम सम्पादनौपयिकं साहाय्यं बहुमूल्यमासीत्। एवमेव **श्रीमनुदेवभट्टाचार्य**-डॉ० हरिश्चन्द्रमणित्रिपाठिभ्यां चातीव श्रमेणानुवादकार्ये यद्यत् साहाय्यं विहितम्, तदर्थं तावप्याशीर्वादार्हौ। मुद्रणसौष्ठवसंवर्धनविधौ तारायन्त्रालयसञ्चालकेन **श्रीरमाशङ्करपण्ड्यामहोदये**नापि समये समये महत्साहाय्यं कृतम्—तदर्थं तेऽपि धन्यवादार्हाः।

ग्रन्थेऽस्मिन् याः काश्चन त्रुटयस्ता मदीया इति मत्वा विद्वद्भिः क्षन्तव्योऽयं जनः।

अन्ते चाशास्यते यदयं ग्रन्थः साहित्यशास्त्रमर्मवेदिनां काव्यकलाकुशलानां सहृदयमनीषिणां मानसोल्लासाय कल्प्यत इति शिवम्।

वाराणस्याम्
माघशुक्लवसन्तपञ्चमी,
२०३४ तमे वैक्रमाब्दे।

विदुषां वशंवदः
करुणापतित्रिपाठी
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

श्रीशौ वन्दे

पण्डितरामानन्दपतित्रिपाठिविरचितं

रसिकजीवनम्

प्रथमस्तरङ्गः

गङ्गाम्भोबिन्दुरिङ्गत्पटुतरलहरीलास्यलीलाभिरिन्दोः
सन्दोहैश्चन्द्रिकाणां किमपि सपुलकं सान्द्रमुद्दीपितस्य ।
कान्तायाः कान्तकण्ठस्थलबहलभुजाश्लेषमुग्धाविलासाः
कल्याणं वर्द्धयन्तां प्रियसुखवसतेरर्द्धनारीश्वरस्य ॥ १ ॥
(स्रग्धरा)[1]

साहित्यार्णवमन्थनेन हि मया स्वीयप्रबन्धे शुभे
कुम्भे किन्तु नवे समुद्धतमहो प्रज्ञावतां प्रीतये ।
दृप्यद्दानवदुर्जनैरसुलभं भो निर्ज्जराः सज्जना
रामानन्दकवेस्तदेतदनिशं काव्यामृतं पीयताम् ॥ २ ॥
(शार्दूलविक्रीडितम्)[2]

विधाय बहुवन्दनं गजमुखाय विघ्नच्छिदे
शिवाय पदपङ्कजं हृदि निधाय लक्ष्मीपतेः ।
तदेतदतिसुन्दरं मधुकरात्मजेन स्वयं
रसज्ञजनहेतवे रसिकजीवनं तन्यते ॥ ३ ॥

विवेकविकलाः खलास्त इह दुर्बलाः प्रायशो
मदीयरचनारसार्णवमहो तरीतु पुनः ।
भवन्ति यदि सज्जनाः कतिपये मनोरञ्जना-
स्तदेतदवगाहितुं रसिकजीवनं ते क्षमाः ॥ ४ ॥
(पृथ्वी)[3]

सर्वेषामपि सम्मतोऽयमिति यत् साहित्यविद्याविदां
शृङ्गारो रसनायकः खलु ततस्तस्यैव हेतोरिह ।
अस्यालम्बनकारणे प्रथमतः प्रायस्तरङ्गद्वये
तन्येते रसिकप्रमोदजनकेऽस्मिन् नायिकानायकौ[4] ॥ ५ ॥
(शार्दूलविक्रीडितम्)

---

१. म्रभ्नैर्याणां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्—इति तल्लक्षणम् ।
२. सूर्याश्वैर्मसजस्तताः स गुरवः शार्दूलविक्रीडितम्—इति तल्लणम् ।
३. जसौ जससूला गुरु . — इति तल्लल्लणम् ।
४. "स्थूलसूक्ष्मन्यायेन (स्थूलारुन्धतीन्यायेन) नायिकैव प्रथमं तरङ्गे मया—इति पाठान्तरम् । निरूप्यत इत्यर्थः" ।

स्वीया च परकीया च सामान्यवनिता तथा ।
कलाकलापकुशलाः तिस्रस्तस्येह नायिकाः ।। ६ ।।

स्वस्वामिपरिचर्य्या च शीलसंरक्षणं तथा ।
आर्जवं च क्षमा चेति स्वीयायाः कथिता गुणाः ।। ७ ।।

स्वीया यथा[1]—

सदा यासां चेतः स्वपतिपरिचर्य्यैकरसिकं
सलीलं प्रोन्मीलद् विधुबहलशीलं विलसति ।
क्षमैकप्राचुर्यं शमिन इव शस्तार्जवमहो
कुलस्त्रीणामेतत् किमपि खल चित्रं व्रतमिदम् ।। ८ ।।
(शिखरिणी)

मुग्धा मध्या प्रगल्भा च स्वकीया त्रिविधा मता ।
मुग्धा ह्रियान्विता मन्ये मृद्वी चालङ्कृतिप्रिया ।। ९ ।।

मुग्धा यथा[2]—

लज्जोल्लासितनेत्रवल्लिविलसद्भ्रूवल्वरीपल्लव-
श्रीसन्दोहसमुद्भवत्सुखसुधाकल्लोलकल्लोलिनी ।
मध्यस्निग्धमुरस्थलोद्भूतरुचिव्याकृष्टचित्ता भृशं
धूलीकेलिविनोदमग्नहृदया मुग्धा वधूः क्रीडति ।।१०।।
(शार्दूलविक्रीडितम्)

अज्ञातयौवना ज्ञातयौवना चेति सा द्विधा ।। ११ ।।

अज्ञातयौवना यथा—

क्रीडन्ती क्वापि धूलीपटलवलयिते धाम्नि चञ्चच्चतुष्के[3]
मोदादात्मानुरूपाभिरपि सहवयस्याभिरेताभिरन्तः[4] ।
मुग्धाऽविज्ञाततत्त्वा निजतनुविलसत्कान्ततारुण्यभूते-
रालीनामेत्र वाग्भिः कथमपि हृदयं सावहेलं पिधत्ते ।।१२।।
(शार्दूलविक्रीडितम्)

---

८. रसैरुद्रैश्छिना यमनसभौला गः शिखरिणी— इति तल्लक्षणात् ।

१०. लक्षणमुक्तम् ।

---

1. पाठान्तरम्
सुश्रूषाचरणोद्धुराः प्रियतमे शीलार्जवैर्ल्जिताः
कान्तस्वान्तहराः क्षमाऽद्भुततराः शश्वत्त्रपानिर्भराः ।
विश्लेषक्रमकातराः प्रियतराः कारुण्यपूर्णाः परं
रामानन्दमनः प्रमोदजननाः स्वीयाङ्गनानां गुणाः ।। ७ ।।

2. अपरा मुग्धा यथा—
सव्रीडस्मितसुन्दरनयनयुगे भजति भङ्गुरीभावम् ।
नवनवभूषणरसिका शिव शिव मुग्धा मनो हरति ।। (आर्या)
—इति पाठान्तरम् ।। १० ।।

3. किञ्चित् किञ्चित् सुवक्षोवदरफलमिवोत्तुङ्गतां गाहतीव ।।१२।। इति पाठान्तरम् ।

4. दालीभिराभिः इति पाठान्तरम् ।

ज्ञातयौवना यथा—

स्थित्वा स्थित्वा नवनवसखीवृन्दमध्ये सुमध्या
कामक्रीडावचनरचनाचातुरीं शिक्षमाणा ।
सम्प्रत्येषा मदयति मनो मुग्धभावापि यूनां
किञ्चित् किञ्चिन्नयनकमले भङ्गुरे विक्षिपन्ती[1] ॥१३॥
(मन्दाक्रान्ता)

सा नवोढा भय[2]त्रासैः पराधीनरतिस्तु या ।
सप्रश्रयाऽथ विश्रब्धनवोढाऽन्या प्रकीर्त्तिता ॥१४॥

नवोढा यथा—

पुरस्तादालीभिः कथमपि च नीता सशपथं
पुनर्भीता लज्जाभयभरपरीता मुहुरपि ।
बहिर्गन्तुं गेहात् कलयति समीहामियमहो !
दृढाश्लेषं सोढा कथमिह नवोढा निजविभोः ॥१५॥
(शिखरिणी)

विश्रब्धनवोढा यथा—

नोवीनिर्यमणैकनिष्ठुरकराम्भोजोरुबन्धोद्धुरा
शश्वत्पाणिनिरुद्धकाञ्चनरुचिप्रोद्भासिचञ्चत्कुचा ।
रामानन्दसुखं जगत्सुकृतिभिस्तैरेव लब्धं जनै-
र्यैर्लज्जादरमुद्रिताक्षिकमला बाला चिरं चुम्बिता[3] ॥१६॥

---

१२ —१६ लक्षणमुक्तं द्वितीयश्लोके । १३—मन्दाक्रान्ताजलधि । १५—लक्षणमुक्तमष्टमश्लोके ।

---

1. यथा वा—
किञ्चित् किञ्चिच्चित्तं विरमति धूलीविनोदकेलीभ्यः ।
लज्जामपाङ्गमूलं सम्प्रति भजते कुरङ्गनयनायाः ॥१३॥ आर्या ।

2. ह्रिया इति पाठान्तरम् ॥१४॥ लज्जाया मुख्यत्वादयं पाठो युक्तः ।

3. आलीभिर्विनिवेश्य केलिभवनाद् यातं विहस्याधुने-
स्याशङ्कापरिशङ्किनी मुहुरपि व्रीडानमत्कन्धरा ।
तल्पोपान्तमुपेत्य संभ्रमभरं भूयस्तरां बिभ्रती
रामानन्दकणादसंशयपदे माना नवोढा वधूः ॥१६॥
एकस्मिन् धर्मिणि विरुद्धनानावमर्शः संशयः ।

समानलज्जा मदना मध्येति परिकीर्त्तिता ।
सैवातिप्रश्रयाद् बालाऽप्यतिविश्रब्धसंज्ञिका ॥१६॥

मध्या विश्रब्धनवोढा यथा—

निभृतनिभृतं केलीगेहे गतं नतशीर्षया
चकितचकितं तल्पोपान्ते स्थितं हरिणीदृशा ।
वलितवलितं भूयश्चेलाञ्चलावृतमन्तरा
कलयति मुखाम्भोजं तन्वी पतिं पुनरीक्षते[1] ॥१७॥

"स्वस्वामिकेलिनिपुणा प्रगल्भा साऽभिधीयते ।"

(हरिणी वा शालिनी)

प्रगल्भा यथा—

धन्यास्ताः सखि याः स्मरन्ति सुरतावस्थाव्यवस्थाक्रमं
भूयश्चापि निवेदयन्ति सुहृदां मोदाय तत्तद्दशाम् ।
अस्माकं तु नितान्तकान्तनिहितप्रव्यक्तदोःपल्लवां
नीवीं मुञ्चति वल्लभे सहचरि स्वल्पापि नैव स्मृतिः[2] ॥१८॥

(शार्दूलविक्रीडितम्)

एका धीराऽप्यधीराऽन्या धीराधीरा परा मता ।
मध्याप्रगल्भे कथिते त्रिविधे मानयोगतः ॥१९॥

व्यङ्ग्यकोपप्रकाशा तु धीराऽधीरा तु तं विना ।
व्यङ्ग्याव्यङ्ग्यप्रकोपस्य धीराधीरा प्रकाशिका[3] ॥२०॥

1—उत्कण्ठा रतिसङ्गरे नयनयोर्लज्जेति तल्पस्थया
यत् सङ्कल्पविकल्पकलिपतमनोवृत्त्याऽनया स्थीयते ।
अद्वैतागमजां निरस्य धिषणां द्वैतोत्थया शिक्षया
रामानन्दमनोभवेन गुरुणा मध्या किमध्यापिता ॥१७॥

2—आश्लिष्टा विशतीव हृत्सरसिजे पीयूषधारायिता
निष्पीतेऽधरपल्लवे पुलकिता वक्षोजनिष्पीडने ।
कन्दर्पोत्सवसत्प्रमोदलहरीं कन्दर्पलीलोद्भवं
"रामानन्द" विबोधयन्ति शयने धन्याः प्रगल्भां वधूम् ॥१८॥

(रतिप्रीता)

3—पर्यङ्के पदपङ्कजं विदधतः स्मेरं वचो जल्पतः
किञ्चित्कोपलसत्कटाक्षविशिखव्यापारमातन्वती ।
अन्तःप्रेमरसप्रवाहविगलत्प्रेमाश्रुभिर्दुर्दिनं
"रामानन्द" वितन्वती प्रियतमा धीराप्यधीरायते ॥२१॥

धीरा [1]सोत्प्रासवक्रोक्त्या मध्या साश्रुः कृतागसम् ।
खेदयेद् दयितं कोपादधीरा परुषाक्षरम् ॥ २१ ॥

मध्या धीरा यथा—

कालिन्दीमञ्जुकुञ्जोदरमधिभवतः क्रीडतः क्वापि कामं
हेमन्तेऽपीदमर्कद्युतिभिरिव यदुत्कीर्णमाविर्बभूव ।
दूरादुत्सारयन्तां मधुमथनतवासन्नवद्यम्बुशीताः
स्वेदाम्भःपूरमेते ह्युपवनकुसुमामोदधीराः समीराः ॥२२॥
(शार्दूलविक्रीडितम्)

मध्याऽधीरा यथा—

नेत्रं कोकनदानुकारि भवतो बिम्बाधरः खण्डितो
धत्ते मण्डनमेव किञ्च हृदयं वन्धूकपुष्पारुणम् ।
कालिन्दीजलबिन्दुसुन्दरमिदं गण्डस्थले कज्जलं
दृष्ट्वैतत्तव भूषणं कथमहो मन्मानसं दूयते ॥ २३ ॥
(शार्दूलविक्रीडितम्)

मध्याधीराधीरा यथा—

रूपेणासि मनोभवप्रतिनिधिर्बुद्ध्याऽथ वारांनिधिः
शीलेनासि कलानिधिर्गुणशतैर्मन्येऽसृजत् त्वां विधिः ।
इत्युक्त्वा तरुणी किमप्यकरुणीभावप्रगल्भाः प्रिये
निःश्वस्याश्रुपरिप्लुताक्षिकुटिला मुक्ताः कटाक्षच्छटाः ॥ २४ ॥
(शार्दूलविक्रीडितम्)

प्रौढा धीरा यथा—

तस्या एव मृगीदृशश्चरणयोरारम्यतामानतिः
किं मां वञ्चयसे नतेन शिरसा भूयोऽपि मिथ्येङ्गितैः ।
यस्याः पादयुगादलक्तकरसैर्वक्षोऽनुरक्तीकृतं
तामेव प्रमदां भज प्रिय मया किं कृत्रिमस्नेहया ॥ २५ ॥

प्रौढाऽधीरा यथा—

विदितमिह तवान्तः किं वृथा भाषसे मां
पुनरपि कुटिलायास्त्वं गृहं यास्यसीति ।
बहुतरकृतपुण्यः किन्तु सङ्केतकेली
भवनभुवि सुदत्या ताड्यते कोऽपि धन्यः ॥ २६ ॥
(मालिनी)

२६—न न म य युतेयं मालिनीभोगिलोकैरिति लक्षणात् ।

---

1. सोत्प्रासः स मनाक् स्मितम् ।

प्रौढा धीराधीरा यथा—

प्रणतिशतसहस्रैः सान्त्वयित्वा मृगाक्षी-
मनुनयशपथाभ्यां सानुरागामवेक्ष्य ।
करकमलममुष्या यावदालम्बतेऽसा
वतिकुटिलकटाक्षं तावदाविश्चकार ।।२७।।
(मालिनी)

मध्या पुनः प्रगल्भा च द्विधा सा परिभिद्यते ।
एका ज्येष्ठा कनिष्ठाऽन्या नायकप्रणयं प्रति ।।२८।।

धीरा ज्येष्ठा कनिष्ठा यथा—

कमलदलविशङ्की भीरुभृङ्गो भवत्या
स्फुटवदनसरोजं गन्धलुब्धोऽभ्युपैति ।
नयनयुगलमुद्रामित्थमापाद्य सद्यः
सपदि कितवबन्धुस्तावदन्यां चुचुम्ब ।।२९।।
(मालिनी)

अधीरा ज्येष्ठा कनिष्ठा यथा—

गुम्फाविधौ त्रुटितमौक्तिकहारयष्टे-
र्नम्राननामविकलय्य निकाममेकाम् ।
पश्चादुपेत्य शनकैरपनीय कोपं
धूर्त्तः परां प्रियतमां भृशमालिलिङ्ग ।।३०।।

धीराधीरा ज्येष्ठा कनिष्ठा यथा—

कस्तूरीपुटपेशलां कुचतटीमालोक्य वामभ्रुवोः
कृत्वैकां चकितां तवेति किमिदं पङ्कैकशङ्कामिषात् ।
एकस्याः स्तनमण्डलं हि निविडं निष्पीड्य भूयस्तरां
सान्द्रानन्दमवाप यत् स कितवः किं तद्धि वा कथ्यताम् ।।३१।।
(शार्दूलविक्रीडितम्)

परप्रियकृतस्नेहा परकीयेति सा मता ।
परोढाकन्यकाभेदैर्द्विधा सा परिकीर्तिता ।।३२।।

परोढा यथा—

कुञ्जप्रान्तेष्वभिनवलतामुत्सुका गन्धवाहा
आश्लिष्यन्तः कुटजकुसुमामोदिनो जातहर्षाः ।
एताः श्यामाः सकलककुभश्रेणिभिस्तोयदानां
दृष्ट्वा चेतः सहचरिपराधीनतां शंसतीव ।।३३।।

२७—२९—लक्षणमुक्तम् ।

३०—उक्ता वसन्ततिलका तभजा जगौ गः-इति तल्लक्षणात् ।

गुप्ता विदग्धा सुदती लक्षिता कुलटामुखाः ।
परकीया पुरन्ध्रीणामेते भेदाः क्वचिन्मताः ।। ३४ ।

वृत्तवर्तिष्यमाणादिभेदैर्गुप्ता त्रिधा मता ।
एकत्रैव प्रदर्श्यन्ते श्लोकोदाहरणेन ते ।। ३५ ।

गुप्ता त्रिधाऽपि यथा—

क्रोडीकृत्य यदा यदा सखि मया बालोऽयमालिङ्ग्यते
मुग्धोऽयं हि तदा तदा मम तनुं क्रूरैर्नखैः कृन्तति ।
रोदित्येव यदैव नापितवधूरादित्सते चेत् करं
मातस्तत् किमहं करोमि न पटुः प्रायो ममायं शिशुः । ३६ ।
(शार्दूलविक्रीडितम्)

विदग्धापि द्विधा प्रोक्ता वाक्क्रियाभेदविस्तरैः ।। ३७ ।

वाग्विदग्धा यथा—

उग्रैः प्रोद्दण्डतापैः किमिति बहुतरं तप्यसे चण्डभानोः
पान्थ क्लान्तो नितान्तं यदसि सविनयं त्वामहं तद्ब्रवीमि ।
अस्मिन्नुद्यानकुञ्जे नवदलविन्दलमञ्जुमल्लीसुगन्धे
स्नात्वा सन्तापमुच्चैरपनय तरणेरद्य तद्दीर्घिकायाम् ।। ३८ ।
(स्रग्धरा)

क्रियाविदग्धा यथा—

साङ्केतिकं कमपि वीक्ष्य जनं चिरेण
को वा भवांस्तदिति पृच्छति वल्लभेऽथ ।
भूमौ कुरङ्गनयना शकुनाक्षराणि
विन्यस्य तं खटिकया गणकं शशंस ।। ३९ ।
(वसन्ततिलकम्)

लक्षिता यथा—

श्वश्रूः प्रकुप्यतु विनिन्दतु वा ननान्दा
याता कुलेऽप्यहह मामसतीं ब्रवीतु ।
कान्तस्तनोतु भयमत्र तथापि चित्तं
रक्तं ममालि वनमालिविलोकनेन ।। ४० ।
(वसन्ततिलकम्)

कुलटा यथा—

कस्यापि कस्यचिदिहाश्रययोजनेन
विश्वं समस्तमपि सुस्थमहो विधाय।
त्रैलोक्यजीवनविधानकथाप्रसङ्गे
हा ब्रह्मणापि न कृतः कुलटाप्रसङ्गः ॥ ४१ ।

(वसन्ततिलकम्)

कन्यका यथा—

विधाय वदनाम्बुजे तनुतरं हि चेलाञ्चलं
निधाय शफरस्फुरत्पटुदृगाञ्चलं निश्चलम् ।
मृगीव चकिता मुहुः पुलकिता जनं सादरा-
दियं नृपतिकन्यका कमपि सस्मितं वीक्षते ॥ ४२ ।

(पृथ्वी)

वित्तार्थिनी भवेद् या तु कर्मणा मनसा गिरा ।
धनिमात्रकृतस्नेहा सामान्यवनिता मता ॥ ४३ ।

सामान्यवनिता यथा—

घनस्तनयुगार्पणैः स्मितमनोहरैर्भाषणैः
सविभ्रमपरिस्फुरन्नयनकोणसम्वीक्षणैः ।
विचित्ररतिकूजितैर्विविधवन्धवन्धक्रमैः
विनोदयति मानसं धनवतां हि वाराङ्गना ॥ ४४ ।

(पृथ्वी)

एतास्तिस्रो भवन्त्यन्यसम्भोगसुखदुःखिताः ।
वक्रोक्तिगर्विताश्चापि मानवत्यश्च ता इमाः ॥ ४५ ।

अन्यसम्भोगदुःखिता यथा—

अये दूति त्वं यन्मम रमणमासाद्य सुभगे
मदुक्तं चेदुक्तं किमु बहुवृथावादशपथैः ।
श्रुतं वा दृष्टं वाप्यहह ! नलिनीमेत्य चपले
न पीतं न त्यक्तं मधु मधुकरेणाम्बुजवने ॥ ४६ ।

(शिखरिणी)

वक्रोक्तिगर्विता द्वेधा कथिता रसकोविदैः ।
प्रेम्णैका गर्विता चान्या तथा सौन्दर्यगर्विता ॥ ४७ ।

प्रेमगर्विता यथा—

प्रियास्तास्ता दृष्ट्वा सपदि सखि लज्जावसतयः
　　कथं सान्द्रानन्दं कथय पतयोऽमी विदधते ।
गुरूणामभ्यर्णं पतिरसहमानोऽन्तरमहो
　　मुखोत्कीर्णं चेलाञ्चलमपि कथञ्चिन्न सहते ॥ ४८ ।

(शिखरिणी)

सौन्दर्यगर्विता यथा—

समाजे मित्राणां सततमुपविश्य प्रियतमो
　　ममैव प्रत्यङ्गं मुहुरपि सरङ्गं कलयति ।
इतीवान्तः खेदं न भजति पतिं प्रत्यपि यतो
　　ममेदं सौन्दर्यं सहचरि ! विडम्बं वितनुते ॥ ४९ ।

(शिखरिणी)

प्रियापराधमालोक्य भवेत् कोपसमाकुला ।
साहित्यरसतत्त्वज्ञैर्मानिनी साऽभिधीयते ॥५०।

मानवती यथा—

उद्भिन्नं चरणाम्बुजेन सुदृशः कन्दर्पलीलाविधौ
　　वक्षोऽलक्तकमण्डितं निजविभोरालोक्य दूरादपि ।
अन्तः कोपपकषायितं तरलितं वाष्पाम्बुपूरायितं
　　तन्व्यास्तत्समये न किं न किमहो नूनं दृगन्तैः कृतम् ॥५१।

(शार्दूलविक्रीडितम्)

[1]अष्टाभिस्तास्ताभिरेताभिरेताः
　　स्वावस्थाभिः षोडशाप्यष्टधा स्युः ।
प्रोषितभर्त्तृका खण्डितोक्ताऽथ भूयः
　　कलहान्तरिता विप्रलब्धा तथोत्का ॥
वासकसज्जा स्यात् स्वकाधीनभर्त्तृका
　　भूयोऽपि स्यात् साभिसारप्रिया च ॥५२।

(उपजातिः)

---

५२. इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातित्विदमेव नाम—इति तल्लक्षणात् । अन्येषां लक्षणमुक्तम् ।

---

1. आद्या प्रोषितभर्तृकेह कथिता स्यात् खण्डिताख्याऽपराऽ-
　　न्या कलहान्तरिता भवेच्च परतः स्याद् विप्रलब्धा वधूः ।
उत्का वासकसज्जिकाऽथ रमणी स्वाधीनकान्ता मता
　　रामानन्दमताभिसारकुशला चेत्यष्टधा नायिका ॥५२।

(शार्दूलविक्रीडितम्)

मुग्धा प्रोषितभर्तृका यथा—

नानाऽभिलाषजनितस्मृतिवृत्तिजातां
चिन्तां भजत्यति न जल्पति वा सखीभ्यः ।
वाष्पं विमुञ्चति दृशापि न लज्जयेव
मुग्धा वधूर्विरहदुःखमतीव गूढम् ।।५३।

(वसन्ततिलकम्)

मध्या प्रोषितभर्तृका यथा—

अमी[1] ते माकन्दाङ्कुरमधुरमाध्वीकमुदिताः
पिकाः कूजन्त्युच्चैरभिनवकलैः कुञ्जमभितः ।
विधत्ते सन्तापं सततमनुकूलोऽपि पवनो
वसन्तेऽपि स्वान्तं सखि भवति दुःस्थं किमिति ते ।।५४।

(शिखरिणी)

प्रौढा प्रोषितभर्तृका यथा—

काञ्ची मुञ्चति मध्यदेशमधुना वद्धा गुणैरप्यहो
केयूरेऽपि कराग्रमेव भजतो भूयो भुजान्तादपि ।
एतत्काञ्चनकङ्कणं बहिरिव प्रायः करात् सर्पति
द्वित्रैरेव दिनैस्तवाति तनुता याता शरीरे कुतः?।।५६।

(शार्दूलविक्रीडितम्)

परकीया प्रोषितभर्तृका यथा—

मा मा माऽलि मृणालनालमुचितं नैतत्कृते नाम्बुजं
किञ्च क्वापि न चन्दनद्रवमहो भूयो ममाङ्गेऽर्पय ।
मातः किं नु कुलालवह्निभवने यत् पङ्कलेपः कथं
तत् तापोपशमाय वेत्ति वदति स्वैराङ्गना[2] सुन्दरी ।।५७।

(शार्दूलविक्रीडितम्)

सामान्यवनिता प्रोषितभर्तृका यथा—

कुतोऽपि देशात् सुचिरेण कामं समेत्य वित्तं किल दास्यतीति ।
सिद्धार्थतैलैर्वदनं विमृज्य वाष्पोदकं मुञ्चति वारयोषा ।।५८।

पराङ्गनोपभोगेन चिह्नितः प्रातरेति यः ।
तत्पत्नी खण्डिता प्रोक्ता साहित्यरसकोविदैः ।।५९।

---

1. असह्यमिदमेव मे यदिह दक्षिणाशानिलः
प्रसर्पति गभस्तिभिर्दहति निर्दयश्चन्द्रमाः ।
वसन्तसमयेऽधुना सखि पिकोऽपि सञ्जल्पति
कुहूरिति मुहुर्मुहुर्विरहवेदनावर्द्धनम् ।।५४।

(पृथ्वी)

2. "गनोत्तापिता" इति पाठान्तरम् अस्ति ५७ श्लोकस्य ।

मुग्धा खण्डिता यथा—

तन्व्याश्चिरेण हृदयं हि पराङ्गनायाः
　　काञ्चीकलक्वणितशङ्कितमाकलय्य ।
तन्नूपुरौ मुहुरलं मुखरीविधाय
　　मुग्धामबोधयदहो भृशमेष धूर्त्तः ॥६०।

(वसन्ततिलकम्)

मध्या खण्डिता यथा—

उदञ्चत्पाटीरद्रववलितकाश्मीरकलित-
　　स्तनोद्भिन्नं पत्युर्मुहुरपि च वक्षः कलयती ।
समुत्थाय प्रातः शिव ! शिव ! मुखक्षालनविधौ
　　तिरोधत्ते वाष्पोदकमहह ! मध्या नववधूः[1] ॥६१।

(शिखरिणी)

प्रौढा खण्डिता यथा—

समाक्रान्तं वक्षश्चरणकमलालक्तकरसै
　　विपक्षप्रेयस्याः क्षुभितहृदया वीक्ष्य सुचिरम् ।
गिरा तन्व्या तन्वी पतिमसहमानात्ममुकुरे
　　मुखं दर्शं दर्शं त्रपयति सखी सुन्दरमुखी ॥ ६२ ।

(शिखरिणी)

परकीया खण्डिता यथा—

कान्तं विपक्षवनितावलयाङ्किताङ्गं
　　नेयं बतोपदिशतीति भृशं विलोक्य ।
चञ्चच्चकोरनयनान्तनितान्तशोणा
　　दूतीमुखे विनिहिताः खलु नेत्रकोणाः[2] ॥ ६३ ।

(वसन्ततिलकम्)

सामान्यवनिता खण्डिता यथा—

तामेव याहि कितव ! प्रमदां यदीय-
　　वक्षोयुगाङ्कितमिदं हृदयं विभाति ।
द्रव्यं ममार्पय पणीकृतमित्युदीर्य
　　रत्नाङ्गुलीयकमुपाददतेऽस्य वेश्या ॥ ६४ ।

(वसन्ततिलकम्)

---

1. वीक्ष्यालक्तकरागमण्डितमुरः कोदण्डवद्भङ्गुर—
　　भ्रूचापच्युतदृक्कटाक्षविशिखान् व्यापारयन्त्यो मुहुः ।
　कोपात् किञ्चिदवद्धनद्धवचनैरानन्दकन्दायिता
　　रामानन्दमनःप्रमोदजनने स्युः खण्डिताः पण्डिताः ॥६१।

(शार्दूलविक्रीडितम्)

2. "सुदृशाक्षि" इति पाठान्तरम् ॥ ६३ ॥

सेयं कलहान्तरिता पतिमवमत्यानुभवति सन्तोषम् ।
भ्रान्तिज्वरप्रलापाश्चेष्टानिःश्वासमोहसन्तापाः ।। ६५ ।

(गीतिः)

मुग्धा कलहान्तरिता यथा—

मञ्जुकदम्बसुगन्धे मिलदलिपुञ्जे समीरणे वहति ।
हरिहरिमुग्धपुरन्ध्रो पतिमनुनेतुं न लज्जया व्रजति ।। ६६ ।

(गीतिः)

मध्या कलहान्तरिता यथा—

अवनतवदनसरोजाऽप्याविर्भूतोरुदीर्घलज्जेयम् ।
कथमिह कलहनिवेदनमालिजने सुन्दरी कुरुताम् ।। ६७ ।

(आर्या)

प्रौढा कलहान्तरिता यथा—

कस्मादयमपि निर्दयभावं भूयो भजेत सखि ते भर्ता ।
अहह ! त्वमिह नु कलहं यदि न विदध्याः कदाचिदपि सुतनु ।। ६८ ।

(गीतिः)

परकीया कलहान्तरिता यथा—

यस्य कृते सखि ! विषमाः परिजनलोकस्य ता गिरः सोढा ।
सोऽपि मया परिभूतः कर्म न को वा पुराकृतं भुङ्क्ते ।। ६९ ।

(गीतिः)

सामान्यवनिता कलहान्तरिता यथा—

धनमिव जीवनमपि मे यस्य हि विदितं समस्तलोकस्य ।
विमुखीविधाय मातस्तमिह कमन्यं हि कामये मूढा ।। ७० ।

(गीतिः)

अपश्यन्तीं प्रियं प्रायः स्वसङ्केतनिकेतने ।
भवेद् व्याकुलचित्ता या विप्रलब्धेति सा मता ।। ७१ ।
सख्युपालम्भनिर्वेदमूर्च्छानिःश्वासपूर्विकाः ।
एताश्चेष्टास्तथा चान्याश्चिन्तावाष्पाम्बुसंयुताः ।। ७२ ।

मुग्धा विप्रलब्धा यथा—

सव्याजं समहोत्सवं सशपथं सस्नेहमभ्यर्थनै-
रानीता सखिभिर्निकुञ्जभवने मुग्धा कथञ्चित्पुनः ।
शून्यं वीक्ष्य वनं वधूः प्रतिदिशं प्रत्यर्पयन्ती मुहु-
र्न्यस्ताः काममदभ्रविभ्रमभृतः कुञ्जोपकण्ठे दृशः ।। ७३ ।

(शार्दूलविक्रीडितम्)

मध्या विप्रलब्धा यथा—

सङ्केतालयमेत्य नीरजमुखी यत्नैरनेकैर्भृशं
शून्यं वीक्ष्य तमत्र खिन्नहृदया चिन्ताकुलेयं मुहुः ।
न स्थातुं न च गन्तुमेव हि तथा रन्तुं न वा वीक्षितुं
न त्यक्तुं न विचेष्टितुं शिव-शिव ! प्रायः समर्थाभवत् ।। ७४ ।।

(शार्दूलविक्रीडितम्)

प्रौढा विप्रलब्धा यथा—

याताऽनेकमनोरथं विदधती कुञ्जोदरं सुन्दरी
शून्यं वीक्ष्य मुमूर्च्छ मन्मथशरोन्मीलद्विषव्याकुला ।
निर्वेदादिव दीर्घगद्गद्गिरा भूयोऽपि भूयो हरे!
गोविन्देति मुकुन्दमाधवविभो पाहीत्यहो जल्पति । ७५ ।

(शार्दूलविक्रीडितम्)

परकीया विप्रलब्धा यथा—

खलानां दुर्वाचः कथमपि विषह्यातिविषमा,
धृतिं बद्ध्वा बद्ध्वा भृशमधिगतं कुञ्जभवनम् ।
तदप्यन्तः शून्यं चिरमवकलय्याकुलतया
[1]ह्यपश्यन्ती कान्तं मुहुरपि वनान्तं मृगयते ।।७६।

(शिखरिणी)

सामान्यवनिता विप्रलब्धा यथा—

बहुतरधनदानच्छद्मना वारयोषा
सविनयमनुनीता केलिकुञ्जं जगाम ।
अहह ! गहनदुःखव्याकुला वीक्ष्य शून्यं
कलयति परितप्ताङ्गारशृङ्गारशोभाम् ।।७७।

(मालिनी)

सङ्केतभवने भर्त्तुर्भजत्यागमकारणम् ।
सैव साहित्यतत्त्वज्ञैरुत्केत्युक्ता मनीषिभिः ।।७८।
सन्तापा रतिजृम्भाङ्गाकृष्टिकम्पाश्रुपातनम् ।
स्वावस्थाकथनाद् या स्यादवस्थोक्ता मृगीदृशः ।।७९।

मुग्धोत्का यथा—

समामत्र प्रायो भृशमनवलोक्य प्रियतमां
गतः काममन्यां व्रजति यदिदानीमपि न सः ।
इतीवान्तर्मुग्धा मुहुरपि च चिन्ताकुलमुखी
सखीषु स्वावस्थां शिव-शिव! सलज्जा तिरयति ।।८०।

(शिखरिणी)

१—न पश्यन्तीत्यर्थः ।

मध्योत्का यथा—

तदेतत् किं कुञ्जं न मिलदलिपुञ्जं भवति वा
न वा नीतो भीतः किमिह मम सख्या सभुजगैः ।
इतीयं वाष्पोदैः श्रुतिकलितकह्लाररजस-
च्छलादन्तस्तप्ता वनमिव गता सिञ्चति वधूः ।।८१।
(शिखरिणी)

प्रौढोत्का यथा—

पयोभिर्मेघानां कुसुमितकदम्बेऽथ कुटजे
भृशं मन्दं मन्दं प्रसरति सुगन्धेऽपि पवने ।
लसत्कुञ्जेऽप्यन्तर्निविडतरुपुञ्जेऽपि भवने
ऋते कान्तं तन्व्यास्तदपि न सुखाय प्रभवति ।।८२।
(शिखरिणी)

परकीयोत्का यथा—

निर्विण्णं भवनादपि प्रतिगतं दूरे वनान्तादपि
ध्याता किञ्च चिरेण कान्तपदवीसन्धाय चित्ते पुनः ।
यन्नाद्यापि स गोचरः प्रभुरभूदेतादृशोरित्यहो
कान्ता तप्तुमिवेह कुञ्जभवने प्रायः किमत्रेहते ।।८३।
(शार्दूलविक्रीडितम्)

सामान्यवनितोत्का यथा—

मामादिश्य वचोभिरद्भुतरसोदञ्चत्सुधासोदरैः
सङ्केतीकृतकाननेऽपि किमिति प्राणेश्वरो नागतः ।
इत्यर्थोत्सुकमानसा पुरवधूः चिन्ताशतव्याकुला
वाष्पाम्भः पृषतैः कुचद्वयमहो भूयस्तरां सिञ्चति ।।८४।
(शार्दूलविक्रीडितम्)

अद्यमेकान्तदिवस इति निश्चितचेतसा ।
सज्जीकरोति सामग्रीं सैव वासकसज्जिका ।।८५।

सख्या सार्द्धं परीहासः सामग्रीसाधनं मुहुः ।
दूतीप्रश्नः कथालोकश्चेष्टा सह मनोरथैः ।।८६।

मुग्धा वासकसज्जा यथा—

काचित् ताम्बूलवीटीं रचयति कुतुकात् कापि पाटीरपङ्कं
कर्पूरैः पूरयन्ती कलयति च परा मल्लिकापुष्पमालाम् ।
काचित् केलीगृहान्तः तनुगुणवलितं दीपमुद्दीपयन्ती
मुग्धान्तः प्रेक्ष्य मोदं प्रभजति रजनौ वासकस्यालिचेष्टाः ।।८७।
(स्रग्धरा)

मध्या वासकसज्जा यथा—

फुल्लत्कह्लारहारं कलयति भवनद्वारमालोकयन्ती
भूषाभिर्भूषयन्ती निजतनुलतिकामुल्लसन्ती लतेव ।
इत्येवं वासकस्य प्रभवति सुमुखी वासरे संविधातुं
सामग्रीमात्मशिल्पप्रणयनकलनैः क्रीडतीवाङ्गनासौ ।।८८।
(स्रग्धरा)

प्रौढा वासकसज्जा यथा—

तैस्तैरास्तीर्य तन्वी बहुविधकुसुमैः तल्पमस्वल्पगन्धैः
कृत्वा ताम्बूलवल्लीं परिमलबहुलां तां लवङ्गीलताभिः ।
सज्जीकृत्येव व तूर्ण्यपि सुरतविधेर्भूषणैर्भूषिताङ्गी
केलीगेहान्तरालं निजतनुरुचिभिर्दुर्दिनं वर्द्धयन्ती[1] ।।८९।
(स्रग्धरा)

परकीया वासकसज्जा यथा—

श्वश्रूं वेश्मान्तराले क्वचिदपि निभृतं स्वापयित्वा तमिस्रे
धत्ते सङ्केतवृत्त्या कलकलितकलैः काकलीं सौधजाले ।
गेहान्तः कान्तबुद्धया मुहुरपि तरुणी विस्फुरद्ध्वान्तनाले
पल्यङ्केऽप्यर्पयन्ती निजकरकमलं नैव निद्रां जगाम ।। ९० ।
(स्रग्धरा)

सामान्यवनिता वासकसज्जा यथा—

शश्वच्चन्दनकुङ्कुमागरुमिलत्कर्पूरकस्तूरिका-
मोदक्षोदभरश्च तैरभिनवैः प्रत्यङ्कचञ्चद्रुचः ।
शृङ्गारेषु यथा यथा वरतनोर्वाराङ्गनायाश्चिरं
सव्यापारमहो धनेष्वपि तथा जाता मनोवृत्तयः ।। ९१ ।
(शार्दूलविक्रीडितम्।

सर्वदाऽऽज्ञाकराऽभीका स्वाधीनपतिका मता ।
महाहङ्कारकान्तारविहारमदनोत्सवाः ।। ९२ ।

मनोरथस्य चावाप्तिरिति चेष्टा मृगीदृशः ।। ९३ ।

मुग्धा स्वाधीनपतिका यथा—

कान्तिः कापि ममास्ति नाङ्गनिकरे नैवापि रागोऽधरे
पीनत्वं न तथाऽस्त्युरोजशिखरे श्रोणी न वा निर्भरे ।
प्रत्यङ्गेऽथ तथापि किन्तु सुभगे सौन्दर्यबुद्धया भृशं
श्रद्धालुः सखि ! वल्लभः कथमसौ मय्येव बद्धादरः ।। ९४
(शार्दूलविक्रीडितम्

1—"पूरयत्यञ्चिताभिः" इति पाठान्तरम् ।

मध्या स्वाधीनपतिका यथा—

कामक्रीडाप्रसङ्गे यदपि सखि मया वामया वारितोऽसौ
भूयो भूयोऽपि भूयोऽप्यहह ! पतिरसौ नेति नेतीति वाक्यैः ।
पायं पायं यथाऽयं मुहुरपि समुदं सादरं नाधरं मे
मुञ्चत्याहो तथैवोज्झति न पुनरसौ पार्श्वदेशं किमेतत् ॥९५॥
(स्रग्धरा)

प्रौढा स्वाधीनपतिका यथा—

आस्यं हास्यपुरस्कृतं नयनयोर्लास्यं हि यासामसौ
कान्तः स्तौति मृगीदृशां सपुलकं धन्या रमण्यस्तु ताः ।
नाना नर्मविचक्षणास्वपि सखि ! प्रायोभिदां पश्यतो
भर्तुः किन्तु पराङ्गनासु न कथं चेतस्तथा स्निह्यते ॥ ९६ ।
(शार्दूलविक्रीडितम्)

परकीया स्वाधीनपतिका यथा—

एतास्ताः प्रतिमन्दिरं मृगदृशो यासां न विश्राम्यति
प्रोन्मीलत्पटुकिङ्किणीकलकलप्रोद्दामकोलाहलः ।
किन्तु स्निग्धदृशा भृशं प्रतिवनं प्रत्यङ्गणं प्रत्यगं
प्रत्यध्वानमहो गतां सखि समां कान्तः कथं नोज्झति ॥९७।
(शार्दूलविक्रीडितम्)

सामान्यवनिता स्वाधीनपतिका यथा—

खेलत्खञ्जनमञ्जुलोचनकला यासामनङ्गोत्सव-
व्यासङ्गाय भवन्ति सन्ति परितस्तास्ताः कुरङ्गीदृशः ।
सोऽयं किन्तु युवा युवान्तरमहो मामेव पौराङ्गना-
लोकेभ्यो विमुखीविधाय घटयत्यर्थाय किं कारणम् ॥ ९८ ।
(शार्दूलविक्रीडितम्)

स्वयं वाऽभिसरत्येषाऽभिसारयति वा प्रियम् ।
सेयं रसनिनादज्ञैः कथिताऽत्राभिसारिका ॥ ९९ ।
यथाकालोल्लसद्भूषा शङ्का नैपुण्यसाहसाः ।
प्रज्ञा कपटमुख्याऽस्याश्चेष्टोक्ता रसकोविदैः ॥ १०० ।

मुग्धाऽभिसारिका यथा—

श्यामाः श्यामघनैः स्फुरन्ति परितः प्रान्तेषु सर्वा दिशः
क्षोणीमण्डलमञ्चतीदमभितो नीलं हि शष्पाङ्कुरैः ।
एषा नृत्यति नीलकण्ठपटली केकां वदन्ती मुहुः
कान्ते कूजति चातके सखि ! तव प्राप्तोऽभिसारक्षणम् ॥१०१।
(शार्दूलविक्रीडितम्)

मध्याऽभिसारिका यथा—

विद्युद्द्योतितदिग्विभागविहसत् कान्तारकजत्पटुः
प्रेमामोदितनीलकण्ठपटलत्रस्तोरगेन्द्रव्रजे ।
कालेऽम्भोधरसुन्दरेऽप्यभिसरन्ती हन्त ! शङ्काकृत-
स्वान्ता कान्तजनं दिनेऽत्र भवती भीता कथं लक्ष्यते ॥१०२।

(शार्दूलविक्रीडितम्)

प्रौढाऽभिसारिका यथा—

स्तूयन्तामभितो भुजङ्गरिपवः केकारवैः केकिनोऽ-
प्यासारैः परितः पयोदपटली मार्गं मुहुः सिञ्चतु ।
स्वेदाम्भः पवनः तुषारभवनः स्वैरं तिरोधापयेत्
मा खेदं व्रज सुन्दरि ! व्रज वनं कान्तो यतो वर्त्तते ॥ १०३ ।

(शार्दूलविक्रीडितम्)

परकीयाऽभिसारिका यथा—

हर्षोद्वर्षददभ्रमेघपटलध्वान्तभ्रमद्विभ्रम-
भ्रान्तस्वान्तपरिस्फुरद्द्युतिमिलत्सौदामिनीसुन्दरः ।
झञ्झान्दोलितझल्लरीझणझणञ्झञ्झावलीमञ्जुल-
स्त्वेष स्वैरमृगीदृशां हि समयः कान्ताभिसारक्षमः ॥१०४।

(शार्दूलविक्रीडितम्)

सामान्यवनिताऽभिसारिका यथा—

काञ्चीकङ्कणकुण्डलक्वणमिलत्केयूरकोलाहल-
क्रीडत्पादयुगाम्बुजार्पणरणत्कारोल्लसद्भूषणा[1] ।
चञ्चत्काञ्चनसूत्रचित्रवसनोत्कीर्णद्युतिद्योतित-
ध्वान्ता कान्तनिकेतनं निविशते [2]कस्यापि वाराङ्गना ॥१०५।

(शार्दूलविक्रीडितम्)

ज्योत्स्नाऽभिसारिका यथा—

चन्दनद्रवविलिप्तशरीराः कुन्ददामविनिवद्धसुकेशाः ।
योषितो विहरणेन हरन्ति स्वान्तमिन्दुधवलासु निशासु ॥१०६।

(स्वागता)

कृष्णाभिसारिका यथा—

नीलकञ्चुकनिचोलनिबद्धस्फीतचम्पकमनोज्ञशरीराः ।
तामसीषु विचरन्ति सरागाः स्वैरिणीयुवतयो हि विशङ्कम् ॥१०७।

(स्वागतम्)

१०६—१०७. स्वागतेति रनभाद् गुरुयुग्मभिति तल्लक्षणात् ।

---

1. न्नूपुरा इति पाठान्तरम् ॥१०५॥
2. धन्यस्य इति पाठान्तरम् ॥१०५॥

यास्यत्येव पतिर्यस्या देशेऽन्यत्र क्षणान्तरे।
सा प्रोष्यत्पतिका ज्ञेया शृङ्गाररसभावुकैः ॥१०८॥

वाष्पनिःश्वाससम्मोहसन्तापो विरतिस्तथा।
कातरप्रेक्षितं काकुवचो विघ्नोपदर्शनम् ॥१०९॥

मुग्धा प्रोष्यद्भर्तृका यथा—

गच्छत्येष सखि प्रियो यदि पुनस्तत् किं वृथा चिन्तया
दुःखव्याकुलितेव सम्प्रति भृशं मुग्धे मुहुर्म्लायसि।
अद्य श्वः कलकण्ठि! कण्ठमधुरोन्मीलत्कुहूकूजितैः
स्वच्छन्दं निगडोपमैः प्रियतमः स्वेनैव सम्बध्यते ॥११०॥

(शार्दूलविक्रीडितम्)

मध्या प्रोष्यत्पतिका यथा—

गन्तुं पृच्छति वल्लभे नयनयोर्वाष्पं तिरोभावितं
नोच्चैर्निःश्वसितं मनागपि न वा [1]सोद्वेगमुद्विग्नया।
केशैः किन्तु मृगीदृशः सरसिजैः शैवालजालैरिवोत्-
कीर्णं-[2]सुन्दरकान्तिवक्त्रमभितो रोलम्बवल्लम्बितैः ॥१११॥

प्रौढा प्रोष्यत्पतिका यथा—

गच्छामीत्येव वाचः श्रुतिविषयमहो! सङ्गताः प्रेयसोऽपि
प्रेयस्या अङ्गतापः सपदि विरहजो नूनमाविर्बभूव।
इत्यन्तःखिन्नचित्ताः पटुचकितधियश्चिन्तयन्त्यो वयस्या
इत्याचख्युर्गतेऽस्मिन्नहह! वरतनोः का भवित्री दशाऽस्याः ॥११२॥

(स्रग्धरा)

परकीया प्रोष्यत्पतिका यथा—

वचनीयं हि सहन्त्या किं किं न कृतं भवत्कृते नु मया।
स भवान् क्वचिदपि गन्ता प्रभवतु हन्ता त्वया विना मदनः ॥११३॥

(गीतिः)

सामान्यवनिता प्रोष्यत्पतिका यथा—

तव विरहज्वरपाण्डुरगण्डस्थलमोक्षितुं चिरेणाद्य।
प्रियतम! देहि पिनद्धं मणिनिकरैः काञ्चनादर्शम् ॥११४॥

(आर्या)

इति श्रीमत्सरयूपारीण-पण्डितधुरीण-महाकुलीन-श्रीमत्त्रिपाठिमधुकर-तनूजन्म-सकलविद्याचमत्कारपारङ्गम-श्रीरामानन्दशर्मविनिर्मिते साहित्यसागरसुधानिधानकलशे रसिकजीवने नायिकानिरूपणो नाम प्रथमस्तरङ्गः।

---

1. "न वा सोद्वेगतोद्भाविता" इति पाठान्तरम्।
2. "पङ्कज" इति पाठान्तरमस्ति ॥१११॥

द्वितीयस्तरङ्गः

श‍ृङ्गाररसनिष्पत्तौ नायिकाः कारणं यथा।
तद्धेतुत्वात्तरङ्गेऽस्मिन् नायकोऽपि निरूप्यते ॥१।

नायकलक्षणं यथा—

मानी त्यागी सुरतकुशलः सुन्दरः साधुवेषो
भव्यो नव्यः सुभगवचनः क्षान्तियुक्तः कलावित्।
रामानन्दप्रणयनपटुः सम्पदाढ्यः कुलीनो
नानाभोगानुभवरसिको नायकः कथ्यतेऽसौ ॥२।

(मन्दाक्रान्ता)

तत्रानुकूलः प्रथमो द्वितीयश्चापि दक्षिणः।
शठस्तृतीयो धृष्टश्च चतुर्थः परिकीर्त्तितः ॥३।

सततं पराङ्गनायां पराङ्मुखीवृत्तिभावनानिपुणः।
स्वीयाङ्गनासु सहजस्नेहहृद्विदग्धोऽनुकूल इत्युक्तः ॥४।

(गीतिः)

अनुकूलो यथा—

न वैदग्ध्यं वाचां न च हसितमप्यट्टहसितं
न तादृग्दृग्भङ्गिर्भ्रुकुटिकुटिलाभावसुभगा।
न वाऽलङ्काराणां सहचरि ! तथाधानकुशला
कथं रामानन्दो हरिरिह मयि प्रेम तनुते ॥५।

(शिखरिणी)

दाक्षिण्यं गौरवं भीतिं पूर्वयोषिति नोज्झति।
साधारणप्रियास्नेहशाली[1] दक्षिणलक्षणम् ॥६।

दक्षिणो यथा—

माधुर्यं वचसस्तदेव हि दृशोस्ते विभ्रमास्तादृशाः
साकूतस्मरकेलिकौतुककथास्ता एव सम्भाविताः।
रामानन्दसुखास्पदे ननु हरौ हा हन्त ! दोषाविला-
लोकालीकवचोभिरालिविकृतिः केन त्वयाऽऽविष्कृता ॥७।

(शार्दूलविक्रीडितम्)

परोक्षं यः प्रियं कुर्यादप्रियश्चापरोक्षतः।
सापराधोऽपि निःशङ्कः शठ इत्यभिधीयते ॥८।

---

1. "शीलम्" इति पाठान्तरम् ॥६॥

शठो यथा—

अलीकैरालीनां किमिह वचनैः सुन्दरि ! पुनः
तवैवाहं तावद् यदि सुमुखि ! चेद् विप्रियकरः ।
तदाऽलीकेनापि प्रभवति हि मुग्धे पुनरयं
स ते दासो नूनं पिशुनवचनैर्विप्रियकरः ।।९।
(शिखरिणी)

निःशङ्कः कृतदोषोऽपि वारितोऽपि पुनः पुनः ।
प्रश्रयप्रवणो नित्यं स धृष्टः कथितो बुधैः ।।१०।

धृष्टो यथा—

उदासीनां दीनामपि किमपि बुध्वाऽथ तदपि
प्रजल्पत्यव्यग्रः प्रहसति बलाच्चुम्बति च माम् ।
हठादप्याश्लेषं कलयति प्रणत्यानततनुः
कथं तस्मिन् भूयः सहचरि विदध्यां क्रुधमहम् ।।११।
(शिखरिणी)

पीठमर्द्दो विटश्चैव तथैव च विदूषकः ।
एते सहाया एतेषां चेतकोऽपि क्वचिन्मतः ।।१२।

प्रसादनपरायणः कुपितकामिनीनां भवेत्
स एव कविपुङ्गवैरिह हि पीठमर्द्दो मतः ।
विटो मदनतन्त्रविद् विविधवेषभाषादिभिः
कुतूहलकरोऽपरस्त्विह विदूषको हासकः ।।१३।।
(पृथ्वी)

पीठमर्द्दो यथा—

मानं मानिनि मुञ्च किञ्च चरणप्रान्तप्रपन्नं पुनः
प्राणेशं परिषिञ्च चण्डि ! करुणापीयूषवृष्ट्या दृशा ।
भूयश्चापि समुज्झिताखिलसुखारम्भाः कुरङ्गीदृश-
स्त्वं सम्भाव्य पुरेव मञ्जुवचनैरानन्दयालीरिमाः ।।१४।
(शार्दूलविक्रीडितम्)

विटो यथा—

मरीचिरुचिसञ्चयैश्चपलचञ्चुकोटीभृतः
समुल्लसति चन्द्रमाश्चपलयंश्चकोरानिह ।
मरुच्चलति शीतलो रटति चञ्चरीकश्चिरं
भविष्यति हि निश्चलस्तव स चण्डि ! मानः कथम् ।।१५।
(पृथ्वी)

विदूषको यथा—

प्रिये ! नायं तापस्तव रमणकोपान्मदनजो
भवेदेतन्मन्ये कथमितरथा तेऽङ्गदवथुः ।
न विश्रम्भो ह्यम्भोरुहमुखि! पुनश्चेतसि तदा
परीरम्भारम्भं भज भुजलताभिर्निजविभोः[1] ।। १६ ।।
(शिखरिणी)

इति श्रीमत्सरयूपारीण-पण्डितधुरीण-महाकुलीन-श्रीमत्त्रिपाठिमधुकर-तनूजन्म-सकलविद्याचमत्कारपारङ्गम-श्रीरामानन्दशर्मविनिर्मिते साहित्यसागरसुधानिधानकलशे रसिकजीवने

नायकनिरूपणो नाम द्वितीयस्तरङ्गः ।

---

1. कामा इति पाठान्तरम् ।

तृतीयस्तरङ्गः

सम्भोगो विप्रलम्भश्च शृङ्गारो द्विविधः स्मृतः ।
निरूप्याद्यं तरङ्गेऽस्मिन् विप्रलम्भो निरूप्यते ॥ १ ।

तदुक्तम्—

विप्रलम्भाभिधानोऽयं शृङ्गारः स्याच्चतुर्विधः ।
पूर्वानुरागो मानाख्यः प्रवासः करुणात्मकः ॥ २ ।

सम्भोगस्तु—

कूजच्चातकनिर्भरा वनभुवो नृत्यन्मयूराकुलाः
तेऽमी सीकरिणो वहन्ति[1] निभृतं वाताः कदम्बोद्भवाः ।
अभ्रैरभ्रमदभ्रविभ्रमहरं खद्योतविद्योतितः
कालः कोऽपि घनाघनस्त्रिजगतां विक्षोभणः शोभनः ॥३।

(शार्दूलविक्रीडितम्)

दम्पत्योर्दर्शनादेव समुत्पन्नानुरागयोः ।
ज्ञेयः पूर्वानुरागोऽयमप्राप्तौ स भवेद् यथा ॥ ४ ।

समन्तादप्यग्नेः कणमजनि कर्पूरकणिका
बृहद्भानुश्चन्द्रो गरलतरलं चन्दनरजः ।
दिनैर्द्वित्रैरेव प्रियतमवियोगे वरतनो-
रहो ! कष्टं व्यालावलिरिव मृणालावलिरभूत् ॥ ५ ।

(शिखरिणी)

विप्रलम्भे दशावस्था स्यादप्राप्तौ तयोरिह ।
अभिलाषोऽथ चिन्ता च स्मृतिश्च गुणकीर्त्तनम् ॥ ६ ।

उद्वेगोऽथ प्रलापः स्यादुन्मादो व्याधिरेव च ।
जडता मरणञ्चैव दुरवस्थं यथोत्तरम् ॥ ७ ।

व्यवसायो भवेद् यत्र बाढं तत्सङ्गमाशया ।
सङ्कल्पाकुलचित्तत्वात् सोऽभिलाषः स्मृतो यथा ॥ ८ ।

आयाति प्रतियाति वासभवनाद् व्यावृत्य यद् वीक्षते
यत् सख्यादरहासपेशलकथा शृङ्गारगर्भं वचः ।
प्रत्याख्याति विचेष्टते मुहुरपि प्रत्यग्रभावग्रहा
तन्मन्ये हरिणीदृशः प्रियतमे जाताभिलाषं मनः ॥ ९ ॥

(शार्दूलविक्रीडितम्)

---

1. "ऽपि वान्ति" इति पाठान्तरम् ॥ ३ ॥

कथं स वल्लभः प्राप्यः किं कुर्यामस्य तुष्टये।
कथं भवत्यसौ वश्य इति चिन्ता भवेद् यथा ।। १० ।

प्रेयांसं हृदये निधाय गुरुणा रागेण बद्धादरा
तद्विश्लेषरुजार्दितेन मनसा या खिद्यमानानिशम्।
नो सख्यश्चतुरास्तथाऽस्य मनसः सम्भावनासिद्धये
स्वावस्थामभिवक्तु कामियमहो ! चिन्ताकुला कामिनी ।। ११ ।

(शार्दूलविक्रीडितम्)

द्वेषो यत्रान्यकार्येषु तदेकाग्रं च मानसम्।
श्वासैर्मनोरथैश्चापि चेष्टा तत्स्मरणं यथा ।। १२ ।

खिद्यति चन्दनचन्द्रैरेभिस्तुहिनोपचारसमवेतैः।
श्वसितं दधाति बाला कमपि युवानं स्मरन्तीव ।। १३ ।

(आर्या)

सौन्दर्यहसितालापैर्नास्त्यन्यस्तत्समो युवा।
इति वाणी भवेद् यत्र तदिदं गुणकीर्त्तनम् ।। १४ ।

मृद्वचो माधुर्यधुर्या विजितविधुरुचस्ता गिरः स्मेरगर्भाः
तत्कारुण्यावलोकप्रकटितनयनद्वन्द्वमिन्दीवराभम्।
सौन्दर्यं तच्च तादृक् सहचरि ! किमपि क्ष्वेडपीडापरीतं
स्मारं स्मारं मुरारेर्गुणगणमतुलं मानसं मुह्यतीव ।। १५ ।

(स्रग्धरा)

स उद्वेगः स्मृतो यत्र द्वेषोऽत्यन्तहितेष्वपि ।।

चन्द्रं निन्दति चन्दनं न सहते कर्पूरमुत्सारय-
त्यम्भोजानि मृणालजालरुचिराण्यालोक्य विभ्राम्यति।
दग्ध्याच्चाङ्गणमध्यगा हिमकरप्रालेयकल्पैः करै-
स्तल्पेषु व्यजनानिलानपि वधूरुद्वेजिता चारुणत् ।। १६ ।

(शार्दूलविक्रीडितम्)

विभ्राम्यति मनो यस्मिन्नत्यौत्सुक्यादितस्ततः।
वाचः प्रियाश्रया एव स प्रलापः स्मृतो यथा ।। १७ ।

प्रियेणाहं दृष्टा न खलु हतयालोकि स मया
वचो दत्तं तेन प्रतिवचनमुक्तं न तदपि।
इति प्रादुर्भूतप्रियतमजनौत्कण्ठ्यनिबिडं
कुरङ्गाक्षी वाचं प्रलपति किमप्यर्थविधुराम् ।।१८।

(शिखरिणी)

अपूर्णंच्छन्दः—

उन्मादो रोदनश्वासकम्पभूलेखनादिभिः ।[1]
रोदिति श्वसिति कम्पते भृशं भूतलं लिखति किञ्च नखेन ।
विस्फुरद् गुरुतनूरुहमालां बिभ्रती प्रियतमोन्मदितेव ।।१९।

(उपजातिः)

सन्तापवेदनाप्रायो दीर्घश्वाससमाकुलः ।
तनूकृततनुर्व्याधिरष्टमो जायते यथा ।।२०।

स्मरज्वरव्याकुलिताङ्गयष्टेः
प्राप्ता तनुस्तानवमम्बुजाक्ष्याः ।
मनोभवव्याधिमिवोल्लपन्ती
विराजते पाण्डुकपोललक्ष्मीः ।।२१।

(उपजातिः)

अकाण्डे यत्र हूङ्कारो दृष्टिस्तब्धागता स्मृतिः ।
श्वासः समधिकः कार्श्यं जडतेयं स्मृता यथा ।।२२।

निःस्यन्दाक्षिकनीनिकास्यकमलश्वासोऽपि वैश्वानर-
ज्वालाबान्धवगन्धवाहविषमो बिम्बाधरं धूसरम् ।
हूमित्येव पदं न चेन्मृगदृशः प्रत्युत्तरं व्यञ्जकं
स्वीकुर्य्यादिह सुभ्रुवोऽपि निपुणः कः शालभञ्जीभिदाम् ।।२३।

(शार्दूलविक्रीडितम्)

इति श्रीमत्सरयूपारीण-पण्डितधुरीण-महाकुलीन-श्रीमत्त्रिपाठिमधुकर-
तनूजन्मविविधविद्याचमत्कारपारङ्गम-श्रीरामानन्दशर्म्मविरचिते
साहित्यसागरसुधानिधानकलशे रसिकजीवने
विप्रलम्भशृङ्गारप्रसङ्गे पूर्वानुरागवर्णने
तृतीयस्तरङ्गः ।

---

1. अपूर्णंच्छन्दः ।

चतुर्थस्तरङ्गः

पूर्वानुरागरचना[1] विप्रलम्भे निरूपिता ।
तुरीये तु तरङ्गेऽस्मिन् मानावस्था निरूप्यते ॥ १ ।

स प्रायशो भवेत्त्रेधा कामिनीनां प्रियं प्रति ।
अवेक्ष्य दोषमेतस्य गरीयान् मध्यमो लघुः ॥ २ ।

गुरुर्यथा—

भ्रमद्भ्रुकुटिवल्लरी भजति भङ्गुरां भावनां
विपक्षवनितानखक्षतमवेक्ष्य वक्षःस्थले ।
स्फुरत्सु रदनच्छदक्षुभितनेत्ररूक्षाक्षरै-
र्निवेदयति भामिनीं कमपि मानमुग्रं हृदि ॥ ३ ।

(पृथ्वी)

मध्यमो यथा—

रोषारुणेक्षणलसद्भ्रुकुटीतरङ्गै
रूक्षैर्वचोभिरभजद् गुरुतामपि प्राक् ।
मानः स एव सुतनोः प्रणयप्रणम्रे
जातागसि प्रियतमे लघिमानमाप ॥ ४ ।

(वसन्ततिलकम्)

लघुर्यथा—

नास्त्यागो मयि मीनाक्षि ! मुधैव परिखिद्यसे ।
इति वाऽऽकर्ण्य मानिन्या जाते वाष्पाकुले दृशौ ॥ ५ ।

मानभेदास्तु बहवो बहवो वर्णयन्त्यमून् ।
ग्रन्थगौरवमालोक्य दिङ्मात्रमिह दर्शितम् ॥ ६ ।

इति श्रीमत्सरयूपारीण-पण्डितधुरीण-महाकुलीन-श्रीमत्त्रिपाठिमधुकर-तनूजन्म-विविधविद्याचमत्कारपारङ्गम-श्रीरामानन्दशर्मविनिर्मिते साहित्यसागरसुधानिधानकलशे रसिकजीवने विप्रलम्भ-श्रृङ्गारप्रसङ्गे माननिरूपणो नाम चतुर्थस्तरङ्गः ।

---

1. कामावस्थाप्रयोक्त........।

पञ्चमस्तरङ्गः

प्रवासनिरूपणम्

विप्रलम्भाख्यश्रृङ्गारे मानावस्था निरूपिता ।
पञ्चमे तु तरङ्गेऽस्मिन् स प्रवासो निरूप्यते ।।१।

परदेशं व्रजेद् यत्र कुतश्चित्कारणात् प्रियः ।
स प्रवास इति ख्यातः कष्टावस्था द्वयोरपि ।।२।

आयातो मम यः पयोदसमयः सन्तापकारी स किं
नायातो दयितः परं हृदि यतश्चिन्ताचलं मे मनः ।
आलि ! प्राघुणिकाऽपि काऽपि न पुनः सम्प्रत्युपैतीह यत्
तत् किं केन कथं गमिष्यति वद प्रावृड् दिनं दुर्दिनम् ।।३।

(शार्दूलविक्रीडितम्)

धारापातप्रचुरविकिराः प्रस्फुरच्छीकरार्द्राः
सोढाः प्रौढाः परिमलभृतः केतकीगन्धवाहाः ।
खद्योताली विरलतिमिराप्रोषिते प्राणनाथे
विद्युत्सङ्गा हरति हृदयं कापि कादम्बिनीयम् ।।४।

(मन्दाक्रान्ता)

कार्श्यं जागरमालिन्यचिन्तोन्मादविमूर्च्छनाः ।
गते बन्धौ दशास्त्वेताः ता इहोक्ता न विस्तरात् ।।५।

इति श्रीमत्सरयूपारीण-पण्डितधुरीण-महाकुलीन-श्रीमत्त्रिपाठिमधुकर-तनूजन्म-विविधविद्याचमत्कारपारङ्गम-श्रीरामानन्दशर्मविनिर्मिते साहित्यसागरसुधानिधानकलशे रसिकजीवने विप्रलम्भ-श्रृङ्गारप्रसङ्गे प्रवासनिरूपणो नाम पञ्चमस्तरङ्गः।

षष्ठस्तरङ्गः

विप्रलम्भनिरूपणम्

तरङ्गे पञ्चमे किञ्चित् प्रवासो हि निरूपितः ।
करुणात्मक एतस्मिन् विप्रलम्भो निरूप्यते ॥ १ ।

केषाञ्चित् करुणाभ्रान्तिः कारुण्यादिह जायते ।
एतस्य मिथुनावस्थां विस्मृत्य रतिमूलजाम् ॥ २ ।

इत्ययमपि प्रियजनसमागमोत्सुकतामापादयन् श्रृङ्गारमेव पुष्णातीति सम्मतत्वात् सर्वेऽप्येनमङ्गीकुर्वते ॥ २ ॥

गत-गच्छद्-गमिष्यद्भिः प्रवासैः करुणो रसः ।
आगतागच्छदागामिभेदैरेकोऽप्यनेकधा ॥ ३ ।

गतप्रवासो यथा—

एते ते करिणोऽम्बुदालिमिषतो मन्ये कदम्बानिल-
व्याजात् किञ्च परिस्फुरन्ति परितस्तुङ्गास्तुरङ्गा अमी ।
हन्त ! स्वान्तविलोडनाय सुदृशां दूरङ्गते वल्लभे
सन्नद्धो मदनोऽद्य विद्युदसिभृत्त्यक्त्वा धनुः कौसुमम् ॥ ४ ।

(शार्दूलविक्रीडितम्)

अनयैव दिशा भेदा ज्ञेया अन्येऽपि कोविदैः ।
ग्रन्थगौरवभीत्या तु पृथक् सर्वे न वर्णिताः ॥ ५ ।

इति श्रीमत्सरयूपारीण-पण्डितधुरीण-महाकुलीन—
श्रीमत्त्रिपाठिमधुकरतनूजन्म-विविधविद्याचमत्कार-
पारङ्गम-श्रीरामानन्दशर्मविनिर्मिते साहित्य-
सागरसुधानिधानकलशे रसिकजीवने
विप्रलम्भश्रृङ्गारनिरूपणो नाम
षष्ठस्तरङ्गः ॥६॥

सप्तमस्तरङ्गः

हावभावप्रभेदनिरूपणम्

विप्रलम्भो हि शृङ्गारः सप्रभेदो निरूपितः ।
निरूप्यते तरङ्गेऽस्मिन् प्रभेदा भावहावयोः ।।१।

तारुण्ये वामनेत्राणां कथ्यन्ते कामकोविदैः ।
सत्त्वजाता अलङ्कारा विंशतिश्चतुरुत्तरा ।।२।

सञ्जायन्ते तत्र भावहावहेलास्त्रयोऽङ्गजाः ।
लीलाविलासो विच्छित्तिर्विभ्रमः किल किञ्चितम् ।।३।

मोट्टायितं कुट्टमितं विब्बोको ललितं तथा ।
विहृतं चेति कविभिः प्रोक्ताः स्वाभाविका दश ।।४।

अथ भावः—

निर्विकारात्मकात् सत्त्वाद् भावस्तत्राद्यविक्रिया ।

उदाहरणम्—

स्वैरस्मेरावलोकस्फुरदुरुशफरोत्सर्पिनेत्राशुगानां
विक्षेपं यत्र धत्ते युवजनमभितो विस्फुरद्भ्रूविलासः ।
उद्यद्दोर्वल्लिमूलो(द्) द्रुतलघुवसनव्यक्तवक्षोजकुम्भ-
द्वन्द्वाविष्कारशाली जयति मृगदृशः कोऽपि भावोऽन्तरस्थः ।।५।

(स्रग्धरा)

अथ हावः—

सवाष्पगद्गदालापः सस्मितापाङ्गवीक्षितम् ।
प्रेमदाक्षिण्यवृत्तिश्च तरुण्या हाव उच्यते ।।६।

एतस्या भ्रूविलासस्फुटमदनधनुर्वल्लरीविभ्रमाणां
दृग्भङ्गीभ्राजमानां श्रियमनुकुरुते चारुकर्णान्तपूर्णः ।
शैथिल्यं गात्रयष्टेर्गतिरपि च वलन्मत्तमातङ्गमन्दा
माधुर्यस्मेरगर्भा परिभवति पिकं मञ्जुला गीस्तरुण्याः ।।७।

(स्रग्धरा)

अथ हेला—

स एव हेला सुव्यक्तश्रृङ्गाररससूचकः ।

रत्युल्लासातिरेकात् प्रचुरतरवलत्कुञ्चितभ्रूलताया
गाढाश्लेषप्रदानप्रकटितपुलकव्यक्तकम्पाकुलायाः ।
सान्द्रानन्दं धयन्त्याः प्रियतमवदनाम्भोजमाध्वीकधारा-
मन्तः कामानुरक्तं न खलु कलयते कस्य हेलाङ्गनायाः ।।८।।

(स्रग्धरा)

अथ लीला— प्रियानुकरणं लीला मधुराङ्गविचेष्टितैः ।

वयस्याभिस्ताभिस्तदुदिततदध्यासितकथा
तदीहा तद्रत्युत्थितहसितभावार्द्रवपुषः ।
कुरङ्गाक्ष्यास्तत्तत् सपदि पतिलीलानुकरणं
मुदं यूनामन्तः प्रभजति निकामं कलयताम् ॥९।

(शिखरिणी)

अथ विलासः— तात्कालिको विशेषस्तु विलासोऽङ्गक्रियोक्तिषु ।

उत्फुल्लाम्भोजगर्भभ्रमदलिपटलीविभ्रमादभ्रशुभ्रा
यत्र स्मेराननश्रीर्मदयति सततं सर्वयूनां मनांसि ।
नृत्यन्नेत्राब्जकोणप्रचुरतरचमत्कारकान्तिप्ररोह-
प्रौढप्राग्भारशाली सुखयति हृदयं सुभ्रुवीभ्रूविलासः ॥१०।

(स्रग्धरा)

अथ विच्छित्तिः— आकल्परचनाल्पापि विच्छित्तिः कान्तिपोषकृत् ।

सर्गे पद्मभुवो भजत्यभिनवे नैवात्र चक्षुष्मतां
यस्या एव हि वीक्षणात् क्षणमपि स्वान्तं स्थिरीभावनाम् ।
एतस्याः स्मरकार्मुकप्रविलसद्भ्रूपल्लवायाः शुभे
भाले कापि विचित्रविन्दुसुषमा यूनो मनोहारिणी ॥११।

(शार्दूलविक्रीडितम्)

अथ विभ्रमः— विभ्रमस्त्वरया काले भूषास्थानविपर्ययः ।

कुतश्चित् सव्याजं चकितनयना केलिभवनाद्
बहिर्यान्तं कान्तं कथमपि विदित्वालिवचनैः ।
दृशोर्लाक्षालक्ष्मीं तिलकमपि गण्डस्थलयुगे
द्रुतं दध्रे लीलाञ्जनमलिकमध्येऽम्बुजमुखी ॥१२।

(शिखरिणी)

अथ किलकिञ्चितम्— क्रोधाश्रुहर्षभीत्यादेः सङ्करः किलकिञ्चितम् ।

पुलकपटलोद्भेदस्वेदप्रमोदसमुल्लसद्-
धसितरुदितक्रोधत्रासप्रकम्पपरसाद्भुता ।
सुरतरभसाद्यस्मिन्नन्तर्दशा मदनोद्भवा
सुखयतितरां धन्यस्यान्तः प्रियाकिलकिञ्चितम् ॥ १३ ।

(शालिनी)

अथ मोट्टायितम्—

दयितस्य कथारम्भे साङ्गभङ्गविजृम्भणम् ।
कर्णकण्डूयनं स्त्रीणां मोट्टायितमुदाहृतम् ।। १४ ।

कण्डूतिर्यदकारणं श्रवणयोर्यज्जृम्भणं भूरिशः
कान्ते तत्कथयाशु कोऽपि सुकृती स्वान्ते तवास्ते पुनः ।
यद्ध्यानादिदमुल्लसद्गुरुतरस्वेदोद्गमोद्दीपित-
प्रत्युद्यत्पुलकं प्रमोदनिबिडं मोट्टायितं धार्यते ।।१५।
(शार्दूलविक्रीडितम्)

अथ कुट्टमितम्—

केशस्तनादिग्रहणे हर्षादिभ्रमिते सुखे ।
दुःखाविष्करणं तन्व्या यत्तत् कुट्टमितं मतम् ।। १६ ।

केशं मुञ्च विमुञ्च नाथ ! नखरैः किं वा खरैः पीडयते
मा मां पीडय दंशनेन दशनैर्दासी भवेयं तव ।
इत्थं मन्मथसङ्गरस्फुटसुखव्यासङ्गमुग्धान्यहो !
धन्याः कुट्टमिताक्षराणि सुदृशां श्रुत्वा मुदं बिभ्रते ।।१७।
(शार्दूलविक्रीडितम्)

अथ विब्बोकः—

अभिमतवस्तूपहृतावपि गुरुगर्वादनादरस्तन्व्याः ।
स्खलिते प्रियस्य संयमताडनमित्येष विब्बोकः ।। १८ ।

यत्तत्कञ्चुकबन्धमोचनविधौ यच्चम्बनालिङ्गने
यन्नीवीवसनग्रहे मुहुरपि क्रोधप्रबोधोदयः ।
यद्भ्रूभङ्गतरङ्गितं प्रतिभटं सावज्ञमालोकितं
विब्बोकं कुटिलभ्रुवः किमपि तन्मन्येऽस्त्रमन्तर्भुवः ।। १९ ।
(शार्दूलविक्रीडितम्)

अथ ललितम् —

भ्रूनेत्रादिक्रियाशाली सुकुमारविधानतः ।
हस्तपादाङ्गविक्षेपस्तन्वङ्ग्या ललितं विदुः ।। २० ।

भ्राम्यद्भ्रूपरिवर्तिताक्षिकमलस्मेरावलोकोल्लसत्
पूर्णेन्दुप्रतिमाननद्युतिवलत्स्वेदार्द्रगण्डस्थलम् ।
उद्यद्वेपथुविस्फुरद्भुजयुगव्यक्तीभवद्विभ्रमं
तन्वङ्ग्या ललितं निसर्गललितं कस्यास्तु नान्तर्मुदे ।। २१ ।
(शार्दूलविक्रीडितम्)

अथ विहृतम्—

वाच्यानां च पदार्थानां ज्ञानेऽपि यदभाषणम् ।
नायकेषु मृगाक्षीणां विहृतं तत्प्रकीर्तितम् ।। २२ ।

कन्दर्पोल्लासलीलाविलसितबहलामोदसम्पद्विचित्रा
तिर्यक्सम्भाव्य नेत्राम्बुजमतिललितं वाचमाचम्य भर्त्तुः ।
ह्रीगर्भां स्वामवस्थामवनतवदनच्छद्मना व्यञ्जयन्त्या-
स्तन्व्यास्तन्नात्र चित्रं विहृतमपहरत्यन्तरं कस्य पुंसः ।। २३ ।
(स्रग्धरा)

इति श्रीमत्सरयूपारीण-पण्डितधुरीण-महाकुलीन-श्रीमत्त्रिपाठिमधुकर-
तनूजन्म-विविधविद्याचमत्कारपारङ्गम-श्रीमत्त्रिपाठिरामानन्द-
शर्मविनिर्मिते साहित्यसागरसुधानिधानकलशे रसिकजीवने
हावाद्यलङ्कारनिरूपणो नाम सप्तमस्तरङ्गः ।

❀ ❀ ❀

निद्रां विधूनयसि शास्त्ररसं रुणत्सि
सर्वेन्द्रियार्थमसमर्थविधिं विधत्से ।
चेतश्च विभ्रमयसे कविते ! पिशाचि
लोकस्तथापि सुकृती त्वदनुग्रहेण ।। १ ।

।। समाप्तश्चायं ग्रन्थः ।।

श्लोकपादानुक्रमणी

श्लो०	तरङ्गे	श्लोकाङ्काः
अ		
अकाण्डे यत्र हूङ्कारो	तृ० त०	२२
अज्ञातयौवना ज्ञातयौवना	प्र० त०	११
अष्टाभिस्तास्ताभि	प्र० त०	५२
अद्यमेकान्त दिवस इति	प्र० त०	८५
अनयैव दिशाभेदा	प्र० त०	५
अपश्यन्तीं प्रियः प्रायः	प्र० त०	७१
अभिमतवस्तूपहृतावपि	स० त०	१८
अमी ते माकन्दाङ्कुर	प्र० स०	५४
अये इति त्वं यन्मम	प्र० त०	४६
अलीकैरालीनां किमिह वचनैः	द्वि० त०	९
अवनतवदनसरोजाऽन्या	प्र० त०	६७
आ		
आयाति प्रतियाति वासभवनात्	तृ० त०	९
आयातो मम यः पयोदसमयः	पं० त०	३
आस्यं हास्यपुरस्कृतं नयनयो	प्र० त०	९६
इ		
इत्ययमपि प्रियजनसमागमो		२
उ		
उत्फुल्लमम्भोजगर्भभ्रमदलिपटली	स० त०	१०
उदञ्चत्पाटीरद्रववलित	प्र० त०	६१
उदासीनां दीनामपि किमपि	द्वि० त०	११
उद्भिन्नं चरणाम्बुजेन	प्र० त०	५१
उद्वेगोऽथ प्रलापः स्याद्	तृ० त०	७
उन्मादो रोदनश्वासकम्प	तृ० त०	१९
उस्रैः प्रोदण्डतापैः किमिति	प्र० त०	३८
ए		
एका धीराऽप्यधीराऽन्या	प्र० त०	१९
एतस्या भ्रूविलासस्फुटमदनधनु	स० त०	७

श्लो०	तरङ्गे	श्लोकाङ्काः
एतास्ताः प्रतिमन्दिरं मृगदृशो	प्र० त०	९४
एतास्तिस्रो भवन्त्यन्य	प्र० त०	४५
एते ते करिणोऽम्बुदालिमिषतो	ष० त०	४
क		
कथं स वल्लभः प्राप्यः	तृ० त०	१०
कण्डूतिर्यदकारणं श्रवणयोः	स० त०	१५
कन्दर्पोल्लासलीलाविलसित	स० त०	२३
कमलदलविशङ्की	प्र० त०	२९
कस्मादयमपि निर्दयभावं	प्र० त०	६८
कस्तूरीपुटपेशलां	प्र० त०	३१
कस्यापि कस्यचिदिहा	प्र० त०	४१
काचित् ताम्बूलवीटीं	प्र० स० त०	८९ (द्र १४)
काञ्चीकङ्कणकुण्डलक्वणमिलत्	प्र० त०	१०५
काञ्ची मुञ्चति मध्यदेशमधुना	प्र० त०	५६
कान्तं विपक्षवनिता	प्र० त०	६३
कान्तिः कापि ममास्ति नाङ्गनिकरे	प्र० स०	९४
कामक्रीडाप्रसङ्गे यदपि सखि मया	प्र० त०	९५
कालिन्दीमञ्जुकुञ्जो	प्र० त०	२२
कार्श्यं जागरमालिन्य	प्र० त०	५
क्रीडन्ती क्वापि धूलीपटलवलयिते	प्र० त०	१२
कुतश्चित् सव्याजं	स० त०	१२
कुतोऽपि देशात् सुचिरेण कामं	प्र० त०	५८
कुञ्जत्प्रान्तेष्वभिनवलता	प्र० त०	३३
कूजच्चातक निर्भरावनभत्रो	तृ० त०	३
केशस्तनादि ग्रहणे	स० त०	१६
केशं मुञ्च विमुञ्च नाथ	स० त०	१७
केषाञ्चित् करुणाभ्रान्ति	ष० त०	२
क्रोडीकृत्य यदा यदा सखि मया	प्र० त०	३३
ख		
खलानां दुर्वाचः कथमपि	प्र० त०	७६
खिद्यति चन्दनचक्रैरेभि	तृ० त०	१३
खेलत्खञ्जनमञ्जुलोचनकला	प्र० त०	९८
ग		
गङ्गाम्भोबिन्दुरिङ्गत्	प्र० त०	१
गच्छस्येष सखि प्रिये यदि	प्र० त०	११०

श्लो०	तरङ्ग०	श्लोकाङ्का
गच्छामीत्येव वाच	प्र० त०	११२
गत-गच्छद्-गमिष्यद्भि	ष० त०	३
गन्तुं पृच्छति वल्लभे नयनयोः	प्र० त०	१११
गुप्ता विदग्धा सुदती	प्र० त०	३४
गुम्फाविधौ त्रुटितमौक्तिकहारयष्टे	प्र० त०	३०
घ		
घनस्तनयुगार्पणैः	प्र० त०	४४
च		
चन्दनद्रवविलिप्तशरीराः	प्र० त०	१०६
त		
तत्रानुकूलप्रथमो	द्वि० त०	३
तदेतत्किं कुञ्जं	प्र० त०	८१
तन्व्याश्चिरेण हृदयं हि	प्र० त०	६०
तरङ्गे पञ्चमे किञ्चित्	ष० त०	१
तव विरहज्वरपाण्डुगण्ड	प्र० त०	११४
तस्या एव मृगीदृशश्चरणयो	प्र० त०	२५
तामेव याहि कितव	प्र० त०	६४
तारुण्ये वामनेत्राणां	स० त०	२
तैस्तैरास्तीर्य तन्वी	प्र० त०	८९
द		
दम्पत्योर्दर्शनादेव	तृ० त०	४
दयितस्य कथारम्भे	स० त०	१४
दाक्षिण्यं गौरवं भीति	द्वि० त०	६
द्वेषो यत्रान्यकार्येषु	तृ० त०	१२
ध		
धन्यास्ता सखि या स्मरन्ति	प्र० त०	१८
धनमिव जीवनमपि	प्र० त०	७०
धारापातप्रचुरविकिराः	पं० त०	४
धीरा सोत्प्रासवक्रोक्त्या	प्र० त०	२१
न		
न वैदग्ध्यं वाचां	द्वि० त०	५
नानाभिलाषजनित	प्र० त०	५३

नास्त्यागो मयि मीनाक्षि	च० त०	४
निद्रां विधूनयति शास्त्ररसं रुणद्धि	स० त०	१
निभृतनिभृतं केलिगेहे	प्र० त०	१७
निर्विण्णं भवनादपि प्रतिगतं	प्र० त०	८३
निःशङ्कृतदोषोऽपि	द्वि० त०	१०
निःस्यन्दाक्षि कनीनिकस्य	तृ० त०	२३
नीवीनिर्यमणैकनिष्ठुरकरा	प्र० त०	१६
नीलकञ्चुकनिचोलनिबद्ध	प्र० त०	१०६
नेत्रं कोकनदानुकारिभवतो	प्र० त०	२३

प

पयोभिर्मेघानां	प्र० त०	८२
परदेशं व्रजेद् यत्र	पं० त०	२
परप्रियकृतस्नेहा	प्र० त०	२३
पराङ्गनोपभोगेन	प्र० त०	५९
परोक्षं यः प्रियं कुर्याद	द्वि० त०	८
पीठमर्दो विटश्चैव	द्वि० त०	१२
पुरस्तादालीभिः कथमपि	प्र० त०	१५
पुलकपटलोद्भेद	स० त०	१३
पूर्वानुरागरचना	च० त०	१
प्रणतिशतसहस्रैः	प्र० त०	२६
प्रसादनपरायणकुपितकामिनीनां	द्वि० त०	१३
प्रियापराधमालोक्य	प्र० त०	५०
प्रियास्तास्ता दृष्ट्वा	प्र० त०	४८
प्रियेणाहं दृष्टा न खलु	तृ० त०	१८
प्रियेनाऽयं तापस्तव	द्वि० त०	१६
प्रेयासं हृदये निधाय	तृ० त०	११

फ

फुल्लकह्लारहारं कलयति	प्र० त०	८८

ब

बहुतरधनदानच्छदमना वारयोषा	प्र० त०	७७

भ

भ्रमद् भ्रुकुटिवल्लरी	च० त०	३
भ्राम्यद् भ्रूपरिवर्तिताक्षिकमल	स० त०	२१
भ्रूनेत्रादि क्रियाशाली	स० त०	२०

श्लो०	तरङ्ग	श्लोकाङ्काः
म		
मञ्जुकदम्बसुगन्धे	प्र० त०	६६
मध्या पुनः प्रगल्भा च	प्र० त०	२८
मनोरथस्य चावाप्तिरिति	प्र० त०	९३
मरीचिरुचिसञ्चयैश्चपल	द्वि० त०	१५
माधुर्यं वचसस्तदेव हि दृशो	द्वि० त०	७
मानभेदास्तु बहवो	च० त०	६
मानं मानिनि मुञ्च किञ्च	द्वि० त०	१४
मानी त्यागी सुरतकुशलः	द्वि० त०	२
मामादिश्यवचोभिरद्भुतरसो	प्र० त०	८४
मा मा माऽलिमृणालनालमुचितं	प्र० त०	५७
मृद्व्यो माधुर्यधुर्या	तृ० त०	१५
मुग्धा मध्या प्रगल्भा च	प्र० त०	९
मोट्टायितं कुट्टमितं	स० त०	४
य		
यत्तत्कञ्चुकबन्धमोचनविधौ	स० त०	१९
यथा कल्लोल्लसद्भूषा	प्र० त०	१००
यस्य कृते सखि विषमा	प्र० त०	६९
याताऽनेकमनोरथं विदधती	प्र० त०	७५
यास्यत्येव पतिर्यस्या	प्र० त०	१०८
र		
रत्युल्लासातिरेकात्	स० त०	८
रूपेणासि मनोभवप्रतिनिधिः	प्र० त०	२४
रोषारुणेक्षणलसद्भ्रुकुटीतरङ्गैः	च० त०	४
ल		
लज्जोल्लसितनेत्रवल्लिविलसद्	प्र० त०	१०
व		
वक्रोक्तिगर्विता द्वेधा	प्र० त०	४७
वचनीयं हि सहन्त्या किं किं न कृतम्	प्र० त०	११३
वयस्याभिस्ताभिस्तदुदित	स० त०	९
वाच्यानां च पदार्थानां	स० त०	२२
वित्तार्थिनी भवेद् या तु	प्र० त०	४३
विदग्धाऽपि द्विधा प्रोक्ता	प्र० त०	३७

श्लो०	तरङ्गे	श्लोकाङ्काः
विदितामिह तवान्तः	प्र० त०	२६
विद्युद्द्योतितदिग्विभागविहसद्	प्र० त०	१०२
विधाय बहुवन्दनं	प्र० त०	३
विधाय वदनाम्बुजे	प्र० त०	४२
विप्रलम्भाख्यश्रृङ्गारे	पं० त०	१
व		
विप्रलम्भाभिधानोऽयं	तृ० त०	२
विप्रलम्भे दशावस्था	तृ० त०	६
विप्रलम्भो हि श्रृंगार	स० त०	१
विवेकविकलाःखलास्त	प्र० त०	४
विश्राम्यति मनो यस्मिन्	तृ० त०	१७
वृत्तवर्त्तिष्यमाणादि	प्र० त०	३५
व्यवसायो भवेद् यत्र	तृ० त०	८
व्यङ्ग्यकोपप्रकाशात्तु	प्र० त०	२०
श		
शश्वच्चन्दनकुङ्कुमागरुमिलद्	प्र० त०	९१
श्यामा श्यामघनैः स्फुरन्ति परितः	प्र० त०	१०१
श्वश्रूः प्रकुप्यतु विनिन्दतु वा ननान्दाः	प्र० त०	४०
श्वश्रूवेश्मान्तराले क्वचिदपि	प्र० त०	९०
श्रृंगाररसनिष्पत्तौ	द्वि० त०	१
स		
सख्युपालम्भनिर्वेदं	प्र० त०	७२
सङ्केतभवने भर्तुर्	प्र० त०	७८
सङ्केतालयमेत्य नीरजमुखी	प्र० त०	७४
सञ्जायन्ते तत्र भावहावः	स० त०	३
सततं पराङ्गनायां	द्वि० त०	४
सदा यासां चेतः	प्र० त०	८
सन्तापवेदना प्रायो	तृ० त०	२०
सन्तापारति जृम्भाङ्गा	प्र० त०	७९
स प्रायो भवेत्त्रेधा	च० त०	२
समन्ताद्व्यग्नैः	तृ० त०	५
समाक्रान्तं वक्षश्चरण	प्र० त०	६२
समाजे मित्राणां	प्र० त०	४९
समानलज्जामदना	प्र० त०	१६

श्लो०	तरङ्ग	श्लोकाङ्काः
सम्भोगो विप्रलम्भश्च	तृ० त०	१
समामत्र प्रायो भृशमनवलोक्य प्रियतमां	प्र० त०	८०
सर्गे पद्मभुवो भजत्यभिनवे	स० त०	११
सर्वदाज्ञाकराऽभीका	प्र० त०	९२
सर्वेषामपि सम्मतोऽयमिति	प्र० त०	५
सव्याजं समहोत्सवं	प्र० त०	७३
सबाष्पगद्गदालाप	स० त०	६
स उद्वेगस्मृतो यत्र	तृ० त०	१६
साङ्केतिकं कमपि वीक्ष्य	प्र० त०	३९
सा नवोढा भयत्रासैः	प्र० त०	१४
साहित्यार्णवमन्थनेन हि	प्र० त०	२
स्मरज्वरव्याकुलिताङ्गयष्टेः	तृ० त०	२१
स्थित्वा स्थित्वा नव नव सखी	प्र० त०	१३
स्वयं वाऽभिसरत्येषा	प्र० त०	९९
स्वीया च परकीया च	प्र० त०	६
स्तूयन्तां परितो भुजङ्गरिपवः	प्र० त०	१०३
स्वैरस्मेरावलोकस्फुरदुरुशफरोत्	स० त०	५
सेर्ष्यं कलहान्तरिता	प्र० त०	६५
सौन्दर्यहापितालापैः	तृ० त०	१४
ह		
हर्षोद्वर्षदभ्रमेघपटल	प्र० त०	१०४

———